संस्कृतविश्वविद्यालय-ग्रन्थमालायाः 134 पुष्पम्

# भारतीयदर्शनेषु वादविमर्शः

प्रधान-सम्पादकः
**प्रो. मुरलीमनोहरपाठकः**
कुलपतिः

सम्पादकः
**प्रो. ए.एस्. आरावमुदन्**

सह-सम्पादकः
**डॉ. विजयगुप्ता**

शोध-प्रकाशनविभागः
**श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः**
नवदेहली-110016

संस्कृतविश्वविद्यालय-ग्रन्थमालायाः 134 पुष्प

# भारतीयदर्शनेषु वादविमर्शः

प्रधान-सम्पादकः
**प्रो. मुरलीमनोहरपाठकः**
कुलपतिः

सम्पादकः
**प्रो. ए.एस्. आरावमुदन्**
पीठप्रमुखः, दर्शनशास्त्रपीठम्

सह-सम्पादकः
**डॉ. विजयगुप्ता**
सहायकाचार्यः, सर्वदर्शनविभागः

**श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः**
**नई दिल्ली-110016**

प्रकाशकः

**श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः**

बी–4, कुतुबसांस्थानिकक्षेत्रम्, नवदेहली–110016

© प्रकाशकाधीन

प्रकाशनवर्षम् : 2024

ISBN : 978-81-972035-6-5

मूल्यम् : ₹ 700.00

मुद्रकः

**डी.वी. प्रिन्टर्स**

97–यू.बी., जवाहरनगरम्, देहली–110007

# प्ररोचना

त्रिविधतापनिवृत्तेः स्वरूपानन्दावाप्तेश्च आत्यन्तिकोपायचिन्तनं भारतीयदर्शनस्याधारशिलेति प्रसिद्धम्। भारतीयज्ञानपरम्परायाम् अनादिकालाद् ऋग्वेदादारभ्य इदानीं यावत् विभिन्नेभ्यः शास्त्रेभ्यः समुद्रवद्गभीरशास्त्रं दर्शनमेव इति नास्ति संशयः। नास्तिकास्तिकभेदेन विभक्तेयं दर्शनचिन्तनधारा निरन्तरं फलति वर्धते च। आस्तिकदर्शने साङ्ख्य-योगौ न्याय-वैशेषिकौ मीमांसा-वेदान्तौ च प्रसिद्धाः, नास्तिकदर्शने चार्वाग्जैनबौद्धा एव ख्यातिलब्धा इति। प्रवर्तकाचार्यैः सूत्रकारै वा स्थापितस्य दर्शनस्य सिद्धान्ता भाष्य-टीका-उपटीका-वृत्ति-विवृति-वार्त्तिककारै विस्तारिता व्याख्याताश्च।

प्रत्येकं दर्शने स्व-स्वमौलिकसिद्धान्ताः प्रतिपादिता व्याख्याताश्च, तानाश्रित्य एव प्रत्येकं दर्शनं स्वमतमन्येभ्यो भिन्नं विशिष्टञ्च प्रकटयति। यदि एकं दर्शनं कस्यापि सिद्धान्तस्य स्वरूपं मतञ्च पृथगुपस्थापयति तर्हि दर्शनानन्तरं तस्मिन्नेव सिद्धान्तविषये किञ्चिदन्यत्स्वरूपं मतञ्च प्रतिपादयति। यथा- कार्यकारणवादसिद्धान्तविषये साङ्ख्ययोगयोः सत्कार्यवाद इति सिद्धान्तः प्रसिद्धः, न्यायवैशेषिकदर्शनयोः असत्कार्यवादः, बौद्धस्य असत्कारणवादः, वेदान्तस्य च विवर्तवाद इति। एवमेव सम्पूर्णेऽस्मिन् भारतीयदर्शने नैके सिद्धान्ताः स्वीकृता व्याख्याताः प्रसिद्धाश्चेति। तान् सिद्धान्तानधिकृत्य दर्शनशास्त्रपीठेन त्रिदिवसीया राष्ट्रिया सङ्गोष्ठी 2022 तमे वर्षे मार्चमासे 9-11 दिनाङ्केषु समायोजिता, यत्र देशेऽस्य भिन्न-भिन्नविश्वविद्यालयेभ्यो महाविद्यालयेभ्यश्च समागताः स्वस्वविषये सूक्ष्मातिसूक्ष्मविचारकाः कृतभूरिपरिश्रमा आचार्या भारतीयदर्शनस्य प्रमुखवादान् अधिकृत्य विशिष्टं व्याख्यानं प्रदत्तवन्तः, तत्रैव जिज्ञासवः शोधच्छात्राश्च शोधपत्राणि प्रस्तुतवन्तः, तानि शोधपत्राणि सङ्कलय्य 'भारतीयदर्शनेषु वादविमर्शः' इति ग्रन्थरूपेण प्रकाश्यते।

भारतीयदर्शनस्य प्रमुखसिद्धान्तानधिकृत्य प्रवृत्तोऽयं ग्रन्थः जिज्ञासूनां पाठकानाञ्च कृते नितान्तं ज्ञानवर्द्धकेः संशयोच्छेदकश्च भविष्यतीति मे द्रढीयान् विश्वासः। ग्रन्थसम्पादकेभ्यो भूरिशः वर्द्धापनानि शुभकामनाश्च।

– **प्रो. मुरलीमनोहरपाठकः**
कुलपतिः
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः,
नवदेहली

# Editorial

It is with great pleasure that we present this comprehensive compilation of research papers presented at the National Seminar on "Vada" organized by Darshana Shastra Peeth, Sri Lal Bahadur Shastri National Sanskrit University, New Delhi, from 9th to 11th March 2022. This seminal event brought together esteemed professors, research scholars, and teaching faculty from across the nation to delve into the intricacies of Vada, a fundamental concept in Indian philosophy.

Over the course of three enriching days, participants engaged in rigorous discussions, debates, and presentations, shedding light on various facets of Vada. The seminar served as a vibrant platform for scholars to share their research findings, exchange ideas, and foster collaborations. The papers presented were meticulously crafted, offering novel insights and perspectives that will undoubtedly contribute to further research, societal growth, and intellectual discourse.

This book is a testament to the seminar's success, featuring a curated collection of research papers that showcase the depth and diversity of Vada studies. The contributions are a reflection of the scholars' dedication to advancing knowledge and understanding in this vital area of Indian philosophical thought.

We also acknowledge the tireless efforts of the organizing committee, faculty members, and staff of Darshana Shastra Peeth, whose collective endeavors ensured the smooth execution of the seminar. Their commitment to promoting academic excellence and fostering a culture of research is truly commendable.

This publication would not have been possible without the active participation and contributions of the scholars who presented their research papers. We appreciate their enthusiasm, expertise, and willingness to share their knowledge with the academic community.

As we share this compilation with the world, we hope that it will serve as a valuable resource for researchers, scholars, and students, inspiring further exploration and debate on the concept of Vada. May this book contribute to the advancement of knowledge, promoting a deeper understanding of Indian philosophy and its significance in contemporary society.

We proudly present this collection of research papers, celebrating the spirit of academic inquiry and collaboration that defined the National Seminar on Vada. May it illuminate the path for future scholarship and intellectual pursuits.

We extend our heartfelt gratitude to Prof. Muralimanohar Pathak, Vice Chancellor, Sri Lal Bahadur Shastri National Sanskrit University, for his unwavering support and guidance. His vision and leadership played a pivotal role in making this seminar a resounding success.

**- Prof. A.S.Aravamudan**
Dean, Darshana Shastra Peeth
Sri Lal Bahadur Shastri National Sanskrit University
New Delhi

# प्रास्ताविकम्

जनमानसे भारतीयसंस्कृतेः सभ्यतायाश्च मूलाधारः वेदाः सन्ति, यतो हि वेदानामक्षुण्णा विचारधारा एव भारतीयसंस्कृतौ नित्यं निरन्तरं च प्रवाहिता भवति। वेदानां व्यापकप्रभावादेव नैकै आक्रमणैः सद्भिरपि अद्यतनमपि भारतीयसंस्कृतिः अबाधगत्या पूर्ववत् प्रचलत्येव। वेदानामनुशीलनेन प्राणिनः लौकिकं पारलौकिकं वा अभ्युदयं सम्पादयन्तः स्वं स्वं जीवनं समुन्नतशीलं विधातुं शक्नुवन्ति। मानवजीवने ये ये विभिन्नाः प्रसङ्गाः समुपतिष्ठन्ते, तेषां समेषां मार्गप्रदर्शनस्य क्षमता वैदिकविचारधाराया महत्त्वपूर्णं वैशिष्ट्यं विद्यते। अतएव एतादृशानां सर्वकल्याणकारिणां सार्वभौमसन्देह-वाहकानां वेदानामुपबृंहणार्थं पुराणानामितिहासस्य च प्रणयनमजायत। यथा-

**इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्।**
**बिभेत्यल्पश्रुताद् वेदो मामग्रं प्रहरिष्यति।।**[1]

भारतीयविचारकेषु चिन्तनस्य पुराकालीनपरम्परा अनादिर्वर्तते। अस्माकम् अनुसन्धानमतिः ऋषिकुलेषु दीर्घकालपर्यन्तं ज्ञानस्य उपासनां कुर्वन् यत् तथ्यम् अनुभवं वा गृहीतवती तस्य संग्रह एव दर्शनशास्त्रेषु परिलक्ष्यते। एते ऋषयः आत्मदर्शिनः तत्त्वदर्शिनश्चासन्। भारतीयदर्शनं हि अतीव पुरातनं व्यापकं मौलिकञ्च शास्त्रं वर्तते। इदं खलु तत्त्वज्ञानम्, अध्यात्मविद्या, आन्वीक्षिकी, ब्रह्मविद्या, सम्यग्दर्शनमित्यादिभिः विविधैरभि-धानैरभिधीयते परं सर्वेष्वप्येतेषु अस्य गाम्भीर्यं वैशिष्ट्यञ्च अविच्छिन्नतया संसूचितमित्यत्र नास्ति संशीतिलेशः।

दर्शनशब्दस्य सामान्यार्थः सम्यग्दर्शनमिति। दृशिर्प्रेक्षणे धातोः करणार्थे ल्युट्प्रत्यये कृते सति दर्शनशब्दः निष्पद्यते। दर्शनशब्दस्य व्युत्पत्तिः द्विधा

---

1. महाभारतम्, आदिपर्व, 1/67

भवति, दृश्यतेऽनेन इति दर्शनम् अर्थात् येन दृश्यते। तथा च दृश्यते यत् तत् दर्शनम् अर्थात् यस्य दर्शनं साक्षात्कारं वा भवति। श्रीमद्भगवद्गीतायां श्रीकृष्णः स्वव्यापकविभूतीनां वर्णनावसरे समस्तविद्यासु सर्वश्रेष्ठविद्या-मध्यात्मविद्याम् उवाच-

**अध्यात्मविद्या विद्यानां वादः प्रवदतामहम्।**[2]

भारतीयदर्शने कति दर्शनानि सन्तीत्यस्मिन् विषये दार्शनिकेषु विषमता दृश्यते। यद्यपि पञ्चशिखाचार्येण 'एकमेव दर्शनं ख्यातिरेव दर्शनम्' इत्युक्तं तथापि साम्प्रतमेतेषां संख्या षट्त्रिंशत् यावत् प्रापिता विद्वभिः। कौटिल्य-मतानुसारेण साङ्ख्ययोगलोकायतञ्चेति त्रीणि गृहीतानि। शिवमहिम्नस्तोत्रे पुष्पदन्ताचार्येण साङ्ख्यं योगः पाशुपतमतं वैष्णवञ्चेति चत्वारि दर्शनानि।[3] मल्लिनाथसूनुना पाणिनिजैमिनिव्यासकपिलाक्षपादकणादारिति षडङ्गीकृताः। राजशेखरानुसारेण चार्वाकस्तु न दर्शनम् अतः पञ्चैव दर्शनमितिख्यातम्। जैनविद्वान् हरिभद्रसूरिः षड्दर्शनसमुच्चयनामकग्रन्थे षड्दर्शनानां वर्णनमकरोत्। तत्र बौद्ध-न्याय-साङ्ख्य-जैन-वैशेषिक-मीमांसेति दर्शनानां गणना लभ्यते।[5] सर्वमतसङ्ग्रहकारेण मीमांसा-साङ्ख्य-तर्क-बौद्ध-आर्हत-लोकायतेति षट्। जयन्तभट्टमतानुसारेण मीमांसान्याय-वैशेषिकसाङ्ख्यार्हतबौद्धचार्वाका इति सप्तदर्शनानि अभिमतानि।[6] मधुसूदनसरस्वतीभिः न्याय-वैशेषिक-कर्ममीमांसा-शारीरक-पातञ्जल-पाञ्चरात्र-पाशुपत-बौद्ध-दिगम्बरचार्वाक-साङ्ख्यौपनिषदिति द्वादशदर्शनानि विवेचितानि।[7] श्रीयज्ञेश्वरकृत् आर्यविद्यासुधाकरग्रन्थे द्वादश-दर्शनानां वर्णनं प्राप्यते तत्र चार्वाक-माध्यमिक-योगाचार-सौत्रान्तिक-वैभाषिक-जैन-न्याय-वैशेषिक-साङ्ख्य-सेश्वरसाङ्ख्यभूत-योगशास्त्र। धर्ममीमांसा

2. गीता, 10/32
3. शिवमहिम्नस्तोत्रम्, 7
4. जैनं साङ्ख्यं जामिनीयं योगं वैशेषिकं तथा।
   सौगतं दर्शनान्येवं नास्तिकं तु न दर्शनम्।। षड्दर्शनसमुच्चयः, 4
5. षड्दर्शनसमुच्चयः, 2
6. न्यायमञ्जरी, प्रथमोऽध्यायः
7. प्रस्थानभेदः

ब्रह्ममीमांसा इति द्वादशदर्शनानि विवेचितानि।[8] आचार्यशङ्करप्रणीते सर्वसिद्धान्त-सङ्ग्रहनामकग्रन्थे लोकायतिक-जैन-माध्यमिक-योगाचार-सौत्रान्तिक-वैभाषिक-वैशेषिक-नैयायिक-प्रभाकर-भाट्ट-साङ्ख्य-पतञ्जलि-वेदव्यास-वेदान्तानां चतुर्दशदर्शनानां नामानि उपलभ्यन्ते।[9] सर्वदर्शनसङ्ग्रहे माधवाचार्येण चार्वाक-बौद्ध-जैन-रामानुज-पूर्णप्रज्ञ-नकुलीशपाशुपत-शैव-प्रत्यभिज्ञा-रसेश्वरौलूक्याक्षपाद-जैमिनि-पाणिनि-साङ्ख्यपातञ्जल-शाङ्करमिति षोडश-दर्शनानि संगृहीतानि।

भारतीयदर्शनस्य विभाजनं महत्कठिनं वर्तते, तत्र किमपि दर्शनं समग्रसिद्धान्तेन स्पष्टतया आस्तिकं नास्तिकं वा न सिध्यति। भारतीयदर्शने प्रधानतया चार्वाक-जैन-बौद्ध-साङ्ख्य-योग-न्याय-वैशेषिक-मीमांसा-वेदान्तानां दर्शनानाम् एव विभाजनं दृश्यते। भारतीयदर्शनानां विभाजनं मुख्यरूपेण आस्तिकनास्तिकवर्गयोः भवति, तत्र विभाजनस्य प्रक्रिया एवं भवति। यथा-

**वेदाभिमतदृष्ट्या-** भारतीयदर्शनानां विभाजनं मुख्यरूपेण आस्तिक-नास्तिकदृष्ट्या भवति। तत्र यद्दर्शनं वेदस्य प्रामाण्यं स्वीकरोति तदेवास्तिकम् एवम् अन्यन्तु नास्तिकम्। तत्र आस्तिकवर्गे न्याय-वैशेषिक-साङ्ख्य-योग-मीमांसा-वेदान्तदर्शानानाञ्च गणना भवति। नास्तिके च चार्वाक-जैन-बौद्धदर्शानानाञ्च गणना इति। आस्तिकदर्शनेषु ये साक्षात् वेदाधारिते ते मीमांसा-वेदान्ते वर्तेते। नवीनविचारधारायाम् अन्यानि साङ्ख्य-योग-न्याय-वैशेषिकानि आगमिष्यन्ति।

**ईश्वराभिमतदृष्ट्या-** यदि ईश्वरानुसारेण आस्तिकनास्तिकयोः विभाजनं भवति तर्हि न्याय-वैशेषिक-वेदान्त-योगदर्शनानां गणना आस्तिके भवति। अत्र साङ्ख्यमीमांसादर्शनयोः गणना नास्ति, यतोहि साङ्ख्य-

8. अवैदिकप्रमाणानां सिद्धान्तानां प्रदर्शकाः।
   चार्वाकाद्याः षड्विधास्ते ख्याता लोकेषु नास्तिकाः।।
   वेदप्रमाणकानीह प्रोचुर्ये दर्शनानि षट्।
   न्यायवैशेषिकादीनि स्मृतास्ते आस्तिकाभिधाः।। आर्यविद्यासुधाकरः
9. सर्वसिद्धान्तसङ्ग्रहः, उपोद्घातप्रकरणम्

मीमांसादर्शनयोः ईश्वरस्य शब्दशः मान्यता न अवलोक्यते अतः साङ्ख्यमीमांसादर्शने अनीश्वरवादिनी वर्तेते, एवं केचन दार्शनिकाः मन्यन्ते। साङ्ख्यदर्शनं तु भगवदन्यतमावतारेण महर्षिणा कपिलेन वेदमाधृत्यैव प्रवर्तितमिति तस्यापि निर्विचिकित्सितमास्तिकदर्शनत्वम्। 'ईश्वरासिद्धेः' इति साङ्ख्यसूत्रेणेश्वरप्रत्याख्यानं तु गुणत्रयसाम्यावस्थारूपया प्रकृत्यैव प्रपञ्चोत्पत्तिनिष्पत्तौ न तदर्थमीश्वरस्यावश्यकतेत्यभिप्रायकम्। अतएवोक्तं विज्ञानभिक्षुणा साङ्ख्यप्रवचनभाष्ये 'साङ्ख्यशास्त्रस्य पुरुषार्थतत्साधन-प्रकृतिपुरुषविवेकौ एव मुख्यो विषय इतीश्वरप्रतिषेधांशबाधेऽपि नाप्रामाण्यम्, यत्परः स शब्दार्थौ इति न्यायात्। अन्यथा ईश्वराभावात् इत्येवोच्येत।' अन्यानि प्रायशः अनीश्वरवादिदर्शनानि चार्वाक-जैन-बौद्धानि सन्ति।

**पुनर्जन्माभिमतदृष्ट्या**- भारतीयदर्शने पूर्वजन्मनः अन्या एव विशेषता वर्तते। तत्र पूर्वजन्मनः मान्यता कर्म आधारिता वर्तते। यतः मनुष्यः शरीरधारणं करोति ततः तस्य सांसारिकावागमनक्रिया प्रारभ्यते। सः स्वजीवने याः याः क्रियाः करोति ताः तस्य पूनर्जन्मनः कारणमुत्पादयन्ति। परन्तु अत्र तस्य प्रथमजन्मनः कारणं किम्? अस्य किमपि कारणं न वर्तते। भारतीयदर्शनेषु चार्वाकदर्शनविहितत्वम् अन्यत्सर्वं दर्शनं पूर्वजन्ममान्यतां स्वीकरोति।

**परलोकाभिमतदृष्ट्या**- भारतीयदर्शने परलोकाद्यन्यमतान्यपि प्राप्यते। यथा- अस्ति परलोकादिकमिति मतिर्यस्य तद् आस्तिकं, नास्ति परलोकादिकमिति मतिर्यस्य तन्नास्तिकमिति व्युत्पत्त्या 'अस्ति नास्ति दिष्टं मतिः'[10] इति पाणिनिसूत्रेण ठक्प्रत्यये विहिते सति सिध्यतौ आस्तिक-नास्तिकशब्दौ।

भारतीयदर्शनेषु यदि वेदमान्यतानुसारम् आस्तिकनास्तिकदर्शनस्य विभाजनं भविष्यति तर्हि चार्वाक-जैन-बौद्धदर्शनानि विहाय अन्यानि दर्शनानि आस्तिकानीति। परन्तु यदि ईश्वराभिमतानुसारेण आस्तिकनास्तिकदर्शनानां विभाजनं भविष्यति तर्हि चार्वाक-जैन-बौद्धदर्शनैः सह साङ्ख्यमीमांसयोरपि

10. अष्टाध्यायी, 4/4/60

गणना नास्तिकदर्शने भविष्यति। अन्यानि सर्वाणि दर्शनानि तु आस्तिके आगमिष्यन्ति। यदि पूर्वजन्मविचारणानुसारेण आस्तिकनास्तिकविभाजनं भविष्यति तर्हि चार्वाकदर्शनं विहाय अन्यानि दर्शनानि आस्तिके आगमिष्यन्ति। अतः निष्कर्षरूपेण वक्तुं शक्नुमः यत् सर्वसिद्धान्तेन किमपि दर्शनं पूर्णरूपेण आस्तिकं नास्तिकं वा नेति भविष्यति। सैद्धान्तिक-दृष्ट्या नास्तिकदर्शनानि अनीश्वरवादिनः प्रत्यक्षवादिनः वा अवान्तरनाम्ना अभिधीयन्ते।

एतेषु सर्वेषु दर्शनेषु भिन्न-भिन्नमतया नैकाः सिद्धान्ताः प्रसिद्धाः सन्ति, ते सिद्धान्ता एव वादनाम्नाभिधीयन्ते। तान्सिद्धान्तान्नधिकृत्य विद्वभिः शोधच्छात्रैश्च भिन्न-भिन्नदृष्ट्या शोधपत्राणि लिखितानि सन्ति, तानि सङ्कलय्य 'भारतीयदर्शनेषु वादविमर्शः' इति ग्रन्थरूपेण प्रकाश्यते। अयं ग्रन्थः जिज्ञासूनां पाठकानाञ्च नितान्तं संशयोच्छेदको भविष्यतीति आशास्महे।

**-डॉ. विजयगुप्ता**

सहायकाचार्यः, सर्वदर्शनविभागः

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः,

नवदेहली

# विषयानुक्रमणिका

| विषयाः | | पृ.सं. |
|---|---|---|
| प्ररोचना | | iii |
| Editorial | | v |
| प्रास्ताविकम् | | vii |
| 1. | जैनदर्शने स्याद्वादमीमांसा<br>–आचार्यवीरसागरो जैनः | 1 |
| 2. | अर्हद्दर्शने अनेकान्तस्याद्वादौ<br>–प्रो. कुलदीपकुमारः | 6 |
| 3. | वेदान्तदृष्ट्या सत्कार्यवादविचारः<br>–कुलदीपचन्द्रः | 12 |
| 4. | न्याय-द्वैतमतयोः प्रामाण्यविमर्शः<br>–अनुराग जि रायचूर् | 17 |
| 5. | शाङ्करदर्शने आभासवादः<br>–मानसकुमारबेहेरा | 22 |
| 6. | न्यायनये कारणतावादविमर्शः<br>–शान्तनुदासः | 27 |
| 7. | न्यायनये सिद्धान्तवादविमर्शः<br>–दीपकमण्डलः | 32 |
| 8. | शक्तिवादः –कृतिसिंघलः | 39 |

9. **मनसः अणुत्ववादः** 43
–आरएस्मोनालिसाकविः

10. **अद्वैतवेदान्तदर्शने अवच्छेदवादविमर्शः** 50
–अनुपमण्डलः

11. **भारतीयदर्शनेषु सविशेषाद्वैतवादस्य समीक्षणम्** 59
–रुद्रनारायणदासः

12. **न्यायभाष्यवृत्तिदिशा प्रयोजनवादविमर्शः** 65
–सुमनकल्यानसामन्तः

13. **द्वैत-न्यायमतरीत्या वादविमर्शः** 72
–श्रीनिधिः वि.

14. **न्यायाभिमतान्यथाख्यातिवादः** 78
–मिन्टु दे

15. **न्यायनये प्रमाणतत्त्वनिर्वचनम्** 85
– जगत् ज्योति पात्रः

16. **स्फोटवादविमर्शः** 99
–सुषमा

17. **वैशेषिकदर्शने गुणवादविमर्शः** 107
–गीताराणी महाण्र्णा

18. **अद्वैतवेदान्ते मायावादविमर्शः** 116
– अल्का

19. **न्यायमतानुसारं वादविवेचनम्** 123
–यस्. अभिख्या

20. **भामतीप्रस्थानानुसारं ख्यातिवादविमर्शः** 130
–विश्वजित् तरफदारः

21. **जैनदर्शने स्याद्वादः** 139
–पारसजैनः

22. **न्यायशास्त्रे वितण्डावादः** 149
–कमलाकान्तमिस्त्री

23. **न्यायवैशेषिकदर्शने पदार्थवादविमर्शः** 155
–लिपिपात्रः

24. **प्रमाणचतुष्टयवादः** 166
–केशवकिशोरः

25. **न्यायदर्शने आत्मवादविमर्शः** 173
–मञ्जुलताजेना

26. **कठोपनिषदः श्रेयप्रेयोमार्गविवेचनम्** 177
–पूनम

27. **जैनदर्शने नयवादः** 180
–प्रशान्तजैनः

28. **वैशेषिकदर्शनदृष्ट्या परमाणुवादविमर्शः** 192
–सुमनकुमारझा

29. **सिद्धान्तबिन्दुवेदान्तपरिभाषयोः प्रमालक्षणस्वरूपे वैषम्यम्** 195
–जूही गर्ग

30. **श्रीमधुसूदनसरस्वतीमते द्वैताद्वैतवादविमर्शः** 203
–सौरभपन्तः

31. **सांख्यदर्शने सत्कार्यवादविमर्शः** 209
–पलाशदासः

32. **ब्रह्मसूत्रभाष्यादिषु आभासवादविमर्शः** 215
–सत्येश्वरजाना

33. **न्यायवैशेषिकनये गुणतत्त्वनिर्वचनम्** 220
–गीताञ्जलि देइ

34. **न्यायनये वादजल्पादिकथास्वरूपविवेचनम्** 234
–रतनचन्द्रसरकारः

35. **स्त्रीवादः** –हेमचन्द्र उप्रेती 242

36. **परमाणुकारणवादः** 249
–ज्योतिकुमारी

37. **विवर्तवाद** – डॉ. आशीष यादव 259

38. **जैन तथा बौद्ध दर्शन में अहिंसावाद चिन्तन** 272
– अंकिता जायसवाल

❐❐❐

# जैनदर्शने स्याद्वादमीमांसा

-आचार्यवीरसागरो जैनः

'स्याद्वादः' इत्ययमस्ति जैनदर्शनस्यैकः प्रमुखः सिद्धान्तः। न केवलं प्रमुखः सिद्धान्तः, अपितु प्राणभूतः सिद्धान्तो वर्तते। सुप्रसिद्धजैनाचार्याः आचार्यामृतचन्द्रसूरिमहोदयाः पुरुषार्थसिद्ध्युपायनामके ग्रन्थे लिखन्ति-

**परमागमस्य जीवं निषिद्धजात्यन्धसिन्धुरविधानम्।**
**सकलनयविलसितानां विरोधमथनं नमाम्यनेकान्तम्।।**[1]

अर्थात् स्याद्वादः जैनदर्शनस्य जैनागमस्य वा जीवभूतः प्राणभूतः सिद्धान्तः अस्ति। यथा प्राणान् विना सर्वे एव मृतका इति कथ्यन्ते तथैव स्याद्वादं विना जैनागमः जैनदर्शनं वा मृतं शून्यं वावतिष्ठति। स्याद्वादस्य महत्त्वं परिलक्ष्य जैनदर्शनस्य अपरं नाम स्याद्वाददर्शनमपि संसूचितं यत्र-तत्र। जैना अपि अतएव 'स्याद्वादिनः' इति पदेन सम्बोध्यन्ते। एतेन ज्ञातुं शक्यते यत् जैनदर्शने स्याद्वादस्य कीदृशं महत्त्वमङ्गीकृतं वर्तते। उच्यतेऽपि-

**स्याद्वादो विद्यते यत्र पक्षपातो न विद्यते।**
**अहिंसायाः प्रधानत्वं जैनधर्मः स उच्यते।।**[2]

तात्पर्यमिदं यत् यथा अहिंसा जैनदर्शनस्य एकः प्रमुखः सिद्धान्तः वर्तते तथैव स्याद्वादोऽपि जैनदर्शनस्य एकः प्रमुखः प्राणभूतः सिद्धान्तः विद्यते, स्याद्वादं विना जैनदर्शनस्य सर्वं चिन्तनं मिथ्या भवति।

जैनदर्शनस्य प्रायशः सर्वेषु ग्रन्थेषु एव अस्य सिद्धान्तस्य व्याख्यानं कृतं वर्तते, तथापि स्वतन्त्ररूपेणापि नैके ग्रन्थाः प्रणीताः सन्ति। तेषामध्ययनेन

---

* आचार्यः, जैनदर्शनविभागः, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः, नवदेहली-110016

1. पुरुषार्थसिद्ध्युपायः, श्लोकः 2
2. प्राकृतविद्या, दिसम्बर 2008, पृष्ठ संख्या 20

स्याद्वादस्य समीचीनं ज्ञानं पूर्णरूपेण भवितुं शक्नोति। तेषु ग्रन्थेषु केचन प्रमुखाः निम्नलिखिताः सन्ति–

1. **आप्तमीमांसा**[3] – अस्य रचयितारः सन्ति कलिकालसर्वज्ञाः आचार्यसमन्तभद्रमहोदयाः (द्वितीया शताब्दी)। अस्मिन् ग्रन्थे आप्तस्तुति-व्याजेन स्याद्वादसिद्धान्तस्य सुन्दरं विवेचनं प्रस्तुतमस्ति। ग्रन्थस्योपरि श्रीमद्भट्टाकलंकस्य अष्टशती[4], आचार्यविद्यानन्दमहोदयस्य च अष्टसहस्री[5] नाम्नी टीके विलसतः। तयोरपि अध्ययनं स्याद्वादपरिज्ञानाय करणीयमेव।

2. **सन्मतिसूत्रम्**[6] – अस्य रचना आचार्यसिद्धसेनमहोदयैः प्राकृतभाषायां गाहाछन्दसि विहिता। ग्रन्थेऽस्मिन् त्रयः अधिकाराः सन्ति। तेषु एकस्याभिधानं अनेकान्तकाण्डम् (अणेगंतकंडं) इति वर्तते।

3. **स्वयंभूस्तोत्रम्**[7] – अस्यापि रचना समन्तभद्राचार्यैरेव विहिता। अस्मिन् ग्रन्थे चतुर्विंशति- तीर्थंकराणां स्तुतिव्याजेन स्याद्वादसिद्धान्तस्य यत्र-तत्र सुन्दरं विवेचनमुपलभ्यते।

4. **स्याद्वादमंजरी**[8] – आचार्यहेमचन्द्रसूरिमहोदयानां 'अन्ययोगव्य-वच्छेदिका' नामके ग्रन्थे टीकारूपेण लिखितोऽयं ग्रन्थराजः। अस्य रचयितारः सन्ति श्रीमल्लिषेणसूरिमहोदयाः। अस्य ग्रन्थस्याध्ययनं स्याद्वाद- परिज्ञानाय भूयो भूयः प्रशस्यते।

अथ जैनदर्शनानुसारं स्याद्वादस्य स्वरूपं संक्षेपेण विचार्यते। 'स्याद्वाद' इत्यत्र पदद्वयं वर्तते– 'स्यात्' + 'वाद' इति। वदनं वादः तु प्रसिद्ध एव। अतः स्याद्वादस्य अभिप्रायो भवति– 'स्यात्' पदेन वदनं कथनं वा स्याद्वादः।

---

3. प्रकाशकः– गणेशवर्णीशोधसंस्थानं, वाराणसी
4. प्रकाशकः– भारतीयजैनसिद्धान्तप्रकाशिनी संस्था, काशी
5. प्रकाशकः– जैनविद्यासंस्थानम्, श्रीमहावीरजी, जयपुरम्
6. प्रकाशकः– भारतीयज्ञानपीठं, नवदेहली
7. प्रकाशकः– गणेशवर्णीशोधसंस्थानं, वाराणसी
8. प्रकाशकः– श्रीमद्राजचन्द्राश्रमः, अगासः, गुजरातराज्ये

अत्रैकं विशिष्टं तथ्यं सावधानतया ज्ञातव्यमस्ति यत् संस्कृतव्याकरणे 'स्यात्' पदस्य प्रयोगः प्रकारद्वयेन भवति विधिलिङ्गलकारे निपातरूपे च, किन्तु अत्र 'स्यात्' पदस्य प्रयोगो निपातरूपेण अस्ति, न तु विधिलिङ्ग-लकाररूपेण। निपातरूपेण प्रयुक्तस्य 'स्यात्' पदस्यार्थो भवति- कथंचित्, कयाप्यपेक्षया इति। तात्पर्यमिदं यत् स्याद्वादसिद्धान्तानुसारेण अस्माभिः सर्वत्र एकस्य 'स्यात्' पदस्य प्रयोगो अनिवार्यरूपेण करणीयः। प्रत्येकं कथनं एकापेक्षयैव समीचीनं भवति, न तु सर्वापेक्षया। यथा- 'अहं पुत्रोऽस्मि' इत्यत्र अहं मातृपित्र्यपेक्षया एव पुत्रोऽस्मि न सर्वेषामपेक्षया।

जैनदर्शनानुसारं प्रत्येकं वस्तु अनेकान्तात्मकमस्ति। अनेकान्तात्मकम् अर्थात् अनन्तधर्मात्मकम् अस्ति, तस्मिन् अनेके अनन्ताः वा धर्माः गुणा वा विलसन्ति। सर्वेषां कथनं युगपद्, पूर्णरूपेणाशक्यमेव, अतः स्याद्वादी वक्ता तस्य कथनं क्रमेण करोति, एकं धर्मं प्रधानीकृत्य अन्यान् धर्मान् च गौणीकृत्य किमपि वदति। अयमेव स्याद्वादः।

लघीयस्त्रयग्रन्थे स्याद्वादस्य परिभाषा इत्थमुपलभ्यते-'अनेकान्तात्मकार्थ-कथनं स्याद्वादः'[9] अर्थात् अनेकान्तात्मकस्य अर्थस्य पदार्थस्य वा कथनं कथनपद्धतिः वा 'स्याद्वादः' इत्युच्यते।

जैनदर्शनानुसारं प्रत्येकं वस्तु वस्तुतः अनन्तधर्मात्मकत्वात् अवाग्गोचर-मस्ति, तस्य प्रतिपादनं वचनैः कर्तुं नैव शक्यम्। अतः स्याद्वादस्याश्रयः ग्रहणीयः एव। यथा- कोऽपि पृच्छति आम्रफलं कीदृशमस्ति, तर्हि एकपदेन समीचीनमुत्तरं नैव दातुं शक्यते, क्रमेणैव किमपि वक्तुं शक्यते, किन्तु तथापि पूर्णस्वरूपप्रतिपादनमसंभवमेव। क्रमोऽपि वर्णने भवति, वस्तुस्वरूपे तु क्रमः नास्ति। सर्वे गुणाः युगपद्रूपेण वसन्ति।

जैनाचार्याः कथयन्ति यत् यद्यपि वयं वदामः यत् काकः कृष्णः भवति, तथापि वस्तुतः काकः तु काकात्मक एव, न तु कृष्णात्मकः।

यदि सर्वथा कृष्णात्मकः तर्हि तस्य रुधिरादीनामपि कृष्णतापत्तिः भवति।[10] काकः पक्षापेक्षया कृष्णः, रुधिरापेक्षया रक्तः, अस्थि-अपेक्षया

---

9. श्रीमद्भट्टाकलंक, लघीयस्त्रये
10. धवला 1/1/2, जयधवल 1/206

श्वेतः, शिराणामपेक्षया नीलः, पित्तापेक्षया पीतः। एवम्प्रकारेण काकः वस्तुतः पञ्चवर्णात्मकः भवति। अयमेव स्याद्वादः। काकः सर्वथा कृष्ण एव इति तु एकान्तवादः। जैनागमेषु स्याद्वादपरिज्ञानाय एकः सुन्दरः दृष्टान्तः प्रदत्तः।[11] यथा–

एकस्मिन् नगरे षड् नराः जन्मान्धाः आसन्। तस्मिन् नगरे एकदा एकः गजः आगच्छति। सर्वे नागरिकाः कौतूहलेन गजदर्शनाय गतवन्तः। तदा ते जन्मान्धाः नराः अपि गजदर्शनाय गच्छन्ति स्वहस्तस्पर्शद्वारा च गजं जानन्ति। किन्तु गृहप्रत्यावर्तनकाले तेषु कलहो जातः। एकः कथयति– गजः स्तम्भसदृशः भवति, द्वितीयः कथयति– गजः रज्जुसदृशः भवति। तृतीयः कथयति– गजः शूर्पसदृशो भवति। चतुर्थः कथयति– गजः भित्तिसदृशः भवति। पंचमः कथयति– गजः भल्लसदृशो भवति। षष्ठः कथयति– गजः कदलीस्कन्धसदृशो भवति। तदा एकः चक्षुष्मान् नरः कथयति– भो सूरदासाः! कथं कलहं कुर्वन्ति भवन्तः? नास्ति तत्र कलहस्य किमपि कारणम्। भवन्तः सर्वे एव अपेक्षाभेदेन समीचीना एव। अत्र भवद्भिः 'स्यात्' पदस्य प्रयोगः करणीयः अथवा एवं प्रकारेण वक्तव्यं यत्–

1. हस्ती पादापेक्षया स्तम्भसदृशः भवति।
2. हस्ती पुच्छापेक्षया रज्जुसदृशः भवति।
3. हस्ती कर्णापेक्षया शूर्पसदृशः भवति।
4. हस्ती उदरापेक्षया भित्तिलसदृशः भवति।
5. हस्ती दन्तापेक्षया भल्लसदृशो भवति।
6. हस्ती सुंडापेक्षया कदलीस्कन्धसदृशो भवति।

एवं प्रकारेण स्याद्वादेन कलहविनाशो भवति समुचितसमन्वस्य भावना च विकसति। स्याद्वादः वस्तुतः कस्यापि खण्डनं नैव करोति अपितु तस्य समीचीनामपेक्षां प्रकाश्य समन्वयं करोति। यथा सांख्याः कथयन्ति– वस्तु सर्वथा नित्यमस्ति, बौद्धाश्च कथयन्ति–वस्तु सर्वथा

11. पुरुषार्थसिद्ध्युपायः, श्लोकः 2

अनित्यमस्ति, किन्तु जैनाः कथयन्ति- द्रव्यापेक्षया वस्तु नित्यमस्ति पर्यायापेक्षा चानित्यमस्ति इति।

एवम्प्रकारेण वयं पश्यामः दार्शनिकदृष्ट्या तु स्याद्वादसिद्धान्तस्या-साधारणं महत्त्वं वर्तत एव, व्यावहारिकदृष्ट्याऽपि तस्य विशिष्टं महत्त्वं विलसति। स्याद्वादं विना लोकव्यवहारोऽपि नैव चलितुं शक्यते। तदेवोक्त-माचार्यसिद्धसेनमहोदयैः-

**जेण विणा वि लोगस्स वि ववहारो सव्वहा ण णिव्वहई।**
**तस्स भुवणेक्कगुरुणो णमो अणेगंतवादस्स॥**[12]

❒❒❒

12. आचार्यसिद्धसेनप्रणीतं सन्मतिसूत्रम्

# अर्हद्दर्शने अनेकान्तस्याद्वादौ

-प्रो. कुलदीपकुमारः*

**भवबीजाङ्कुरजनना रागाद्या क्षयमुपगताः यस्य।**
**ब्रह्मा वा विष्णुर्वा हरो जिनो वा नमस्तस्मै।।**[1]

**भूमिका-**

भारतीयवाङ्मये जैनदर्शनम् एकं प्राचीनदर्शनं विद्यते। अस्य दर्शनस्य अनेकानि पुरातनानि नामानि राजन्ते। यथा अर्हद्दर्शनं, निर्ग्रन्थदर्शनम्, अहिंसादर्शनं, स्याद्वाददर्शनम्, अनेकान्तदर्शनं चेत्यादीनि।

येन प्रकारेण विभिन्नदर्शनानां प्रवर्तकाः ऋषिमहर्षय अभवन्, तेन प्रकारेण जैनदर्शनस्य प्रवर्तकः कोऽपि व्यक्तिविशेषः नास्ति। जैनशब्दः 'जिन' शब्दात् निष्पन्नोऽस्ति। जिनशब्दश्च संस्कृतभाषायाः 'जि' धातो 'नक्' प्रत्यये सति निष्पन्नः। जिनशब्दस्यार्थो वर्तते यो जनः **'अनेकभवगहन-विषयव्यसनप्रापणहेतून् कर्मारातीन् जयतीति जिनः।'**[2]

एतादृशैः जिनैः उपदिष्टदर्शनं जैनदर्शनमिति उच्यते। प्रत्येकं युगे चतुर्विंशतितीर्थङ्कराः भवन्ति, तथा ते अनादिकालात् प्रचलत् धर्मदर्शनञ्च प्रतिपादयन्ति। वर्तमानयुगे ऋषभदेवादारभ्य महावीरपर्यन्तं चतुर्विंशतितीर्थङ्करैः जैनधर्मदर्शनयोः सिद्धान्तः प्रतिपादितः।

तदन्तरम् अनेके जैनदर्शनमर्मज्ञा आचार्या अभवन्। तेषाम् आचार्याणां न केवलं जैनदर्शने अपितु सम्पूर्णभारतीयवाङ्मये महत्त्वपूर्णं स्थानं विद्यते।

---

* आचार्यः, जैनदर्शनविभागः, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः, नवदेहली- 110016

1. हेमचन्द्रसूरिः, स्याद्वादमञ्जरी, प्रस्तावना, पृष्ठम्- 71
2. आचार्यामृतचन्द्रः, पञ्चास्तिकायतात्पर्यवृत्तिः, 1/4/18

सामाजिक-आर्थिक-नैतिक-पारमार्थिक-तात्त्विक-वैचारिक-सैद्धान्तिक-ज्ञानविज्ञानादिविषय-चिन्तनदृष्ट्या तेषां सर्वेषु क्षेत्रेषु विशिष्टस्थानं विद्यत एव। तत्र च यथा आचार्यैः ज्ञानविज्ञानधारायाः मार्मिकचिन्तनं कृतं तथैव आचार्यैः पदार्थतत्त्वखगोलसाहित्यकर्मसिद्धान्तात्मतत्त्वादिविषयाणां दार्शनिक-दृष्ट्या वैज्ञानिकदृष्ट्या च शोधपूर्णं चिन्तनं विश्लेषणं च कृतम्। जैनदर्शने प्रमुखाः सिद्धान्ताः सन्ति- अहिंसावादः, अपरिग्रहवादः अनेकान्तवादश्च।

**'अनेकान्तः'**इत्ययमस्ति जैनदर्शनस्यैकः प्रमुखः सिद्धान्तः। न केवलं प्रमुखः सिद्धान्तः, अपितु प्राणभूतः सिद्धान्तो वर्तते। अस्मिन् सन्दर्भे सुप्रसिद्धजैनाचार्या अमृतचन्द्रसूरिमहोदया उद्घोषयन्ति-

**परमागमस्य जीवं निषिद्धजात्यन्धसिन्धुरविधानम्।**
**सकलनयविलसितानां विरोधमथनं नमाम्यनेकान्तम्।।**[3]

अर्थात् अनेकान्तः जैनदर्शनस्य जैनागमस्य वा जीवभूतः प्राणभूतः सिद्धान्तोऽस्ति। यथा प्राणान् विना सर्वे एव मृतका इति कथ्यन्ते तथैव अनेकान्तसिद्धान्तं विना जैनागमः जैनदर्शनं वा शून्यं दृश्यते। अनेकान्तस्य महत्त्वं परिलक्ष्य जैनदर्शनस्य अपरं नाम अनेकान्तदर्शनमपि विज्ञजनाः कथयन्ति यत्र-तत्र। अनेनैव कारणेन ये जना इदं दर्शनम् अङ्गीकुर्वन्ति तेषां कृते दर्शनजगति अनेकान्तवादिन इति नाम प्रचलन्ति-

अनेनैव आचार्याः सिद्धसेनदिवाकराः कथयन्ति-

**जेण विणा लोगस्स वि ववहारो सव्वहा न निव्वडइ।**
**तस्स भुवणेक्क गुरुणो णमो अणेगंतवायस्स।।**[4]

अत्र आचार्याणाम् अभिप्रायोऽयमस्ति यत् अनेकान्तसिद्धान्तं विना सम्पूर्णलोकव्यवहारोऽपि सुचारूरूपेण न चलितुं शक्यते। तं लोकगुरुसदृशं सिद्धान्तं नमस्कारं करोमि।

---

3. आचार्यामृतचन्द्रः, पुरुषार्थसिद्ध्युपायः, श्लोकः- 02
4. आचार्यसिद्धसेनदिवाकरः, सम्मइसुत्तं, तृतीयकाण्डम्, गाथा- 69

**अनेकान्तपदस्य व्युत्पत्तिः लक्षणानि च-**

'अनेकान्तशब्दः अनेक+अन्त इति शब्दद्वयसंयोगे निष्पन्नोऽस्ति। अनेकस्यार्थोऽस्ति एकस्मादधिकम्। एकस्मादधिकं द्वावपि अनन्तोऽपि। द्वयोरनन्तानां मध्येऽनेकार्थं सम्भाव्यते। अन्तशब्दस्यार्थः धर्मः गुणो वा। यत्रानेकस्यार्थ अनन्तो भविष्यति तत्रान्तस्यार्थः गुणो ज्ञेयः। अनया व्याख्यया अनन्तगुणात्मकं वस्त्वेवानेकान्त इति। यत्रानेकस्यार्थः द्वौ इति तत्रान्तस्यार्थो धर्म इति स्यात्। तदित्थम् ज्ञेयं-परस्परं-विरुद्धप्रतीतिभूतस्य धर्मद्वयस्यैकस्मिन्नेव वस्तुनि वर्तमानमनेकान्तमस्ति।'[5]

**एकस्मिन् वस्तुनि वस्तुत्वनिष्पादकपरस्परविरुद्धशक्तिद्वय-प्रकाशनम् अनेकान्तः।**[6]

**अनेकान्तोऽप्यनेकान्तः प्रमाणनयसाधनः।**
**अनेकान्तः प्रमाणात्ते तदेकान्तोऽर्पितान्नयात्॥**[7]

अनेकान्त इति कोऽर्थ इति चेत् एकवस्तुनि वस्तुत्वनिष्पादकं- 'अस्तित्वनास्तित्वद्वयादिस्वरूपं परस्परविरुद्धसापेक्षशक्तिद्वयं यन्त्रस्य प्रतिपादने स्यादनेकान्तो भण्यते।'[8]

**'सर्वस्मिन्नपि जीवादिवस्तुनि भावाभावरूपत्वमेकानेकरूपत्वं नित्यानित्यरूपत्वमित्येवमादिकमनेकान्तात्मकत्वम्।'**[9]

'सद्सन्नित्यानित्यादिसर्वथैकान्तप्रतिक्षेपलक्षणोऽनेकान्तः।'

एतेषां सर्वेषां लक्षणानां भावोऽयं वर्तते- यत् प्रमाणनयैश्च यत् वस्तुन अर्थस्य अधिगम भवति स अनेकधर्मात्मको वर्तते। तेषु धर्मेषु परस्परविरोधिधर्माणामपि सद्भाव अस्त्येव। यथा- सत् असत् च अस्तित्वं नास्तित्वञ्च। ते परस्परविरोधिधर्मा एकस्मिन्नेव समये वस्तुना सह वस्तुनि

---

5. आचार्यामृतचन्द्रः, समयसारात्मख्यातिटीका, परिशिष्टम्, दशमसंस्करणम्, 1995
6. डॉ. हुकमचन्द्रभारिल्लः, अनेकान्तस्याद्वादश्च, पृष्ठ- 05,06
7. आचार्यसमन्तभद्रः, स्वयम्भूस्तोत्रम्, कारिका- 103
8. आचार्यजयसेनः, समयसारटीका, गाथा- 145
9. अभिनवधर्मभूषणयतिः, न्यायदीपिका, पृष्ठ- 95

विद्यमानाः भवन्ति। अयमेव अस्ति जैनाचार्यगणाम् अनेकान्तसिद्धान्तः।[10]

अत्र प्रश्नोऽयमुदेति यत् अनेकधर्मात्मकवस्तुनि विद्यमानानां सर्वेषां धर्माणां कथनं कथं सम्भवेत्। अस्य प्रश्नस्य समाधानस्य कृते जैनाचार्यैः एका विशिष्टा शैली निर्मिता तस्याः शैल्या अभिधानं वर्तते– स्याद्वादः। अभिः शैल्या वस्तुन एकस्य धर्मस्य कथनमपि भवति तथा अन्यधर्माणाम् अस्तित्वस्य निषेधोऽपि न भवति। अस्मिन् सन्दर्भे आचार्याः लिखन्ति–

**'अनेकान्तात्मकार्थकथनं स्याद्वादः।'**[11]

स्यात् पदेन वदनं स्याद्वादः। 'स्याद्वाद' इत्यत्र पदद्वयं विराजते– 'स्यात्"वाद' इति। वदनं वादः तु सर्वत्र प्रसिद्ध एव। नास्ति शंकायाः स्थानम्। अतः जैनाचार्याः कथयन्ति 'स्यात्' पदेन वदनं कथनं वा स्याद्वादः।

परन्तु अत्रैकं विशिष्टं तथ्यं सावधानतया ध्यातव्यमस्ति यत् संस्कृतव्याकरणे 'स्यात्' पदस्य प्रयोगाः प्रकारद्वयेन भवति– विधिलिङ्गलकारे निपातरूपे च। अत्र 'स्यात्' पदस्य प्रयोगो निपातरूपेण अस्ति न तु विधिलिङ्गलकाररूपेण। निपातरूपेण प्रयुक्तस्य 'स्यात्' पदस्यार्थो भवति– कथञ्चित्, कयाप्यपेक्षया इति। भावार्थोऽयं यत् स्याद्वादसिद्धान्तानुसारेण अस्माभिः सर्वत्र एव 'स्यात्' पदस्य प्रयोगो अनिवार्यरूपेण करणीयः। प्रत्येकं कथनम् एकापेक्षयैव समीचीनं भवति, न तु सर्वापेक्षया। यथा– 'अहं जनकोऽस्मि।' इत्यत्र अहं पुत्रपुत्र्यापेक्षया एव जनकोऽस्मि न तु सर्वेषामेपक्षया।

अनेनैव जैनाचार्याः स्पष्टम् उद्घोषयन्ति यत् प्रत्येकं वस्तुः वस्तुत अनन्तधर्मात्मकत्वात् अवाग्गोचरमस्ति, तस्य प्रतिपादनं वचनैः कर्तुं नैव शक्यम्। अतः स्याद्वादस्याश्रयः ग्रहणीय एव। यथा– कोऽपि पृच्छति आम्रफलं कीदृशमस्ति, तर्हि एकपदेन समीचीनमुत्तरं नैव दातुं शक्यते। क्रमेणैव किमपि वक्तुं शक्यते किन्तु तथापि पूर्णस्वरूपप्रतिपादनमसंभवमेव।

---

10. आचार्यविद्यानन्दः, अष्टसहस्त्री, पृष्ठ– 285
11. आचार्याकलङ्कः, लघीयशस्त्रय विवृत्ति

क्रमोऽपि वर्णने भवति, वस्तुस्वरूपे तु क्रमः नास्ति। सर्वे गुणाः युगपद्रूपेण वसन्ति।

जैनाचार्याः कथयन्ति यत् यद्यपि वयं वदामः यत् काकः कृष्णः भवति, तथापि वस्तुतः काकः तु काकात्मक एव न तु कृष्णात्मकः।

यदि सर्वथा कृष्णात्मकः तर्हि तस्य रुधिरादीनामपि कृष्णतापत्तिः भवति। काकः पक्षापेक्षया कृष्णः रुधिरापेक्षया रक्तः, अस्थि- अपेक्षया श्वेतः शिराणामपेक्षया नीलः पित्तापेक्षया पीतः। एवम् प्रकारेण काकः वस्तुतः पञ्चवर्णात्मकः भवति। अयमेव स्याद्वादः। काकः सर्वथा कृष्ण एव इति तु एकान्तवादः। जैनागमेषु स्याद्वादपरिज्ञानाय एकः सुन्दरः दृष्टान्त प्रदत्तः। यथा-

एकस्मिन् नगरे षड् नराः जन्मान्धा आसन्। तस्मिन् नगरे एकदा एकः गज आगच्छति। सर्वे नागरिकाः कौतूहलेन गजदर्शनाय गतवन्तः। तदा ते जन्मान्धाः नरा अपि गजदर्शनाय गच्छन्ति स्वहस्तस्पर्शद्वारा च गजं जानन्ति। किन्तु गृह-प्रत्यावर्तनकाले तेषु कलहो जातः। एकः कथयति- गजः स्तम्भदृशः भवति। द्वितीयः कथयति- गजः रज्जुसदृशः भवति। तृतीयः कथयति- गजः शूर्पसदृशो भवति। चतुर्थः कथयति- गजः भित्तिसदृशः भवति। पञ्चमः कथयति- गजः भल्लसदृशो भवति। षष्ठः कथयति- गजः कदलीस्कन्धसदृशो भवति। तदा एकः चक्षुष्मान् नरः कथयति- भो सूरदासाः! कथं कलहं कुर्वन्ति भवन्तः। नास्ति तत्र कलहस्य किमपि कारणम्। भवन्तः सर्वे एव अपेक्षयाभेदेन समीचीना एव।

'स्यात्' पदस्य प्रयोगः करणीय अथवा भवद्भि एवं प्रकारेण वक्तव्यं यत्-

1. हस्ती पादापेक्षया स्तम्भसदृशः भवति।
2. हस्ती पुच्छापेक्षया रज्जुसदृशः भवति।
3. हस्ती कर्णापेक्षया शूपसदृशः भवति।
4. हस्ती उदरापेक्षया भित्तिसदृशः भवति।
5. हस्ती दन्तापेक्षया भल्लसदृशो भवति।

6. हस्ती सुण्डापेक्षया कदलीस्कन्धसदृशो भवति।

एवम्प्रकारेण स्याद्वादेन कलहविनाशो भवति। समुचितसमन्वयस्य भावना च विकसति। स्याद्वादः वस्तुतः कस्यापि खण्डनं नैव करोति अपितु, तस्य समीचीनामपेक्षां प्रकाश्य समन्वयं करोति। यथा सांख्याः कथयन्ति वस्तु सर्वथा नित्यमस्ति, बौद्धाश्च कथयन्ति वस्तु सर्वथा अनित्यमस्ति, किन्तु जैनाः कथयन्ति- द्रव्यापेक्षया वस्तु नित्यमस्ति पर्यायापेक्षा चानित्यमस्ति इति।

एवमं प्रकारेण वयं पश्यामः दार्शनिकदृष्ट्या तु अनेकान्तस्याद्वाद-सिद्धान्तो असाधारण महत्त्वं वर्तते एव, व्यावहारिकदृष्ट्याऽपि तयोः विशिष्टं महत्त्वं विलसति। एतयोः द्वयोः विना लोकव्यवहारोऽपि नैव चलितुं शक्यते। तदेवोक्तमाचार्य सिद्धसेनमहोदयैः-

**जेण विणा लोगस्स वि ववहारो सव्वहा न निव्वडइ।**
**तस्स भुवणेक्क गुरुणो णमो अणेगंतवायस्स॥**

❑❑❑

# वेदान्तदृष्ट्या सत्कार्यवादविचारः

-**कुलदीपचन्द्र***

मनुष्याणां मननस्वभावात् कार्यकारणवादः प्रवर्तते। कार्यदृष्ट्वा तस्य अन्वेषणे विचारकाणां प्रवृत्तिर्जायते। अस्यामेव सूक्ष्मान्वेषणे कारणस्य सिद्धिर्भवति। लौकिकानां यथा सामान्यदृष्टिः वस्तूनामुपलब्धिः उपयोगश्च कथं कर्तुं शक्यते इत्येव भवति। तथा विदुषां दृष्टिर्न भवति। विद्वांसः तु कमपि कार्यं दृष्ट्वा तस्य सूक्ष्मेणान्वेषणं कृत्वा तस्य मूलकारणं किंभविष्यति? कथं तत् कार्यम् उत्पद्यते? उपलब्धकार्यस्य कानि कारणानि भवितुं शक्यन्ते? इत्यादिरूपेण कार्यकारणसम्बन्धेन ते अन्वेषणे प्रवर्तमानाः दृश्यन्ते।

अस्यामेव कार्यकारणान्वेषणपरम्परायाम् अस्य संसारस्य विषये यदा मीमांस्यते। तदा उपलब्धकार्यजगतः कारणं किं भवितुं शक्यते। सुखदुःखमिश्रात्मकानां फलानां कारणं किं? सुखदुःखयोः सम्बन्धः कः? कथं सुखदुःखादिनां व्यवस्था क्रियते? संसारस्य आदिकर्ता कः? जगतः उत्पत्तिकारणं किं? किमर्थं जगदुत्पद्यते? इत्यादयः प्रश्नाः स्वतः प्रादुर्भवन्ति।

कार्यकारणान्वेषणसमये नैकाः विचारकाः भारतीयपरम्परायां स्वीयम् अन्वेषणप्रविधिं प्रतिपाद्य सत्कार्यवादः, असत्कार्यवादः इत्यादीन्ः उपपादयन्ति। **कार्यकरणभावे च चतुर्धा विप्रतिपत्तिः प्रसरति। असतः सज्जायते इति सौगताः।[1] नैयायिकादयः सतोऽसज्जायते[2] इति। सांख्याः सतः सज्जायत[3] इति। वेदान्तिनः सतो विवर्तः कार्यजातं न वस्तु सदिति।**

---

* शोधच्छात्रः, अद्वैतवेदान्तविभागः, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्व-विद्यालयः, नई दिल्ली-110016

1. सर्वदर्शनसंग्रहे, सांख्यदर्शनं, पृष्ठ 539
2. सर्वदर्शनसंग्रहे, सांख्यदर्शनं, पृष्ठ 539
3. सर्वदर्शनसंग्रहे, सांख्यदर्शनं, पृष्ठ 539

सत्कार्यवादानुसारं कार्यम् उत्पत्तेः पूर्वं स्वकारणे अव्यक्तरूपेण अवतिष्ठते। कार्यं नूतनरूपेण नोत्पद्यते। अपितु यत् कारणे बीजरूपेण आसीत्। अव्यक्तरूपेण आसीत्। तस्यैव प्रकटीकरणं व्यक्तीकरणं आविर्भावो जायते। अत्र उत्पत्तेः तात्पर्यं अभिव्यक्तिः, आविर्भावः वर्तते। न तु नूतनपदार्थस्य उत्पत्तिरिति। विनाशस्य च तात्पर्यं तिरोभावः वर्तते। अव्यक्तस्य अभिव्यक्तिरेव उत्पत्ति-रुच्यते। व्यक्तस्य पुनः अव्यक्तीभवनमेव वस्तोर्नाशः वर्तते इति।

सांख्यकारिकामाध्यमेन ईश्वरकृष्णेन उत्पद्यमानः प्रपञ्चस्य कारण-रूपेण उत्पत्तेः पूर्वं सद्वा असद्वा इति सन्देहे सति उत्पत्तेः पूर्वमपि कार्यस्य प्रपञ्चस्य कारणरूपेण सूक्ष्मास्थितिः सत्त्वेन व्यवस्थापयितुं लिख्यते यत्

**असदकरणात् उपादानगृहणात् सर्वसंभवाभावात्।**
**शक्तस्य शक्यकरणात् कारणभावाच्च सत्कार्यम्।।**[5] इति।

अस्यां कारिकायां सत्कार्यवादसमर्थने पञ्चहेतवः प्रतिपाद्यन्ते।

**( 1 ) असदकरणात्**- असत् कस्यापि कारणं भवितुं न शक्यते। अन्यथा सिकताभ्यः अपि तैलं उत्पद्येत, न तु उत्पद्यते। कार्यस्य उत्पत्तेः पूर्वं शशश‍ृङ्गवत् असत्त्वे तस्य उपादानं अथवा कारणं नैव संभवति। यद्यपि बीजं भूमौ उप्तं नष्टं सत् अङ्कुरं जनयति तथापि तत्र बीजस्य ध्वंसः न कारणं किन्तु बीजे अङ्कुरे च अनुस्यूताः बीजावयवाः एव कारणम्। न हि नीलं शिल्पिसहस्रेणापि पीतं कर्तुं शक्यते। एवं तिलेभ्यः एव तैलं निष्पद्यते। व्रीहिषु सतः एव तण्डुलस्य अवघातेन अभिव्यक्तिः। धेनुषु सतः एव क्षीरस्य दोहनेन अभिव्यक्तिः। अतः असत्त्वे सतः नोत्पद्येत इति।

**( 2 ) उपादानग्रहणात्**- उपादानकारणेन एव कार्यस्योत्पत्तिः भवति। कार्ये उपादानकारणं (समवायिकारणं) अनुस्यूतः[6] यथा- मृदा घटे। एवञ्च कार्येण संबद्धं कारणं कार्यस्य जनकं वर्तते। सतोरेव हि द्वयोः सम्बन्धः न

---

4. सर्वदर्शनसंग्रहे, सांख्यदर्शनं, पृष्ठ 539
5. सांख्यकारिका, 9
6. भारतीय दर्शन आलोचन और अनुशीलन (पृष्ठ 142) चन्द्रधर शर्मा कृत

असतोः न वा सदासतोः इति। पटार्थी तन्तूनेव स्वीकरोति, घटार्थी च मृदमेव। एवं उपादानग्रहणपूर्वकमेव कार्योत्पत्तिः दृश्यते।

**( 3 ) सर्वसम्भवाभावात्**- यदि कारणे कार्यम् अविद्यमानः भवेत्तर्हि केनापि कारणेन कस्यापि कार्यस्य उत्पत्तिः सम्भवति।[7] परन्तु एवं तु न दृश्यते। तिलेभ्यः एव तैलं, अतः कार्याणां सर्वेषां स्वकारणात्मना एव अभिव्यक्तिर्जायते। कार्यञ्च उत्पतेः पूर्वं स्वकारणे विद्यते एव।

**( 4 ) शक्तस्य शक्यकरणात्**- शक्तं नाम कारणं शक्यं नाम कार्यं अर्थात् यस्मिन् कारणे यत् कार्यं विद्यते। तस्य कार्यस्योत्पत्तिः तेन एव कारणेन भवति।[8] यथा दुग्धात् एव दधिर्जायते। न तु उदकात्तिलेषु एव तैलोत्पन्नशक्तिर्विद्यते न तु सिकतासु इति।

**( 5 ) कारणभावात्**- कारणात् भिन्नं कार्यं पृथक् नास्ति। कार्यं कारणस्य व्यक्तावस्था वर्तते। कारणं च कार्यस्य अव्यक्तावस्था वर्तते इति।[9] न हि मृदं परित्यज्य कोऽपि घटमात्रं ज्ञातुं शक्नोति। अतः कार्यं सर्वदा कारणात्मना अवतिष्ठते। कोऽपि कार्यं कारणं विना न सम्भवति इति।

एवं सत्कार्यवादस्य स्वरूपं सम्प्राप्यते। सत्कार्यवादस्य अपि सांख्य-दृष्ट्या तथा वेदान्तदृष्ट्या किञ्चित् भेदः संदृश्यते।

सत्कार्यवादः- 1. परिणामवादः 2. विवर्तवादः

**परिणामवाद**ः- परिणामवादस्य समर्थकः सांख्यदर्शनं वर्तते। परिणामवादानुसारेण कारणस्य कार्यरूपेण अवस्तिथिः वास्तवं वर्तते। सांख्याः, योगिनः, विशिष्टाद्वैतिनः परिणामवादं स्वीकुर्वन्ति। सांख्यस्य मतं प्रकृति-परिणामवादः मन्यते। विशिष्टाद्वैतस्य च ब्रह्मपरिणामवादः मन्यते। कार्यकारणयोः सत्त्वं एतैः स्वीक्रियते।

सतत्त्वतोऽन्यथाप्रथा विकार इत्युदीरितः[10] इति, पूर्वावस्थापायेऽवस्था-

---

7. भारतीय दर्शन आलोचन और अनुशीलन (पृष्ठ 142) चन्द्रधर शर्मा कृत
8. भारतीय दर्शन आलोचन और अनुशीलन (पृष्ठ 142) चन्द्रधर शर्मा कृत
9. भारतीय दर्शन आलोचन और अनुशीलन (पृष्ठ 142) चन्द्रधर शर्मा कृत
10. वेदान्तसारः

न्तरापत्तिः।[11]

**परिणामो नाम उपादानसमसत्ताककार्यापत्तिः**[12] इत्यादयः लक्षणानि वर्तन्ते। यथा दुग्धात् दधि उत्पद्यते। दधिश्च पुनः दुग्धभावं न सम्प्राप्तुं शक्नोति। उभयोरपि सत्त्वं भवति। अतः परिणामवादे कार्यकारणयोः सत्त्वं स्वीक्रियते।

**विवर्तवादः- अतत्त्वतोऽन्यथाप्रथाविवर्त इत्युदाहृतः**[13] इति विवर्त-लक्षणं विधीयते। यथा रज्जुसर्पः प्रतीतिकाले एव वर्तते। मिथ्यारूपेण तत्र अवभासते। तात्त्विकदृष्ट्या रज्जौ कस्मिनपि काले सर्पः नास्ति। केवलं प्रतीयते एव। एवमेव ब्रह्मणि जगत् प्रतीयते। तात्त्विकदृष्ट्या ब्रह्मणः एव सत्वं त्रिकालाबाध्यत्वं वर्तते। कार्यप्रपञ्चं ब्रह्माभिन्नम्। रज्ज्वभावे सर्पः कथमपि न प्रतीयते। एवमेव ब्रह्माभावे जगतः प्रतीतिः कथमपि न सम्भवति। सत् कारणतया एव वस्तूनां प्रतीतिर्जायते न तु असत् कारणेनेति। अतः ब्रह्मणः एव पारमार्थिकी सत्ता वर्तते। कार्यं जगत् न सत् न असत् उभयमिति। कारणस्य एव सत्त्वमिति विर्वतवादः।

**विवर्तो नाम उपादानविषमसत्ताककार्यापत्तिः**[14] परिणामवादे कारणस्य तात्त्विकं परिवर्तनं भवति। परन्तु विवर्तवादे तात्त्विकं परिवर्तनं कार्यरूपेण न भवति। यथा रज्जौ सर्पः प्रतीयते। तद्वत् ब्रह्मणि जगत् प्रतीयते। चैतन्यब्रह्मसत्ता पारमार्थिकी तद्विषमा सत्ता व्यावहारिकी, प्रातिभासिकी वा प्रपञ्चस्येति ब्रह्मविवर्तत्वं प्रपञ्चेऽनुगतम्। **अधिष्ठानस्वरूपमपरित्यज्य दोषवशाद्रूपान्तरेण ( प्रतीतस्य ) कथनं**[15] इत्यपि विवर्तवादस्य लक्षणं वर्तते।

अतः उत्पत्तेः पूर्वं कार्यं सदेव इति सत्कार्यवादिनां निश्चयः समीचीनमेव। असताम् उत्पत्तिः सतां नाशः न्यायाविरुद्धः वर्तते। तदैव

11. सर्वलक्षणसंग्रहः
12. वेदान्तपरिभाषा, प्रत्यक्षपरिच्छेदे
13. वेदान्तसारः
14. वेदान्तपरिभाषा, प्रत्यक्षपरिच्छेदे
15. सर्वलक्षणसंग्रहः

गीतायां निन्ध्यते– **नासतो विद्यते भावः नाभावो विद्यते सतः**[16] इति।

एवं तन्तुषु पटः इति भेदप्रतीतिः अभेदेऽपि उपपद्यते एव। कार्यकारणयोः भिन्नकार्यत्वमपि न भेदं साधयति। एकोऽपि हि वह्निः दाहक्रियां पचनक्रियाञ्च साधयति। एवमेव एकमेव ब्रह्मणा इदं सर्वं जगत् सृज्यते। जगतः कारणात्मना सत्त्वं वर्तते। कार्यात्मना च मिथ्यात्वं सिद्ध्यते। **सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्**[17] **यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्याद्वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्**[18] इत्यादयः श्रुतयः आत्मनः एव तात्त्विकी सत्ता (पारमार्थिकी सत्ता) उपदिशन्ति। विवर्तवादं स्वीकृत्यैव एतादृश्यः श्रुतयः समाधीयन्ते। अतः एव अद्वैतिभिः सत्कार्यवादस्य विवर्तवादं स्वीकृत्य स्वमतं पोष्यते। एवं सत्कार्यवादस्य वेदान्तदृष्ट्या विशेष– प्रतिपादनं वर्तते।

❑❑❑

16. श्रीमद्भगवद्गीता 2.16
17. छान्दोग्योपनिषद् 6.2.1
18. छान्दोग्योपनिषद् 6.1.4

# न्याय-द्वैतमतयोः प्रामाण्यविमर्शः

-अनुराग जि रायचूर्*

जानन्त्येव तत्रभवन्तो भवन्तः यत् चराचरात्मकेऽस्मिन् जगति जनाः प्रामाण्यं विना प्रायेण वस्तुषु न प्रवर्तन्ते। विषयेऽस्मिन् नैके दर्शनकृदः बहुधा अभिप्रयन्ति। तेषु न्यायद्वैतमते अन्यतमे। मतद्वये विमृष्टं प्रामाण्यं भवतां समेषां पुरतःस्थापयितुम् उत्सहतेऽयं जनः।

प्रामाण्यं द्विविधं वर्तते। एकं ज्ञानसंबन्धी अन्यद् ज्ञानसाधनानां प्रत्यक्षानुमानादीनाम् सम्बन्धी। प्रामाण्यद्वयं च पुनर्द्वेधा भज्यते स्वतः परतश्चेति। प्रामाण्यं स्वत इति मीमांसकाः वेदान्तिनश्च, परत इति नैयायिकाः। प्रामाण्यस्वतस्त्वं परतस्त्वं च पुनर्द्वेधा विभक्तौ दृश्येते ज्ञप्तौ उत्पत्तौ चेति।

ज्ञानगतं प्रामाण्यं नाम यथार्थत्वम्[1] अर्थमनतिक्रम्य इति यावत्। वस्तुनः येन रूपेणावस्थानं तेनैव रूपेण ग्रहणम्। ज्ञानं यदा जायते तदा एव प्रामाण्यमपि स्वत एव जायते। ज्ञानजनने या सामग्री अपेक्षिता वर्तते तयैव सामग्र्या प्रामाण्यस्यापि जननम् इति स्वत इत्यस्यार्थः[2]। यथा रजतं दृष्ट्वा जायमानस्य इदं रजतम् इति ज्ञानस्य रजतचक्षुरिन्द्रियसन्निकर्षः मनोचक्षुःसन्निकर्ष इत्यादिकमपेक्ष्यते तेनैव कारणकलापेन विषये रजतेपि प्रामाण्यं जायते। इदमेव ज्ञानप्रामण्यस्य उत्पत्तौ स्वतस्त्वम्। तथा सति शुक्तिं दृष्ट्वा यदा इदं रजतमिति ज्ञानं जायते तदा प्रामाण्यस्य स्वतस्त्वात् कथं तत्र प्रामाण्याग्रहः इति चेदित्थम्- तत्र विरोधिकारणसद्भावात् प्रामाण्यं न गृह्यते अन्यथा तु ज्ञानस्य स्वाभाविकं कार्यं भवति प्रामाण्यग्रहः।

---

* शोधच्छात्रः, न्यायविभागः, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः।

1. प्रमाणलक्षणम्, पृ.सं- 1
2. न्यायसुधा- पृ.सं- 903

ज्ञानकरणादीनां प्रत्यक्षादीनामपि प्रामाण्यं वर्तते। करणेषु विद्यमानं प्रामाण्यं यथार्थज्ञानसाधनत्वरूपम्। इदमेव करणेषु विद्यमानं प्रामाण्यम्। ज्ञानस्य करणानि येन सामर्थ्येन ज्ञानमुत्पादयन्ति तेनैव सामर्थ्येन प्रामाण्यमुत्पा-दयन्ति। ज्ञानजननसामर्थ्यं प्रामाण्यजननसामर्थ्यमेकमेव इति यावत्।

ज्ञानगतप्रामाण्यस्य स्वतस्त्वं नाम ज्ञानजनकमात्राधीनजन्मत्वम्[3]। अत्रस्थज्ञानशब्दस्य प्रामाण्याश्रयज्ञानमित्यर्थः। तद्ग्राहिका या सामग्री सा द्वैतमतरीत्या साक्षिरूपं ज्ञानम्। ज्ञानग्राहकं साक्षिरूपज्ञानमेव ज्ञानगतप्रामाण्यमपि गृह्णाति। यथा- यदा साक्षिरूपं ज्ञानं अयं घट इति ज्ञानं गृह्णाति तदा अहं घटं जानामि इति ज्ञानं जायते। नैयायिकाः इदमेव ज्ञानम् अनुव्यवसाय इति नाम्ना प्रतिपादयन्ति। नैयायिकमते अनुव्यवसाय इति नाम्ना यद् ज्ञानं कथयन्ति तदेव द्वैतमतरीत्या आत्मस्वरूपं साक्षिज्ञानम्। नैयायिकमते तावत् अनुव्यवसायज्ञानं अयं घट इति ज्ञानं गृहीत्वा तत्प्रामाण्यविषये तटस्थमिव भवति। परीक्षणानन्तरमेव ज्ञानमिदं प्रमाणमिति उद्गिरन्ति नैयायिकाः। न केवलं ज्ञानग्रहणे समर्थं भवति साक्षिरूपं ज्ञानं किन्तु तत्प्रामाण्यमपि ग्रहीतुं शक्नोति इति द्वैतिनामभिप्रायः।

ज्ञानप्रामाण्यस्य उत्पत्तौ ज्ञप्तौ च स्वतस्त्वम् अङ्गीक्रियते। करण-प्रामाण्यस्य उत्पत्तावेव स्वतस्त्वम् अङ्गीक्रियते। ज्ञप्तौ च नाङ्गीक्रियते यतो हि तेषां यथायथं प्रत्यक्षादिवेद्यत्वात्[4]। यथायथमित्यस्य विवरणमेवं दातुं शक्नुमः। करणादिषु विद्यमानं प्रामाण्यं नाम करणादिकं येन इन्द्रियेण गृह्यते तेनैव इन्द्रियेण करणादिषु विद्यमानं प्रामाण्यमपि गृह्यते इति। परन्तु तथा वक्तुं न शक्यते। यथा हि- चक्षुरादिपञ्चेन्द्रीयाणि मन इति षोढा इन्द्रियाणां विभाजनं कृतं वर्तते सर्वेपि अतीन्द्रियाणि च। यदि एकस्य पुरुषस्य रूपज्ञानं जायते तदा "अयं चक्षुष्मान् रूपज्ञानवत्त्वात्' इत्यनेनानुमानेन चक्षुरिन्द्रियं वेद्यते। एवमेव अनुमानशब्दादयः अनुमानान्तरेण वेद्यन्ते। अत एव करणप्रामाण्यस्य ज्ञप्तौ प्रामाण्यं नाङ्गीकुर्वन्ति[5]।

3. न्यायसुधा पृ. सं- 903
4. न्यायसुधा पृ. सं- 903
5. न्यायसुधा पृ. सं- 903

प्रामाण्यपरतस्त्ववादिनः नैयायिकाः 'प्रामाण्यं परतो ज्ञायते अनभ्यास-दशायां सांशयिकत्वात् अप्रामाण्यवत्'[6] इत्येनदनुमानं प्रमाणतया निरूपयन्ति। अप्रामाण्ये अनभ्यासदशायां सांशयिकत्वस्य विद्यमानत्वात् अन्येन अनुमानेन प्रामाण्यं आवश्यकं वर्तते। एवं प्रामाण्येऽपि हेतोः सत्त्वात् परतो ज्ञायते इति। एकविधमेव ज्ञानं पौनःपुन्येन यदा जायते तत्र संशयः न जायते एव परन्तु यत्र प्रथमतः यस्मिन् कस्मिंश्चिदपि विषये ज्ञानं जायते तत्र संशयः सम्भवत्येव। यदि अनुव्यवसायः ज्ञानं यथा गृह्णाति तथा प्रामाण्यमपि गृह्णीयात् तदा अनभ्यासदशायां प्रामाण्यमेव उत्पद्येत न तु संशयः इति। परन्तु एतदुपरि द्वैतमतस्थापकानां श्रीमन्मध्वाचार्याणामभिप्राय एवं वर्तते इति टीकाचार्या इत्येव प्रथिताः जयतीर्थाः एवमभाणि निजग्रन्थे श्रीमन्न्याय-सुधायाम्। तथा हि- नैयायिकमतानुसारेण हेतौ यदि विशेषणं देयं चेत् व्यभिचारादिवारकं स्यात् हेतुघटकविशेषणानामिति न्यायात्। अत्र अनभ्या-सदशायामित्यस्य व्यभिचाराद्यवारकत्वात् हेत्वघटत्वकमिति[7]।

नैयायिका एवमाशंकेत- तस्मिन्ननुमाने हेतुविशेषणस्य अनभ्यास-दशायामित्यस्य व्यभिचारावारकत्वेपि असिद्धिवारकत्वं युज्यते। यथा हि- यद्यनभ्यासदशयामिति विशेषणं न स्यात् तदा प्रामाण्यमिति पक्षस्य अभ्यासदशापन्नज्ञानप्रामाण्यमिति अर्थः लभ्येत। तदा च अभ्यासदशापन्नज्ञान-प्रामाण्ये सांशयिकत्वस्यासत्त्वात् असिद्धिः स्यात्। तद्वारणायैव अनभ्यास-दशायामिति विशेषणं दत्तम्। दानेन च असिद्धिः वारिता भवति। यतो हि यत्र बहुवारं समानविषयकं ज्ञानं नोत्पन्नं तत्र सांशयिकत्वरूपहेतोः पक्षे वृत्तित्वात् नासिद्धिरिति[8]।

एवं हेतोरस्य असिद्धिवारकत्वं युज्यते इति चेत्

तदप्यसारम्- तथा हि परमनैयायिकाः उदयनाचार्याः निजग्रन्थे[9]

---

6. प्रामाण्यवादः, पृ. सं- 669
7. न्यायसुधा पृ. सं-915
8. न्यायसुधा पृ. सं-915
9. बौद्धधिक्कारः

एवमभाणि एकामसिद्धिं परिहरतो द्वितीयापन्ना[10] इति। वाक्यस्यास्य भूमिका एवं वर्तते– नैयायिकाः ईश्वरं साधयितुं क्षित्यादिकं सकर्तृकं कार्यत्वात् घटवत्[11] इत्यनुमानं प्रमाणतया प्रदास्यन्ति। तदसहमानाः निरीश्वरवादिनः मीमांसकाः क्षित्यादिकम् अकर्तृकं शरीराजन्यत्वात्[12] इति सत्प्रतिपक्षन्ति। अनुमानेऽस्मिन् शरीरपदानुपादाने अजन्यत्वरूपहेतोः पक्षेसत्त्वेन असिद्धिः स्यात् तत्परिहाराय शरीरपदोपादानम्। क्षित्यादिकं तु जन्यमपि घटादिवत् शरीरजन्यं नेति कृत्वा शरीराजन्यत्वरूपहेतोः सत्त्वान्नासिद्धिरिति। मीमांसकान् प्रति उदयनाचार्याणां वाक्यमेवं वर्तते– पक्षे हेतोरसत्त्वात् स्वरूपासिद्धिरुत्पादिता तत्परिहारेपि व्यभिचारावारकस्य शरीरविशेषणस्य व्यर्थत्वात् व्याप्यत्वासिद्धि-रुद्भाविता भवति। तदेवोक्तं– एकामसिद्धिं परिहरतो द्वितीयापन्नेति। प्रकृते च अनभ्यासदशायामित्यस्य यदि असिद्धिवारकत्वमुच्यते तदा न्यायेनानेन व्याप्यत्वासिद्धिरपि उद्भाविता दृश्यते। यदि विशेषणमिदं सार्थकं तर्हि मीमांसकमतनिराकरणं युक्तं न स्यात्।

दोषश्चेदं अन्यथापि परिहर्तुं शक्यते। तथा हि– अनभ्यासदशायामितीदं विशेषणं पक्षविशेषणतया क्रियते। तथा चानुमानम्– अनभ्यासदशायां प्रामाण्यं परतो ज्ञायते सांशयिकत्वात् अप्रामाण्यवत्[13] इति। अनभ्यासदशापन्नप्रामाण्ये सांशयिकत्वस्य विद्यमानत्वात् न तत्रासिद्धिः इति चेत् न सन्दिग्धानैकान्त्यस्य तादवस्थ्यात्। तथा हि– नैयायिकाः धर्मिप्रत्यक्षं, अनुमानं, उपमानं, अनुव्यवसायं च स्वतःप्रमाणतया अङ्गीकुर्वन्ति तत्रापि संशयादिदर्शनेन परतो ज्ञायमानत्वा-भाववति सांशयिकत्वस्य वृत्तित्वात् संदिग्धानैकान्त्यम् इति श्रीमन्न्यायसुधाया आशयः।

---

10. बौद्धधिक्कारः
11. न्यायसिद्धान्तमुक्तावली
12. न्यायसिद्धान्तमुक्तावली
13. न्यायसुधा पृ. सं-915

## सन्दर्भग्रन्थसूची

1. प्रामाण्यवादः- तत्त्वसंशोधसंसत्, श्रीपलिमारु मठ, उडुपि।
2. श्रीमन्न्यासुधा- द्वैतवेदान्ताध्ययनसंशोधनप्रतिष्ठानम्, बेंगलूरु।
3. न्यायसिद्धान्तमुक्तावली, चौखम्बा प्रकाशनम्, गोरखपुर।
4. प्रमाणलक्षणम्- पूर्णप्रज्ञसंशोधनमन्दिरम्, बेंगलूरु।
5. सुधासौरभम्- पूर्णप्रज्ञविद्यापीठप्रतिष्ठानम्, बेंगलूरु।
6. प्रमाणपद्धतिः- द्वैतवेदान्ताध्ययनसंशोधनप्रतिष्ठानम्, बेंगलूरु।

❑❑❑

# शाङ्करदर्शने आभासवादः

**-मानसकुमारबेहेरा***

**दर्शनस्य परिचयः**

भारतीयदर्शनं सूक्ष्मातिसूक्ष्मतथ्योद्घाटकम्। दर्शनशब्दस्य व्युत्पत्तिः दृश्धातोः भवति। दृश्धातोः ल्युट् प्रत्यययोगेन 'दर्शनम्' इति शब्दो निष्पद्यते। दर्शनशब्दस्य व्युत्पत्तिजन्योऽर्थः तु दृश्यते अनेन परमतत्त्वम् इति दर्शनम्। यद्यपि चक्षुरिन्द्रियेण साधारणतः दर्शनक्रिया सम्भवति तथापि तत्त्व-दर्शनं न तु चक्षुरिन्द्रियसाध्यम्। दिव्यदृष्ट्या अर्थात् ज्ञाननेत्रेण परमतत्त्वदर्शनमेव यथार्थदर्शनम्। दर्शनशास्त्रस्य अनुशीलनेन सम्यक् तत्त्वज्ञानलाभः भवति।

अस्मिन् संसारे आध्यात्मिकः, आधिभौतिकः, आधिदैविकः इति त्रयः तापाः विद्यन्ते तापत्रयात् मुक्त्यर्थम् ऋषयः सततं परिश्रमं सूक्ष्मातिसूक्ष्ममध्ययनमनुशीलनं च कृत्वा या अनुभूतिः लब्धा सानुभूतिः एव दर्शननाम्ना प्रसिद्धा। ब्रह्मविषयकज्ञानप्राप्त्यर्थं दर्शनमेकमेव माध्यमं भवति। दर्शनशास्त्रं केवलमेकमेव शास्त्रं यस्यानुशीलनेन अज्ञानान्धकारः अपसरति। दर्शनं तु प्रदीपप्रभाकरादिवत् भासकः एवं यथाविधि साधनान्यनुष्ठानसाधनं भवति। अतः उक्तमस्ति यत् -

**प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम्।**
**आश्रयः सर्वधर्माणां शश्वदान्वीक्षिकी मता॥**

भारतीयदर्शनमास्तिकनास्तिकभेदेन द्विविधम्। 'नास्तिको वेदनिन्दकः' इति व्युत्पत्त्या यानि दर्शनानि वेदनिर्दिष्टमार्गानुसारं स्वीयमतानि प्रतिपादयन्ति तानि 'आस्तिकदर्शनानि'। तद्विपरीतानि तु 'नास्तिकदर्शनानि। सांख्य-योग-

* शोधच्छात्रः, अद्वैतवेदान्त विभागः, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्व-विद्यालयः, नवदेहली-110016।

न्याय-वैशेषिक-पूर्वमीमांसा-उत्तरमीमांसाभेदेन आस्तिकदर्शनं षड्विधम्। चार्वाक-बौद्ध-जैनभेदेन नास्तिकदर्शनं त्रिविधम्।

एषु बौद्धदर्शनं सौत्रान्तिक-वैभाषिक-योगाचार-माध्यमिकभेदेन-चतुर्विधम्। तेनास्तिकदर्शनानि षड्विधानि नास्तिकदर्शनान्यपि समसंख्यकानि भवन्ति। तन्मध्येषु वेदान्तदर्शनम् अन्यतमम्। वेदान्तदर्शनस्य कर्त्ता भवति- महर्षिवेदव्यास।

वेदान्तदर्शनं मुख्यतः षड्विधम्, परन्तु अद्वैतवेदान्तदर्शनं श्रेष्ठतमः। अद्वैतवेदान्तस्य कर्त्ता भवति- जगद्गुरुः आदिशंकराचार्यः।

**आभासवादः**

शांकराद्वैतनये चिदात्मनो ब्रह्मणो जीवभावापादनाय त्रयो वादा आभासवादः प्रतिबिम्बवादोऽवच्छेदवादश्च स्वीक्रियन्ते। तत्र प्रथमः श्रीसुरेश्वराचार्याभिमतः द्वितीयः श्रीपद्मपादाचार्याभिमतस्तृतीयश्च श्रीवाचस्पति-मिश्राभिमतः।

अनेन आभासेनैव निर्गुणं निर्विकारं निष्कलं निरंशं च ब्रह्म अविद्या-साचिव्येन जीव-भावापन्नं जगभावापन्नं च भवति। यथा- एवमेवाप्तकामं सकलप्रवृत्तिनिवृत्तिहीनं कार्यकारणातीतं ब्रह्म दृश्यमान्सर्वप्रपञ्चप्रकाशनाय नालम्, तथावरणविक्षेपशक्ति तमोरूपा अविद्यापि प्रपञ्चप्रकाशनाय नालम्, तदा स्वाभाससाचिव्येनैवात्मा विषयान् प्रकाशयति[1] यथा च - अज्ञानोपहिता आत्मा अज्ञानतादात्म्यापन्नस्वचिदाभासाविवेकादन्तर्यामी साक्षी जगत्कारण-मीश्वर इति च कथ्यते। बुद्ध्युपहितश्च तत्तादात्म्यापन्नस्वचिदाभासा-विवेकाज्जीवः कर्ता भोक्ता प्रमातेति च कथ्यत इति वार्त्तिककारपादाः। प्रतिदेहं च बुद्धीनां भिन्नत्वात्तद्गतचिदाभासभेदेन तदविविक्तं चैतन्यमपि भिन्नमिव प्रतीयते।

अज्ञानस्य तु सर्वत्र भिन्नत्वात्तद्गतचिदाभासभेदाभावात्तदविविक्त-साक्षिचैतन्यस्य न कदाचिदपि भेदभानमिति[2]। यथा- जीवो हि नाम

---

1. बृहदारण्यकोपनिषद् भा. वार्त्तिककार-4/3/89, आनन्दगिरि- 4/3/361
2. सिद्धान्तबिन्दुः- 1

देवताया आभास–मात्रः[3]। यथा च आभास एव चैष जीवः परमात्मनो जलसूर्यादिवत् प्रतिपत्तव्यः[4]। यथा च आभिमुख्येन अहमित्यपरोक्षेण भासत इत्याभासः प्रत्यक्चितो भासो नाम आभासः[5]।

यथा च– क्रियाकारकफलात्मक आभास ईषदपि परमार्थवस्तु न स्पृशति तस्य मोहमात्रोपादानत्वात्[6]। यथा च परिणामो हि मोहादेश्चिदाभासः सदेष्यते[7]। आभासस्य मिथ्यात्वम्। यथा– मुखाभासो यथादर्शे आभासश्चोदितो मृषा[8], आभासस्य कृते इमे शब्दाः प्रयुक्ताः– चिदाभासः, चिद्बिम्बः कूटाभासः, महिमा, अभिप्रायः प्रसादः आकृतिः वृत्तिः। (2।3।232, 3/5/70, 3/5/136, 3/8/115, 1/3/312, 4/3/74, 4/3/295, 4/3/229, 4/4/651, – 1।4।636) श्रीमधुसूदनसरस्वती आभासम् अनिर्वचनीयं कथयति – आभासस्यापि जडाजडविलक्षणत्वेनानिर्वचनीयत्वात्[9]। आभासप्रतिबिम्बयोर्भेदः। यथा – ईषद्भासनमाभासः प्रतिबिम्बस्तथाविधः। बिम्बलक्षणहीनः सन् बिम्बवद्भासते हि सः[10]। इत्थं च आभासश्चैतन्यगत– सत्त्वादिलक्षणहीनोऽपि सत्त्वादिरूपतया प्रतीयते यथा मुखलक्षणहीनोऽपि मुखाभासो मुखधर्मवान् भासते। एवं मुखाभासो मिथ्या अनिर्वचनीयः आपातरमणीयः दर्पणाद्युपाधि–स्थितिसमकालो विनाश्यस्तद्वद् आभासोऽपि मिथ्या अचिन्त्यः आपातरमणीयः अज्ञानाद्युपाधिस्थितिसमकालो निर्वत्यः। आभासो द्विप्रकारेणानुभूयतेकारणा–भासरूपेण कार्याभासरूपेण च। यथा–क्रियाकारकफलात्मक आभासः। (नै० सि० 2/51) कारणाभासः अज्ञानगतः कार्याभासः अज्ञानजन्यवस्तुगतः। कारणाभासस्योपादनं चैतन्यम्, कार्याभासस्योपादानमविद्या। आभाससाचिव्येन

3. छान्दोग्योपनिषद् शा.भा. 6/3/2
4. ब्रह्मसूत्र शा.भाष्य. 3/2/50
5. बृहदारण्यकोपनिषद, वा.आनन्दगिरि 2/1/216
6. नैष्कर्म्यसिद्धिः 2/51
7. बृहदारण्यकोपनिषद् 4/3/494
8. उपनिषद साह. 2/18/88, बृहदारण्यकोपनिषद् भा.वार्त्तिककार–2/18/43, 2/18/48 ,2/18/114
9. सिद्धान्तबिन्दुः 1
10. पञ्चदशी 8/32

ब्रह्म जगद्रूपेण प्रथते। यथा– एवमेवाप्तकामं सकलप्रवृत्तिनिवृत्तिहीनं कार्यकारणातीतं ब्रह्म दृश्यमान्सर्वप्रपञ्चप्रकाशनाय नालम्, तथावरणविक्षेपशक्ति तमोरूपाविद्यापि प्रपञ्चप्रकाशाय नालम्, तदा स्वाभाससाचिव्येनैवात्मा विषयान् प्रकाशयति[11]। आभासवादप्रतिबिम्ब– वादयोरियान् भेदः – बिम्बभूताच्चितः प्रतिबिम्बभूतो जीवोऽभिन्नः। आभासपक्षे आभासस्य न चितो भिन्नत्वमभिन्नत्वं तदुभयरूपत्वं वा अतोऽनिर्वचनीयत्वम्। इत्थम् आभासस्य मिथ्यात्वम्, तथा प्रतिबिम्बस्य सत्यत्वम्। उक्तं च सिद्धान्तबिन्दौ न्यायरत्नावली टीकायां तथा स्वीये श्रीशङ्करायागद्वैतवादे। यथा च बुद्धितत्स्थचिदाभासौ द्वावेतौ व्याप्नुतो घटम्। तत्राज्ञानं धिया नश्येदाभासात्तत्र घटः स्फुरेत् (प० द० 7।95)।

## सहायकग्रन्थसूची


- वेदान्तसारः – श्रीसदानन्दयोगीन्द्रः, चौखम्बा विद्याभवनम्, वाराणसी 1968
- ब्रह्मसूत्रम् – वादरनारयणव्यासः, चौखम्बा विद्याभवनम्, वाराणसी, 1968
- शांकरवेदान्तकोषः–मुरलीधरपाण्डेयः, सम्पूर्णानन्दसंस्कृत–विश्व–विद्यालयः, 2016
- सर्वदर्शनसंग्रह – उमाशंकरशर्मा, चौखम्बा विद्याभवनम्, 2006
- वेदान्तपरिभाषा – धर्मराजध्वरिन्द्रः, चौखम्बा संस्कृतसंस्थानम्, वाराणसी, 2071 सं.
- वेदान्तदर्शनम्– हरिकृष्णदासगोयन्दका, गीताप्रेसः गोरखपुरम्, 2062 सं.


---

11. बृहदारण्यकोपनिषद् भा.वार्त्तिककार–4/3/89

- सिद्धान्तबिन्दुः– श्रीकृष्णपन्तः, अच्युतमग्रन्थमाला, काशी, 1500 सं.
- सिद्धान्तलेशसंग्रहः– श्रीमदप्पयदीक्षितः, चौखम्बा विद्याभवनम्, वाराणसी, 2007
- पञ्चदशी– श्रीविद्यारण्यमुनिः, चौखम्बा. अ.भा.प्र.वाराणसी.1984
- बृहदारण्यकोपनिषद्– गीताप्रेसः, गोरखपुरम् 2074 सं.


❒❒❒

# न्यायनये कारणतावादविमर्शः

**-शान्तनुदासः***

दर्शनशास्त्रम् अत्यन्तं महत्त्वपूर्णं शास्त्रमस्ति। अनेन शास्त्रेण संसारस्य स्वरूपं प्रकाशितं भवति। भारतीयदर्शनम् आस्तिकनास्तिकदर्शनभेदेन द्विविधं वर्तते। आस्तिकदर्शनेषु षड्वैदिकदर्शनानि सन्ति। तद्यथा- न्यायवैशेषिक-सांख्य-योग-मीमांसा-वेदान्तदर्शनानि। नास्तिकदर्शनेषु त्रीणि दर्शनानि सन्ति। तद्यथा चार्वाक-बौद्ध-जैन-दर्शनानि।

षड्विधास्तिकदर्शनेषु, न्यायवैशेषिकदर्शनं सर्वत्र प्रसिद्धमस्ति। न्यायदर्शनं महर्षिगौतमविरचितम्, वैशेषिकदर्शनञ्च महर्षिकणादप्रणीतमस्ति **"अङ्गानि वेदाश्चत्वारो मीमांसान्यायविस्तरः"** इत्यस्मिन् वाक्ये घटकीभूतं न्यायविस्तरपदं न्यायवैशेषिकदर्शनपरम्। पुनः अनुभवसिद्धां किम्वदन्ति- **"काणादं पाणिनीयञ्च सर्वशास्त्रोपकारकम्।"**[1] इत्यत्रापि घटकीभूतं 'काणाद' पदं न्यायवैशेषिकदर्शनस्य बोधकं भवति।

**पुनः शास्त्रं द्विविधम्**- 1. पदशास्त्रम्, 2. पदार्थशास्त्रञ्चेति। तत्र पदशास्त्रं व्याकरणशास्त्रं, पदार्थशास्त्रञ्च काणादशास्त्रम् (वैशेषिकदर्शनम्) अन्येषामपि शास्त्राणां विद्यमानत्वेऽपि अनयोर्द्वयोः शास्त्रयोः समक्षं नास्ति तादृशमपेक्षितं वैशिष्ट्यञ्च शास्त्राणाम्। यतः सर्वतः प्राग्वैशेषिकाः पदार्थोल्लेखनमेव प्रकुर्वन्ति। उक्तञ्च सूत्रकारेण **"धर्मविशेषप्रसूताद् द्रव्यगुणकर्मसामान्यविशेषसमवायानां पदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानान्निःश्रेयसम्"**।[2] अतः ज्ञायते यत् वैशेषिकसूत्रकर्तुणां महर्षीणां

---

* शोधच्छात्रः, न्यायविभागः, श्री.ला.ब.रा.सं.वि.विश्वविद्यालयः, नवदेहली-110016

1. आभाणकः
2. वैशेषिकसूत्रम्, 1/1/4

मुख्यं लक्षं निःश्रेयसमेव। तत्र इत्थं प्रवादोऽपि दृश्यते तथाहि कणाद-नायाचिरन्तनो महर्षि योगाचारविभूत्यामहेश्वरं तोषयामास। स च महेश्वर उलुकरूपधारी पदार्थतत्त्वं तस्मै उपदिदेश। उपदिष्टं तत्त्वं दशाध्यायीरूपेण वैशेषिकशास्त्रेण व्युत्पादयामास कणभक्षः। अतएवेदं दर्शनमौलूक्यदर्शनमिति व्यपदिशन्ति। अत्र द्रव्यादीनां षण्णां पदार्थानां साधर्म्यवैधर्म्यनिरूपणेन तत्त्वं व्युत्पादितम्। देहातिरिक्तस्यात्मनः सद्भावे प्रमाणानि बहुलतया प्रतिपादितानि। उपक्रमे अवसाने **"तद्वचनादाम्नायस्य प्रामाण्यम्"**[3] इति निरूपयद् इदं शास्त्रं वेदप्रामाण्यस्थापने निर्भरमाविष्करोति। इदं दर्शनं न्यायदर्शनस्य समानतन्त्रमिति व्यवहरन्ति। यद्यपि प्रत्यक्षमनुमानमिति द्वे प्रमाणे स्वीकुर्वन्ति वैशेषिकाः। नैयायिकाः चत्वारि प्रमाणान्यभ्युपगच्छन्ति इति अनयोः। दर्शनयोस्तु विमतिरस्ति। तथापि सा बहुषु संवाददर्शनात् न तयोः अत्यन्तलक्षणभिन्नतां प्रयोजयति। अतएव मुक्तावल्यां विश्वनाथपञ्चाननेन पदार्थनिरूपणावसरे उक्तम् **"एते पदार्थाः वैशेषिकप्रसिद्धाः नैयायिकानामप्यविरूद्धाः"**।[4]

**प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम्।**
**आश्रयः सर्वधर्माणां विद्योद्देशे प्रकीर्तिता॥**[5]

इति भाष्यवचनात् न्यायशास्त्रं सर्वविद्यानां मूलस्तम्भभूत वेद-प्रामाण्यरक्षाहेतुत्वादिति। तद्यथोक्तं न्यायमञ्जरीकारेण' न्यायविस्तारस्तु मूलस्तम्भभूतः सर्वविद्यानां वेदप्रामाण्यरक्षाहेतुत्वादिति न्यायशास्त्रस्य प्रशंसा विद्वज्जनजिह्वाग्रसंचारिणी।

गौतमीयन्यायशास्त्रे द्विविधा धारा प्रवर्तिता, तत्रैका प्रमेयप्रधाना अपरा च प्रमाणप्रधाना। गंगेशोपाध्यायस्य पूर्ववत्तिन्यायविदूषां कृतयः प्रमेयप्रधानाः, गंगेशोपाध्यायस्य तत्त्वचिन्तामणिग्रन्थः प्रमाणप्रधानः। तदाधारीकृत्य परवर्त्तिनां विदूषां ग्रन्थाश्च प्रमाणप्रधानाः। प्रमेयप्रधानग्रन्थाः प्राचीनन्यायत्वेन प्रमाण-प्रधानग्रन्थाः नव्यन्यायत्वेन प्रसिद्धाः सन्ति।

---

3. वैशेषिकसूत्रम्, 1/1/3
4. न्यायसिद्धान्तमुक्तावली, (प्रत्यक्षखण्डे)
5. न्यायभाष्यम्, 1/1/1

न्यायवैशेषिकदर्शनमधिकृत्य विविधाः प्रकरणग्रन्थाः विरचिताः सन्ति। तेषु विश्वनाथपञ्चाननविरचिता 'न्यायसिद्धान्तमुक्तावली' इति ग्रन्थः अत्यन्तं प्रसिद्धः अस्ति। अस्य ग्रन्थस्य विद्वत्समाजे अत्यन्तं समादरम् अस्ति। अस्मिन् ग्रन्थे न्यायवैशेषिकदर्शनप्रतिपादितपदार्थानां प्रतिपादनं सारसंग्रहरूपेण अत्यन्तं सरलरीत्या विहितमस्ति। अतः अस्मिन् ग्रन्थे प्रत्यक्षखण्डे साधर्म्यवैधर्म्यप्रकरणे कारणताविषये आलोचना सञ्जाता। यद्यपि विभिन्न-दार्शनिकानां कारणताविषये भिन्नभिन्नमतं वर्तते। किन्तु अत्र आचार्यैः। कारणताविषये सरलरित्या विहितमस्ति।

अन्यथासिद्धिशून्यत्वे सति कार्यनियतपूर्ववृत्तित्वं कारणत्वम्।। **"अन्यथासिद्धिशून्यस्य नियता पूर्ववृत्तिता, कारणत्वं भवेत् तस्य"**[6] इति कारिकावल्यान्तु उक्तमाचार्यैः। अत्र रासभे अतिव्याप्तिवारणाय 'नियता' इति पदं देयं, पुनः दण्डत्वे अतिव्याप्तिवारणाय अन्यथासिद्धिशून्यत्व" पदं देयम्। अतः कारणतायाः परिस्कृतलक्षणं भवति यत् **"अनन्यथासिद्ध-कार्याव्यहितप्राक्क्षणावच्छेदेन कार्याधिकरणवृत्यन्ताभावप्रतियोगितान-वच्छेदकधर्मवत्वं कारणम्"**[7] बालप्रियाटीकाया मुच्यते आचार्यैः।

कारणता च स्वरूपसम्बन्धविशेषः। यथा इदमस्य कारणम्। कारणतापि एकोऽखण्डधर्मः, यो धर्मः कार्यनिरूपितो भवति, कार्योत्पादके तिष्ठति च। यथा-पटं प्रति तन्तुः कारणम्, अतः तन्तु पटं प्रति नान्यथासिद्धः। पटात्मककार्यस्य अधिकरणे तन्तौ च तन्तुः तादात्म्यसम्बन्धेन वर्तते, अतः तन्तु पटस्य कारणम्। न्यायनये त्रिविधा कारणता सन्नद्धा। यथा समवायिकारणम्, असमवायिकारणम्, निमित्तकारणभेदेन।

**समवायिकारणम्-**

**"यत्समवेतं कार्यमुत्पद्यते तत्समवायिकारणम्। यथा तन्तवः पटस्य पटश्च स्वगतरूपादेः"**[8] इति तर्कसंग्रहे। अर्थात् यस्मिन् द्रव्ये

---

6. कारिकावली, पृ. 72
7. न्यायसिद्धान्तमुक्तावली, (बालप्रियाटीका) पृ. 72
8. तर्कसंग्रहः, पृ. 73

समवायसम्बन्धेन कार्यमुत्पद्यते तत् समवायिकारणम्। निलकण्ठ्यामपि **"यद्वा यद्धर्मावच्छिन्नं यद्धर्मावच्छिन्ने समवायेनोत्पद्यते तद्धर्मावच्छिन्नं प्रति तद्धर्मावच्छिन्नं समवायिकारणम्"**।[9] तथा हि तन्तुषु समवायसम्बन्धेन पटात्मकं कार्यमुत्पद्यते। अतः तन्तुः पटस्य समवायिकारणं भवति। न्यायबोधिनिकारेण **"समवायसम्बन्धावच्छिन्नकार्यतानिरूपिता तादात्म्य-सम्बन्धावच्छिन्नकारणत्वम्"**। अतः समवायसम्बन्धेन पटस्याधिकरणे कपालादौ कपालादेः तादात्म्यसम्बन्धेन न वर्तते। समवायेन घटं प्रति तादात्म्येन कपालं कारणम् इति कार्यकारणभावं बोध्यते। अतः पुनः न्यायबौधिन्याम् **"समवायसम्बन्धावच्छिन्नघटत्वावच्छिन्नकार्यतानिरूपित-तादात्म्यसम्बन्धावच्छिन्नकारणतायाः कपालादौ"**[11] इति लक्षणस्य समन्वयः। अत्र भाषापरिच्छेदे नियमो वर्तते यत्- **"समवायिकारणत्वं द्रव्यमात्रवृत्तित्वम्"** इति।[12]

**असमवायिकारणम्-**

**"कार्येण कारणेन वा सहैकस्मिन्नर्थे समवेतं सत् कारणम् असमवायिकारणम्।"**[13] अत्र अयमभिप्रायः वर्तते, यत् कार्यं कारणेन सह एकाधिकरणे समवायसम्बन्धेन उत्पद्यते। तत् असमवायिकारणं भवति। यथा- तन्तुसंयोगः पटस्य तन्तुरूपं प्रति असमवायिकारणं पटरूपम्। पुनश्च मुक्तावल्याम् असमवायिकारणं द्विविधम्-यथा- कार्यैकार्थ-प्रत्यासत्ति कारणैकार्थप्रत्यासत्याभेदेन।

**प्रथमतः कार्यैकार्थप्रत्यासत्याः- "कार्येण सहैकस्मिन् अर्थे समवेतं सत् यत् कारणं तत्"**[14] कार्यैकार्थप्रत्यासत्तीं भवति। अर्थात् यत्र घटकार्यं प्रति कपालं समवायिकारणं तत्र कपालत्वरूपे एकाधिकरणे

---

9. निलकण्ठी
10. न्यायबोधिनी, पृ. 73
11. तत्रैव
12. भाषापरिच्छेदः श्लो. 23
13. तर्कसंग्रहः पृ. 74
14. न्यायबोधिनी, पृ. 74

कपालद्वयोः संयोगेऽपि एकार्थसमवेतत्वसम्बन्धेन वर्तते। अतः कपालद्वयो संयोगेन घटकार्यं प्रति कार्यैकार्थप्रत्यासत्तिद्वारा असमवायिकारणं भवति। **द्वितीयतः कारणैकार्थप्रत्यासत्ति- "कार्येण सहैकस्मिन्नर्थे समवेतं यत् कारणं"**[15] तत् कारणैकार्थप्रत्यासत्ति भवति। अर्थात् घटरूपं प्रति कपालरूपं असमवायिकारणम्। किन्तु अत्र स्वगतरूपं परस्परम् एकार्थ-समवेतत्वसम्बेन्धेन वर्तते। अतः कारणैकार्थप्रत्यासत्तिं भवति। पुनः भाषापरिच्छेदे विश्वनाथेन उक्तम्- **"असमवायिकारणं च गुणमात्रवृत्ति-र्भवति"**।[16] अर्थात् असमवायिकारणं गुणेकर्मेश्च वर्तते।

**निमित्तकारणम्**- अन्तिमे च निमित्तकारणं, मुक्तावल्यां तु **"आभ्यां समवायिकारणासमवायिकारणाभ्यां परं भिन्नं कारणं तृतीयं निमित्त-कारणम् भवति"**।[17] अर्थात् समवायिकारणासमवायिकारणयोः अनयोः द्वयोः भिन्नं यत् कारणम्, तत् निमित्तकारणम्। तर्कसंग्रहकारेणापि एवं स्वीक्रियते। यथा घटं प्रति दण्डादि, पटं प्रति तुरीवेमादि निमित्तकारणम्। अपरे च भाषापरिच्छेदे विश्वनाथैः उक्तम्- **"आत्मनो विशेषगुणा निमित्तकारणानि"**[18] इति।

नैयायिकानाम् अयं सिद्धान्तः वर्तते यत् कार्यकारणभावश्च समानाधि-करणपदार्थेन वर्तते। अर्थात् व्यधिकरणे पदार्थे कार्यकारणभावं न वर्तते। यथा-घटं कपालद्वयोसंयोगः च अनयोः द्वयोः कपालात्मकमेकाधिकरणे साक्षात् समवायसम्बन्धेन सामानाधिकरणं भवति। तथैव कपालरूपं घटरूपं अनयोः अपि कपालात्मकम् एकाधिकरणे सामानाधिकरण्यं भवति। अतः उपर्युक्ते उदाहरणे एकं साक्षात् समानाधिकरण्यम् अपरञ्च परम्परया भवति इति दिक्।

❑❑❑

---

15. तत्रैव
16. भाषापरिच्छेदः श्लो. 23
17. न्यायसिद्धान्तमुक्तावली, पृ. 72
18. तत्रैव पृ. 44

# न्यायनये सिद्धान्तवादविमर्शः

**-दीपकमण्डलः***

"ऋते ज्ञानान्न मुक्तिः", "विद्यायाऽमृतमश्नुते", "तमेव विदित्वाऽति-मृत्युमेति नान्यः पन्था विद्यतेऽयनाय", "ज्ञानादेव तु कैवल्यम्" इत्यादि श्रुतिवचनाद्रारभ्य पुरुषार्थेषु मोक्षस्य साधनं धर्मार्थकाममोक्षाख्येषु तत्त्वज्ञानमेव। शास्त्राधीनमेव तच्च तत्त्वज्ञानम्, सर्वेदार्शनिकाः निरन्तरं प्रयत्नशीलाः भवन्तीति दृश्यते। मोक्षसाधनमिति तत्त्वज्ञानं केषां जिज्ञासायां नैयायिकैस्तावत्- **"प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डा-हेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः"**[1] इति। एतद् षोडशपदार्थतत्त्वज्ञानं निःश्रेयसस्य प्रतिपादकम्। स तु दुःखानामात्यन्तिक-निवृत्तिरूपं निःश्रेयसं भवति। अतः वैशेषिकैः उक्तं- **"धर्मविशेषप्रसूतात् द्रव्यगुणकर्मसामान्यविशेषसमवायानां पदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानान्निःश्रेयसम्"**[2] इति। सिद्धान्तपदार्थविषये महर्षिणा उक्तम्- **"तन्त्राधिकरणाभ्युपगमसंस्थितिः सिद्धान्तः"** इति।

सर्वेषां विविधः सिद्धान्तः विद्यते- दुःखनिवृत्त्यात्मकमुक्तौ अयमेव सिद्धान्तः। अपि तु समेषां दार्शनिकानां सिद्धान्तः कश्चन विद्यते यथा-

चार्वाकनये- इन्द्रियात्मवादः, देहात्मवादः मन-आत्मवादः प्रत्यक्षमात्र-प्रामाण्यवादश्च।

बौद्धनये- प्रतीत्यसमुत्पत्तिवादः, क्षणिकविज्ञानवादः, क्षणभङ्गवादः, अनात्मवादः, शून्यवादः, आलयविज्ञानवादः।

---

* शोधच्छात्रः, न्यायविभागः, श्री.ला.ब.शा.रा.सं.विश्वविद्यालयः, नवदेहली-110016

1. न्या. सूत्रम्- 1/1/1
2. वै.सू.,1/1/4

जैनानां नये– स्याद्वादः, परोक्षापरोक्षप्रमाणवादः, सप्तभङ्गीनयवादश्च।

सांख्ययोगनये– सत्कार्यवादः, परिणामवादः, ईश्वरवादश्च।

न्यायनये– पिठरपाकवादः, ईश्वरवादः, आरम्भवादश्च।

वैशेषिकनये– पिलुपाकवादः, असत्कार्यवादश्च।

मीमांसानये– अपूर्ववादः, कर्मवादश्च।

वैयाकरणनये– शब्दब्रह्मवादः, व्यापारमुख्यविशेष्यकान्वयबोधवादः स्फोटवादश्च।

अद्वैतनये– ब्रह्माद्वैतवादः, मायावादः, विवर्तवादश्च।

साहित्यिकनये– नवरसवादः, नियतिकृतनियमरहितवादश्चेति सिद्धान्त–रूपेण प्रतिपादनम्।

नैयायिकैः परिगणितेषु षोडशपदार्थेषु मध्ये षष्ठः पदार्थः सिद्धान्तः। **"षिधु संराद्धौ"** इति धातोः कर्तरि क्त प्रत्यये[3] कृते निष्टातस्य धत्वे[4] धस्य च जशत्वेन[5] दकारे कृते सति सिद्धपदः सिद्ध्यति। अन्तशब्दश्च अम् पूर्वकः तन् इति व्युत्पत्त्या निष्पन्नो भवति। सिद्धः निष्पन्नः– प्रमाणेनावधृतः। अन्तः स्वरूपं प्रकारः, यस्य असौ सिद्धान्तः। स च सिद्धान्तः प्रमेयमेव, प्रमेयात् तस्य सिद्धान्तस्य पृथङ्निर्वचनं तु सति सिद्धान्तभेदे वादजल्प–वितण्डात्मिकाः कथाः प्रवर्तन्ते। यथा– व्याकरणमीमांसादिनये शब्दस्य नित्यत्वं न्यायनये तस्यानित्यत्वमिति सिद्धान्तभेदात् नित्यत्वानित्यत्वमतयोः द्वयोः वादजल्पवितण्डेति त्रिविधस्य प्रवृत्तिः स्वीक्रियन्ते। वादिप्रतिवादिभ्यां निर्णीतोऽर्थः। परस्परविरुद्धपक्षावलम्बिनौ तत्त्वनिश्चयाय वादि–प्रतिवादिनो वादकथामारभते। "वादे वादे जायते तत्त्वबोधः"। अतः स्व–स्व–सिद्धान्तं स्व–स्वदृष्टया पुरस्कृत्य वादः प्रचलति। तथा च उक्तम् "प्रमाणतर्कसाधनो–पालम्भः सिद्धान्ताविरुद्धः पञ्चावयवोपपन्नः पक्षप्रतिपक्षपरिग्रहो वादः"

---

3. गत्यर्थकर्मकश्लिषशीङ्स्थासवसजनरुहजीर्यतिभ्यश्च, पाणिनीयसूत्रम्, 3/4/72
4. झषस्तथोर्धो धः, पाणिनीयसूत्रम्–8.2.40
5. झलां जश् झसि, पाणिनीयसूत्रम्–8.4.53।

इति। तत्त्वबुभुत्सैव प्रयोजिका अत्र भवति। अतएव "तत्त्वबुभुत्सोः कथा वादः" इत्युच्यते। **"एकं सद्विप्रा वहुधा वदन्ति"** इत्यागम पक्षप्रतिपक्षभावो प्रेयःश्रेयस्कामनां संसारदुःखपङ्कनिमग्नानां तत्त्वबोधायाभ्युदयनिःश्रेयसाय च परिकल्पते। वेदप्रतिपादितधर्मसिद्धान्तः पौनःपुन्येन विचारमन्थनसिद्धान्तपूर्वकं संस्थापितः। श्लोकवार्तिकेऽपि कुमारिलभट्टः शास्त्रलक्षणे प्रतिपादयति यत्–

**"प्रवृत्तिर्वा निवृत्तिर्वा नित्येत कृतकेन वा।**
**पुंसा येनोपदिश्येत् तच्छास्त्रमित्यभिधीयते।।**[6] इति।

न्यायवार्तिकटीकाकारोऽपि सूत्रमिदं परिष्करोति– **"तन्त्र्यन्ते व्युत्पाद्यन्ते प्रमेयाण्यनेनेति तत्त्वं प्रमाणं, तदेवाधिकरणमाश्रयो ज्ञापकत्वेन येषामर्थानां ते तथोक्ताः"** इति।[7]

पुनश्च यदुच्यते **"न्यायशास्त्रं शास्त्राणां शास्त्रम्"** इत्यपि, न्यायशास्त्रविषये उक्तं यत्–

**"प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम्।**
**आश्रयः सर्वधर्माणां विद्योद्देशे प्रकीर्तिता।।**[8] इति।

सर्वेषां शास्त्राणां न्यायशास्त्रमेव शास्त्रम्। न्यायशास्त्रं हि कस्यचित् शास्त्रस्य यत् प्रतिपाद्यं, तत्प्रतिपाद्यस्य या प्रतिपत्तिः, यो वा निर्णयः चिकीर्षितः, तस्याः प्रतिपत्तेः, तस्याः का रीतिः, को वा प्रकारः इति उपदिशति। यतोहि सर्वेषां शास्त्राणां किञ्चित् प्रतिपाद्यं भवति। वस्तुतः शास्त्रस्य कस्तावत् प्रतिपाद्यं, कया रीत्या ज्ञातुं शक्यते? शास्त्रस्य प्रतिपाद्यं यदिदमित्थञ्चास्य? एतज्ज्ञातस्य काचन रीतिः भवति। न्यायशास्त्रं शास्त्राणां शास्त्रम् अस्मिनर्थे प्रतिपादितम्।

सूत्रकारैः सिद्धान्तसामान्यलक्षणं "तन्त्राधिकरण" इत्यादिसूत्रे उक्तम् "स चतुर्विधः" इति। सूत्रकारैः यतो प्रयुक्तः तस्य कोऽर्थः? इति जिज्ञासायां

---

6. श्लोकवार्तिकम्।
7. न्यायवार्तिकतात्पर्यटीका, सिद्धान्तप्रकरणम्।
8. न्यायभाष्यम्, 1/1/1

भाष्यकारैः उक्तम्–“तन्त्रार्थसंस्थितिः तन्त्रसंस्थितिः, तन्त्रम् इतरेराभिसम्बद्ध–उस्यार्थसमूहस्योपदेशः शास्त्रम्”[9] इति। विश्वनाथेन उक्तम्– “तन्त्रं शास्त्रं तदेवाधिकरणं ज्ञापकतया यस्य”।[10] तथाहि वार्तिककारेण उक्तम्–

**“योऽर्थो न शास्त्रस्तस्याभ्युपगमो न सिद्धान्तः इति।”**[11]

स च सिद्धान्तः कतिविधः इति जिज्ञासायां सूत्रकारैः प्रतिपादितम्–

**“सर्वतन्त्रप्रतितन्त्राऽधिकरणाभ्युपगमसंस्थित्यर्थान्तरभावात्”**।[12] तत्र एताश्चतस्त्रः संस्थितयोऽर्थान्तरभूता विज्ञेयाः। सर्वतन्त्रसंस्थितिः, प्रतितन्त्र–संस्थितिः, अधिकरणसंस्थितिः, अभ्युपगमसंस्थितिश्च, एतासां भेदात् सिद्धान्तभेदोऽपि ज्ञेयः। एतेषां भेदेन निरूपणं, तद्यथा–

### 1. सर्वतन्त्रसिद्धान्तः

“सर्वतन्त्राविरुद्धस्तन्त्रेऽधिकृतोऽर्थः सर्वतन्त्रसिद्धान्तः” इति न्यायसूत्र–कारेण लक्षितम्।[13] अभिप्रायस्तु समेषु तन्त्रेषु स्वीकृतः प्रतिपादितोऽर्थस्तस्य सिद्धान्तः सर्वतन्त्रसिद्धान्त इत्युच्यते, यथा– पृथिव्यादीनि भूतानि शास्त्रकारैः सर्वेरपि स्वीकृतं इति पृथिव्यादीनां भूतानां भूतत्वं सर्वतन्त्रसिद्धान्त इति सूत्रार्थः। घ्राणादीनामिन्द्रियत्वं घ्राणेइन्द्रियग्राह्यत्वं पृथिव्यादीनां भूतत्वं पदार्थस्य प्रमाणेन निश्चयः अर्थात् सर्वशास्त्राभिमतत्वादयः सिद्धान्तः सर्वतन्त्रसिद्धान्तः इति।

### 2. प्रतितन्त्रसिद्धान्तः

प्रतितन्त्रसिद्धान्तविषये सूत्रकारेण निगदितम्– **“समानतन्त्रसिद्धः परतन्त्रासिद्धः प्रतितन्त्रसिद्धान्तः, समानतन्त्रासिद्धः परतन्त्रसिद्धः प्रतितन्त्रसिद्धान्तः वा”** इति पाठभेदः द्विधा उपलभ्यते। उभयोरपि पक्षयोः

---

9. न्यायभाष्यम्, पृ–50
10. न्यायसूत्रवृत्तिः, 1/1/26
11. न्यायवार्तिकम्, पृ–500
12. न्यायसूत्रम्, 1/1/27
13. न्यायसूत्रम्, 1/1/28

उदाहरणमुखेन समन्वयोऽनुचिन्त्यः। स्वशास्त्रसदृशशास्त्रेऽसिद्धः परतन्त्रे प्रतिपादितो यो विषयः प्रतितन्त्रसिद्धान्तः। तन्त्रं तन्त्रं प्रतीति प्रतितन्त्रं प्रतितन्त्रस्य सिद्धान्तः प्रतितन्त्रसिद्धान्तः। यथा– न्यायशास्त्रीयसिद्धान्तः षोडशपदार्थवादः वैशेषिकशास्त्रसिद्धान्तः सप्तपदार्थवादः, न्यायवैशेषिकयोः प्रतितन्त्रसिद्धान्तः उभयत्रारम्भवादस्वीकारेण समानतन्त्रता सत्कार्यवादादीनामा- सिद्धत्वात् समानतन्त्रासिद्धत्वं परस्परं सङ्गच्छते। परतन्त्रेविरुद्धे सांख्ये च सिद्धत्वापरतन्त्रसिद्धान्तत्वं प्रतिपादयितुम्। अतः इत्यादिपाठे समानतन्त्रसिद्धः समन्वेति। पुनश्च सत्कार्यवादिनोरेतयो "आरम्भवादः, सविशेषचेतनावादः" इत्यादिसिद्धान्तः समानतन्त्रयोरुभयोः सिद्धः, किन्तु सांख्येऽसिद्ध परतन्त्रे इति प्रतितन्त्रसिद्धान्त तत्कृतेऽयम् इति बोध्यम्। तात्पर्यटीकाकारैः– "समानं शब्द एकपर्याय इति व्याकृतम्। तद्यथा– समानशब्द एकपर्यायः नैयायिकानां हि समानतन्त्रं वैशेषिकशास्त्रं परतन्त्रञ्च सांख्यादिशास्त्रम्"[14] इति। अत्र समानतन्त्रसिद्धः, परतन्त्रासिद्धः समानतन्त्रासिद्धः परतन्त्रसिद्धः इति द्विधा सूत्रपाठः उपलभ्यते। स तु संगतपरतया न प्रतिभाति। वस्तुतस्तु न्यायवैशेषिकयोः प्रतितन्त्रसिद्धः प्रतितन्त्रसिद्धान्तः इत्येवं सूत्रं पठनीयमिति प्रतिपादितम्।

### 3. अधिकरणसिद्धान्तः

**"यत्सिद्धान्तावन्यप्रकरणसिद्धिस्सोऽधिकरणसिद्धान्तः"** इति लक्षणं सूत्रकारेण कृतम्। यस्यार्थस्य सिद्धावन्येऽर्था अनुषज्यन्ते, न तैर्विना सोऽर्थः सिद्धति, तेऽर्था यदधिष्ठिताः सोऽधिकरणसिद्धान्तः। उक्तञ्च भाष्यकारैः– "यस्यार्थस्य सिद्धावन्येऽर्था अनुषज्यन्ते न तैर्विना सोऽर्थः सिद्धयति तेऽर्था यदधिष्ठाताः सोऽधिकरणसिद्धान्तः"।[15] अपि तु न्याय- वार्तिककाराणामाशयं प्रतिपादयति– "वाक्यार्थसिद्धौ तदनुषङ्गी योऽर्थः सोऽधिकरणसिद्धान्तः"।

अधिकरणसिद्धान्तोदाहरणं च यथा प्रपञ्च-कर्तृत्वेन ईश्वरसिद्धौ सत्यमीश्वरस्य सर्वज्ञात्वादिकं सिध्यति-सर्वज्ञात्वादिकं विना प्रपञ्च-

---

14. न्यायवार्त्तिकतात्पर्यटीका
15. न्यायभाष्यम्, पृ–51

कर्तृत्वानुपपत्तैरितीश्वरसिद्धिरधिकरणसिद्धान्तः परस्परसम्बन्धानां पदार्थानां सिद्धान्तोऽधिकरणसिद्धान्तः इति यावत्। दर्शनस्पर्शनाभ्यामेकार्थग्रहणाद्धेतो इन्द्रियातिरिक्तः आत्मा सिद्धति। तादृशेन्द्रियाद्यसिद्धौ तादृशकर्तृत्वभोक्तृत्वेन क्रमिकपृथगनुभावाश्रयत्वेन च नात्मतत्त्वसिद्धि इति। स अधिकरणसिद्धान्तः बोद्धव्यः। अस्मिन् विषये उदयनाचार्येणापि उक्तम्-

> **"कार्यायोजनधृत्यादेः पदात्प्रत्ययतः श्रुतेः।**
> **वाक्यात्संख्याविशेषाच्च साध्यो विश्वविदव्ययः।।**[16]इति।"

आचार्योक्तदिशा जगत्कर्तृत्वेनेश्वरसिद्धौ, तस्य सर्वज्ञत्वनित्य-ज्ञानोत्पादिकं स्वतः सिद्धं भवति, तदभावे जगत्कर्तृत्वानुपपत्तेरिति सोऽप्यधिकरणसिद्धान्तः।

### 4. अभ्युपगमसिद्धान्तः

अभ्युपगमसिद्धान्तविषये न्यायसूत्रकारेणापि गौतमेन उक्तम्- "अपरीक्षिताभ्युपगमात्तद्विशेषपरीक्षणमभ्युपगमसिद्धान्तः" इति। परकीय-सिद्धान्तस्य परीक्षणार्थं योऽपरीक्षितस्य स्वशास्त्रासिद्धान्तस्य स्वीकारः सोऽभ्युपगमसिद्धान्तः। तत्र- अपरीक्षितस्याभ्युपगमसिद्धान्तः इति सूत्रस्य अन्वयः। भाष्यकारेणोक्तं यत्-"यत्र किञ्चिदर्थजातमपरीक्षितमभ्युपगमते अस्तु द्रव्यं शब्दः स तु नित्यो अर्थोऽनित्यः? इति द्रव्यस्य सतो नित्यताऽनित्यता वा तद्विशेषः परीक्ष्यते सोऽभ्युपगमसिद्धान्तः स्वबुद्ध्यतिशयचिख्यापयिषया परबुद्ध्यवज्ञानाय प्रवर्तते इति।[17] नैयायिकः शब्दं गुणमनित्यञ्च मनुते। मीमांसकश्च तं द्रव्यं नित्यमङ्गीकरोति। न्यायमीमांसामतयोः शब्दस्वरूप-मधिकृत्य परस्परं विवादः। अनेन क्रमेण सूत्रकारैः सिद्धान्तसामान्यलक्षणञ्च सूत्रमुखेन उपस्थापितम्ः।

---

16. न्यायकुसुमाञ्जलिः, 5/1
17. न्यायभाष्यम्, पृ-53।

## सन्दर्भग्रन्थसूची

1. उदयनाचार्यः, न्यायकुसुमाञ्जलिः, सम्पा. श्रीमोहनः भट्टाचार्यः, कोलकाता, पश्चिमवङ्गराज्यपुस्तकपर्षत्, 1995।
2. उद्योतकरः, न्यायवार्त्तिकम्, सम्पा. विन्देश्वरीप्रसादद्विवेदी, दिल्ली, इस्टर्नबुकलिंकर्स, 1986।
3. उद्योतकरः, न्यायवार्त्तिकम्, चौखम्बासंस्कृतसीरिज, वाराणसी।
4. भट्टाचार्यः, विश्वनाथन्यायपञ्चाननः, न्यायसूत्रवृत्तिः, सम्पा. सेख साविर आलि, कोलकाता, संस्कृतपुस्तकभाण्डारः, प्रथमसंस्करणम्, 2015।
5. महर्षिगौतमः, न्यायदर्शनम्, सम्पा. फणिभूषणतर्कवागीशः, कोलकाता, पश्चिमवङ्गराज्यपुस्तकपर्षत्, प्रथमसंस्करणम्, 2089।
6. मिश्रः, शङ्करः, वैशेषिकसूत्रोपस्कारः, सम्पा. सेख साविर आलि, कोलकाता, संस्कृतबुकडिपो, 2010।
7. मिश्रः, वाचस्पतिः, न्यायवार्तिकतात्पर्यटीका, सम्पा. राजेश्वरशास्त्री-द्रविडः, वाराणसी, चौखम्बासंस्कृतसंस्थानम्, द्वितीयसंस्करणम्, 1989।

# शक्तिवादः

**-कृतिसिंघलः***

गदाधरभट्टाचार्यस्य जन्म 1006 इति सङ्ख्याके बङ्गाब्दे जातम्, एवं 1110 इति सङ्ख्याके तेषां देहावसानं जातम्। गदाधरभट्टाचार्यः नव्यन्यायस्य प्रवर्तकः प्रवर्तते। तेषां गादाधरीति नाम विख्याता टीका प्रचलिता अस्ति। गदाधरभट्टाचार्यः चतुष्षष्टि (64) वादान् अलिखत्। तेषु "शक्तिवादः" नाम्ना एकः वादः अस्ति। गदाधरभट्टाचार्यस्य शक्तिवादस्य मूलाधारवाक्यम् अस्ति-

**सङ्केतो लक्षणा चार्थे पदवृत्तिः।**[1]

तस्मिन् संकेतः एव शक्तिः वर्तते-

**शक्तिर्लक्षणा चार्थे पदवृत्तिः।**

अर्थात् अर्थनिरूपिता पदनिष्ठा या वृत्तिः, सा संकेतरूपा लक्षणारूपा च इत्युक्ते। शक्तेरीश्वरसंकेतरूपत्वेन पित्रादिकृतानामाधुनिकसंकेतानां संग्रहो न स्यादिति तदुभयसंग्रहार्थं "संकेतः" इत्युक्तम्। विश्वनाथपञ्चाननः लिखितवान्-

**पदज्ञानं तु करणं द्वारं तत्र पदार्थधीः।**
**शाब्दबोधः फलं तत्र शक्तिधीः सहकारिणी।।**[2]

अत्र पदज्ञानमेव शब्दप्रमाणमिति (साधनम्), पदजन्यपदार्थोपस्थितिः व्यापारः, शक्तिज्ञानं सहकारिणी, शाब्दबोधः फलमिति।

शाब्दबोधस्य अनुकूलः सम्बन्धः वृत्तिः भवति इति वृत्त्याः सम्बन्धे उच्यते-

---

* शोधच्छात्रा, न्यायवैशेषिक-विभागः, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृत-विश्वविद्यालयः, नवदेहली।

1. शक्तिवादः (1/1)
2. न्यायसिद्धान्तमुक्तावली- शब्दखण्डः- 81 कारिका

शक्तिः लक्षणा च- वृत्त्याः द्वे रूपे भवतः।

शक्तेः का स्वरूपेति गदाधरः निरूपयति-

**ईश्वरसंकेतः शक्तिः।**[3]

वा

**ईश्वरेच्छा शक्तिः।**[4]

अत्र इच्छा-पदार्थस्य अपि द्वे रूपे-

**इदं पदममुमर्थं बोधयतु।**[5]

**अस्माच्छब्दादयमथो बोद्धव्यः।**[6]

आचार्याणां मते प्रथमान्त- विशेष्यः, पञ्चम्यान्त- जन्यत्वसम्बन्धः, द्वितीयान्तजनकत्वसम्बन्धः मन्यन्ते। एतत् दिशा अर्थः भवति-

**इदम् पदम् अमुम् अर्थं बोधयतु।**

एतत् अभिन्न-अर्थजनकत्वं बोधविषयतावत् पदम्।

**अस्मात् शब्दात् अयम् अर्थो बोद्धव्य्ः।**

एतत् अभिन्न- शब्दजन्यबोधविषयतावान् अर्थः।

नव्यनैयायिकानां शैल्याम्- **इदं पदममुमर्थं बोधयतु-**

1. इदमर्थविषयकबोधजनकतावद् इदं पदं भवतु इत्याकारिका अर्थ-प्रकारकपदविशेष्यकेश्वरेच्छा शक्तिः।
2. एतदर्थनिष्ठप्रकारतानिरूपितविषयत्वनिष्ठप्रकारतानिरूपितबोध-निष्ठप्रकारतानिरूपितजनकत्वनिष्ठप्रकारतानिरूपितविशेष्यताश्रयपदमिति बोधः।

---

3. शक्तिवादः- पृष्ठ सं- 5
4. शक्तिवादः- पृष्ठ सं- 5
5. शक्तिवादः- पृष्ठ सं- 5
6. सा च शक्तिः साधुष्विवापभ्रंशेष्वपि, शक्तिग्राहकशिरोमणेर्व्यवहारस्य तुल्यत्वात्। लघुमंजूषा, शब्दप्रमाणस्यानुमानेऽन्तर्भावखण्डनम्, पृ.-63।

3. स्वार्थजनकबोधविषयत्वनिष्ठप्रकारतानिरूपितेश्वरेच्छीयविशेष्यता-वत्त्वम्- अर्थस्य पदे सम्बन्धः।

**अस्माच्छाब्दादयमर्थो बोद्धव्यः-**

1. एतत्पदजन्यबोधविषयतावानयमर्थो भवतु इत्यस्मात् पदप्रकारकार्थ-विशेष्यिकेच्छा ज्ञायते।
2. एतत्पदनिष्ठप्रकारतानिरूपितजन्यत्वनिष्ठप्रकारतानिरूपितबोध-निष्ठप्रकारतानिरूपितविषयत्वनिष्ठप्रकारतानिरूपितविशेष्यताश्रयोऽर्थः इति बोधः।
3. स्वपदजन्यबोधविषयत्वनिष्ठप्रकारतानिरूपितेश्वरेच्छीयविशेष्यता-वत्त्वं-पदस्यार्थे सम्बन्धः।

**शक्तिग्राहकाः के?**

नैयायिकैः शक्तिग्राहकम् उच्यते-

**शक्तिग्रहं व्याकरणोपमानकोषाप्तवाक्याद् व्यवहारतश्च।**
**वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः॥**

**व्यवहारात्**- नागेशः एतत् शक्तिग्राहकेषु शिरोमणिः मन्यते। यथा- उपदेष्टृवृद्धेन आज्ञापालकं निर्देशः ददाति यत् "गामानय", "घटमानय", आज्ञापालकः यथा निर्दिष्टं कार्यं करोति। तर्हि समीपे उपविशति अज्ञातबालकः गोमस्य एवं घटस्य रूपं पश्यति। अज्ञातबालकं बोधं जातं यत् गामानय तु गामं किम्, एवं घटमानय तु घटं किम्?। एतेन व्यवहारेण बालकस्य शक्तिग्रहस्य ज्ञानं जातम्।

**व्याकरणात्**- "धातुप्रकृतिप्रत्ययादीनां शक्तिग्रहो व्याकरणाद् भवति।"- इति वैयाकरणानां सिद्धान्तः। यथा- चैत्रः पचति। नैयायिकानां मते "कृतिः" इति पदेन शाब्दबोधः जायते यतोहि कृतिः पदं लाघवम् अस्ति।

**उपमानात्**- उपमानादपि शक्तिग्रहः भवति। यथा- गोनिरूपितगवय-निष्ठसादृश्यसाक्षात्कार-रूपोपमानेन गवयो गवयपदवाच्य इत्याकारकशक्तिग्रहो भवतीति।

**कोषात्**- कोशानां वाक्येभ्यः अपि शक्तिग्रहः भवति। यथा-

**गुणे शुक्लादयः पुंसि गुणिलिङ्गास्तु तद्वति।**
**शीतं गुणे तद्वदर्थाः सुशीमः शिशिरो जडः॥**

**विवरणात्**- एतेन अपि शक्तिग्रहः भवति। यथा- "पचति; पाकं करोति"।

**आप्तवाक्यात्**- आप्तवाक्यादपि शक्तिग्रहस्य ज्ञानं भवति। यथा- "कोकिलः पिकपदवाच्य" इति शब्दात् पिकादिपदानां कोकिले शक्तिग्रहः भवति।

**वाक्यशेषाद्**- एतेन अपि शक्तिग्रहः जातः। यथा- यवपदस्य कङ्गुप्रभृतौ म्लेच्छानां दीर्घशूके च शिष्टानां ज्ञानं भवति-

**वसन्ते सर्वशस्यानां जायते पत्रशातनम्।**
**मोदमानास्तु तिष्ठन्ति यवाः कणिशशालिनः॥**

**प्रसिद्धार्थशब्दसामानाधिकरण्यात्**-

यथा- सत्कृत्यालङ्कृतां कन्यां ददानः कूकुदः स्मृतः। अत्र कन्यादात्रादिषु कूकुदादिपदस्य शक्तिग्रहः भवति।

**पदशक्तिविवेचनम्**

**पुष्पवन्तपदम्**- "पुष्पवन्तौ दिवाकरनिशाकरौ" इत्यमरकोशवाक्याद-स्माभिर्ज्ञायते "दिवाकरनिशाकरौ पुष्पवन्तपदशक्यौ" इति एकशक्तिज्ञानात् चन्द्रसूर्योभयत्वावच्छिन्ने पुष्पवन्तपदस्य शक्तिरिति।

**तत्पदम्**- बुद्धिविषयतावच्छेदकत्वोपलक्षितधर्मावच्छिन्ने तत्पदस्य शक्तिः।

**यत्पदम्**- वक्तृबुद्धिविषयताऽवच्छेदकत्वोपलक्षितधर्मावच्छिन्ने यत्पदस्य शक्तिः।

**युष्मदस्मत्पदे**- स्वघटितवाक्यजन्यबोधाश्रयत्वेनेच्छोद्देश्यतावच्छेद-कत्वोपलक्षितधर्मावच्छिन्ने युष्मत्पदस्य शक्तिः। स्वोच्चारयितृतावच्छेदकत्वोप-लक्षितधर्मावच्छिन्ने अस्मत्पदस्य शक्तिः।

# मनसः अणुत्ववादः

- आरएस्मोनालिसाकविः *

धर्मार्थकाममोक्षाख्येषु चतुर्विधपुरुषार्थेषु मोक्षः एव परमपुरुषार्थः तस्यैव नित्यत्वात्, तच्च 'न स पुनरावर्तते'इति श्रुत्या जायते। मोक्षहेतुं निरुपयितुमेव दर्शनानामुद्भवः सत्स्वपि अनेकेषु दर्शनेषु न्यायदर्शनं मोक्षप्रदायि ईश्वरोपासनारूपं च अतः एवोक्तं श्रीमदुदयनाचार्यैः-

**न्यायचर्चेयमीशस्य मननव्यपदेशभाक्।**
**उपासनैव क्रियते श्रवणानन्तरागता।।**[1]

शिक्षा कल्पः व्याकरणं छन्दः निरुक्तं ज्योतिषञ्चेति वेदाङ्गभूतानि षट् शास्त्राणि। ऋग्वेदः, यजुर्वेदः, सामवेदः, अथर्ववेदश्चेति चत्वारो वेदाः। मीमांसा, न्यायविस्तरः धर्मशास्त्रं पुराणञ्चेति चतुर्दशविद्याः सन्ति। तथा आयुर्वेदः, धनुर्वेदः, गन्धर्ववेदः, अर्थशास्त्रञ्चेत्येतत् साहचर्यावच्छिनत्वेन अष्टादशविद्याः सुसम्पन्ना भवन्ति।

तत्र को पुनरयं न्यायः इति जिज्ञासावशात् न्यायभाष्यकारेण आचार्यवात्स्यायनेन उक्तम्-

**प्रमाणैरर्थपरीक्षणं न्यायः।।**[2]

अत्र वात्स्यायनमतानुसारं प्रत्यक्षानुमानोपमानशब्दप्रमाणैः वस्तुनः परीक्षणं यस्मिन् शास्त्रे क्रियते तदेव न्यायशास्त्रम् इति, नीयते = प्राप्यते, अयनम् = मोक्षः, येनासौ न्यायः अथवा नीयते = अधिगम्यते विवक्षितार्थसिद्धिरनेनाऽसौ न्यायः। तस्य न्यायस्य यद् दर्शनमनुभवस्तदेव न्यायदर्शनं = न्यायशास्त्रमित्यर्थः।

---

* शोधच्छात्रा, न्यायदर्शनविभागः, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालय, नवदेहली।

1. न्यायकुसुमाञ्जलि- 1/3
2. न्यायभाष्यम्- 1/1/1

न्यायशास्त्रः अतिप्राचीनम्, अस्य प्रवर्तकाचार्यः आचार्यः गौतमोऽस्ति। तेन न्यायसूत्राणां रचना कृता। अत एव प्राच्यन्यायदर्शनेषु गौतमप्रणीतं न्यायसूत्रं सर्वप्राचीनमस्ति इति मन्यते। स च ग्रन्थः 'प्रमाण-प्रमेय-संशय-प्रयोजने 'त्यारभ्य हेत्वाभासाश्च यथोक्ताः' इत्येतत्पर्यन्तं पञ्चाध्यायात्मकमस्ति। तत्र प्रत्यध्यायमाह्निकद्वयमस्ति। न्यायशास्त्रम् अतः पञ्चाध्यायी। न्यायसूत्रग्रन्थे दश (10) आह्निकानि, चतुरशीतिः (84) प्रकरणानि, अष्टविंशत्यधिकमेकशतं (528) सूत्राणि, षण्णवत्यधिक-सप्तदशशतपदानि (1796), न्यायशास्त्रं तत्र पञ्चाशीत्यधिकत्र्यशीतिशतं 8385 अक्षराणि च भवन्ति। तत्र गौतमस्य न्यायसूत्रस्य प्रथमं सूत्रं तावत्-

**प्रमाण-प्रमेय-संशय-प्रयोजन-दृष्टान्त-सिद्धान्त-अवयव-तर्क-निर्णय-वाद-जल्प-वितण्डा-हेत्वाभास-च्छल-जाति-निग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः॥**[3]

एतेषु षोडशपदार्थेषु द्वितीयपदार्थः प्रमेयम् अस्ति। तच्च 'आत्म-शरीर-इन्द्रिय-अर्थ-बुद्धि-मनः-प्रवृत्ति-दोष-प्रेत्यभाव-फल-दुःख-अपवर्ग' भेदेन द्वादशविधात्मकं भवति। यथा सूत्रकारेणोक्तम्-

**आत्मशरीरेन्द्रियार्थबुद्धिर्मनः प्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयम्॥**[4]

न्यायदर्शने एतानि एव आत्मशरीरेन्द्रियादयः द्वादशप्रमेयाणि पदार्थरूपेण मन्यन्ते। एतेषां प्रमेयाणां ज्ञानं प्रमाणद्वारा भवति अत एव शास्त्रकाराः वदन्ति- प्रमाणाधीना प्रमेयसिद्धिः। यत् प्रमेयं प्रमाणेन प्रमीयते। इदमेव तथ्यं मनसि निधाय गौतमेन सर्वप्रथमं प्रमाणपदार्थस्य निरूपणं कृतं तथा तदनन्तरं प्रमेयपदार्थाणाम्, एतेषां ज्ञानं च प्रत्यक्षानुमानोपमानशब्दप्रमाणैः क्रियते। प्रमाणद्वारा यस्य साध्यस्य ज्ञानं भवति तत्प्रमेयम्।

केशवमिश्रानुसारेण समवायसम्बन्धेन मनस्त्वजातिः यत्र भवति तन्मनः। मनः अणुपरिमाणकं, आत्मना संयुक्तम्, सुखदुःखादिकरणकं नित्यं च।

---

3. न्यायसूत्रम्- 1/1/1
4. न्यायसूत्रम्- 1/1/9

अस्मिन् संख्या, परिमाणं, पृथक्त्वं, संयोगः, विभागः परत्वापरत्वे, वेगाख्यसंस्कारश्च अष्टौ गुणाः सन्ति। बाह्येन्द्रियाणि मनसः साहाय्येन स्वान् विषयान् गृह्णन्ति। अतः सर्वविषयाणामुपलब्धिकारणं मन एव भवति। अतीन्द्रियत्वात् मनसः साक्षात्कारो न जायते। तद्धि अनुमानेन सिद्ध्यति–

**सुखसाक्षात्कारः सकरणकः जन्यसाक्षात्कारत्वात् चाक्षुष–साक्षात्कारवत् इत्यनुमानेन मनसः करणत्वसिद्धिः॥**[5]

अत्र विश्वनाथः सुखादिसाक्षात्कारे मनः एव करणम्। अन्नंभट्टः अपि तथैव समर्थितवान्। तर्कदीपिकायामपि मनसो लक्षणं 'स्पर्शरहितत्वे सति क्रियावत्वमित्युक्तम्'–

**साक्षात्कारे सुखादिनां करणं मन उच्यते॥**[6]

येन जगति निखिलाः व्यवहाराः प्रवर्तन्ते येन च ज्ञानेच्छासुखादयः सम्पाद्यन्ते यत्र चागते सति दोषे विक्षिप्तोन्मत्तप्रमत्ताः निर्दोषं च सद्विचार–ज्ञानशीलसम्पन्नाः भवन्ति तस्यैव नाम मनः इति। "चेतः समुत्कण्ठ्यते" इति कालिदासोक्तवचनरीत्या अत्र मदीयश्चेतः चित्तविषये किमपि वक्तुं समुत्कथ्यते।

तत्र तावन्नैयायिकैः घटपटादिबाह्यवस्तुप्रत्यक्षे यथा चक्षुरादीन्द्रियाण्य–पेक्ष्यन्ते तथैव ज्ञानसुखदुःखेच्छाद्वेषप्रयत्नादीनां प्रत्यक्षार्थं साधनत्वेन मनः अपेक्ष्यते इति प्रतिपादितम्। एतत्सादृश्येनैव सकलान्यपीन्द्रियाणि विषयान–वगच्छन्ति। एतस्यानवधाने इन्द्रियार्थसन्निकर्षेऽपि पश्यन्नपि न पश्यतीतिवत् ज्ञानं न सञ्जायते। एवं एतन्माध्यमेनैव सुखादीनामुपलब्धिः। तदुक्तं भाषा–परिच्छेदे– "साक्षात्कारे सुखादीनां करणं मन उच्यते" इति। "सुखाद्यु–पलब्धिसाधनमिन्द्रियं मनः"[7] इति अन्नंभट्टेनः उक्तम्। स्पर्शरहितत्वं सति क्रियावत्वमिति तर्कदीपिकायाम्, मनस्त्वजातिमत्वमिति तर्कभाषाकृद्भिः केशवमिश्रैः निगदितम्। यदि मनो न स्वीक्रियते चेत्तर्हि ज्ञानेच्छादीनामुत्पत्तिरपि

---

5. कारिकावली टीका–
6. कारिकावली का. सं– 85
7. तर्कसङ्ग्रहः . पृ.सं– 42

स्याद्यतः पुरीतत् नामकनाडीप्रदेशात् बहिः शरीरावच्छेदेन यदा आत्ममनसो संयोगः तदानीमेवात्मगुणानामुत्पत्तिः सञ्जायतेऽतो मनोऽपरिहार्यमिति। पर अतीन्द्रियत्वात् तस्य प्रत्यक्षं न जायतेऽपि तु अनुमानं क्रियते। अनुमान-स्वरूपमेवम्- सुखादिकं चक्षुरादिभिन्नेन्द्रियग्राह्यं चक्षुराद्यभावेऽपि ग्राह्यत्वात् कुठारभिन्नवह्निजन्यपाकक्रियावत्।

सांख्यशास्त्रे मनो नाम इन्द्रियाणां नियन्त्रकः, ज्ञानेन्द्रियकर्मेन्द्रियोभयोः कार्यसम्पादकत्वादस्य उभयेन्द्रियत्वेन व्यवहारः। लक्षणन्तु संकल्पविकल्पात्म-कत्वे सति मनस्त्वजातिमत्वमिति तदुक्तम् ईश्वरकृष्णेन-

**उभयात्मकमत्र मनः संकल्पमिन्द्रियञ्च साधर्म्यात्।**
**गुणपरिणामविशेषान्नानात्वं बाह्यभेदाश्च॥**[8]

मीमांसकमतेऽपि तार्किकसिद्धान्तानुकूलं सुखदुःखादिप्रत्यक्षकरणत्वेन अन्तरिन्द्रियरूपेण च मनः अभ्युपगम्यते। उक्तञ्च प्रभाकरेण प्रकरणपञ्चिकायां मनसोऽभ्युपगमे सकलात्मगुणोदय एव प्रमाणम्। बुद्धिसुखदुःखेच्छाद्वेषप्रयत्ना-दृष्टसंस्काराणां नवानामपि वैशेषिकगुणानां मनः संयोगेनैवोत्पत्तेरिति। तत्र प्रभाकरमते आत्ममनसोः संयोगः ज्ञानस्यासमवायिकारणम्, आत्मा च समवायिकारणमिति उभयोः संयोगः आत्मनः प्रयत्नेन पूर्वजन्मोत्पन्नादृष्टेन वा भवति आत्मानं स्वविशेषगुणानां ज्ञानं मनसैव जायते।

भाट्टमतेऽपि सुखादिसाक्षात्कारकरणत्वेन इन्द्रियत्वेन च मनसः सिद्धिः। तदुक्तं श्लोकवार्तिके-

**मनसस्त्विन्द्रियत्वेन प्रत्यक्षा धीः सुखादिषु।**
**मनसा संप्रयुक्तो हि तानात्मा प्रतिपद्यते॥**[9]

अद्वैतवेदान्तरीत्या मनः अन्तःकरणरूपमेव मनबुद्धिचित्ताहंकारादि नाम्ना व्यवह्रियमाणः अन्तःकरणम् एव वृत्तिभेदेन सुखदुःखबन्धमोक्षादीनां हेतुः सज्जायते। अन्तःकरणमेव संशये सति मनः, निश्चये सति बुद्धिः,

---

8. सांख्यकारिका
9. श्लोकवार्तिकः

गर्वे सत्यहंकारः, स्मरणे सति चित्तमिति विविधरूपेण व्यपदिश्यते। तदुक्तं ब्रह्मसूत्रशाङ्करभाष्ये–

**वृत्तिभेदेन मनोबुद्ध्यहंकारचित्तव्यपदेशी भजनमतः॥**[10]

सुखदुःखबन्धमोक्षादिसर्वव्यवहारकारणं व्यवहारमात्रस्यैवान्तःकरण-वृत्तिविशेषजन्यत्वादित्यद्वैतवेदान्तिनः प्राहुः।

विशिष्टाद्वैतवादिरामानुजमते मनः सांख्यवन्नोभयेन्द्रियमपितु पञ्च-ज्ञानेन्द्रियवत् ज्ञानेन्द्रियमेव, स्मृत्यादीनां कारणत्वेन तस्येन्द्रियत्वम्। एक एव मनः वृत्तिभेदेन बुद्धिचित्ताहंकारादिनाम्ना बुध्यतेऽयमस्ति रामानुजीयानां निष्कर्षः। चार्वाकमते यथा शरीरातिरिक्तं नास्ति आत्मा तथैव मनोऽपि न विद्यते।

जैनदर्शने मनः स्वीक्रियते परञ्च तस्य नेन्द्रियत्वेन व्यवहारः। सकलान्यपि बाह्येन्द्रियाणि स्वविषयग्राहकत्वादिन्द्रियाणीति रूपेण व्यवह्रियते परञ्च मनः सर्वार्थग्राहकत्वेऽपि नेन्द्रियमिति जैनराद्धान्तः। एतन्मते द्विविधं मनः–द्रव्यमनः भावमनश्च। कर्मसंघातादुत्पद्यते यन्मनः तद्द्रव्यमनः यच्च चेतनापरपर्यायभूतं तद् भावमन इति।

बौद्धदर्शनेऽपि देहबुद्ध्यतिरिक्तत्वेन मनः कल्प्यते परिगणितेषु द्वादशविधायतनेषु इदं मनोऽन्यतमं स्थानं विभर्ति। तदुक्तं शान्तरक्षितेन–

**ज्ञानेन्द्रियाणि पञ्चैव तथा कर्मेन्द्रियाणि च।**
**मनो बुद्धिरिते प्रोक्तं द्वादशायतनं बुधैः॥**

अत्रेदं चिन्त्यं यदेतन्मते तत्त्वविज्ञानाद्यतिरिक्तं मनः किञ्चिदपि न।

नैयायिकमते मनोऽणुरेव यतः यदि मनसः विभुत्वं स्यात्तर्हि आत्मनः व्यापकत्वेन विभुद्वयस्य संयोग एव न स्यात् तर्हि किञ्चिदपि ज्ञानं नोत्पद्येत, यदि च संयोगः स्यात्तर्हि एककालावच्छेदेन सर्वं ज्ञानमुत्पद्येत न भवत्येवमपि तु ज्ञानं क्रमशः उत्पद्यतेऽतः मनो न विभुरिति नैयायिकसिद्धान्तः। तदुक्तं भाषापरिच्छेदे–

---

10. ब्रह्मसूत्रशाङ्करभाष्ये– 2/4/17

**"अयौगपद्याज्ज्ञानानां तस्याणुत्वमिहेष्यते"**। एवमेतन्मते प्रतिशरीरं मनः एक एव। न च एककालावच्छेदेन बहूनि कार्याणि कथमिति चेत् तर्हि न हि तत्र मनसः बहुत्वमपितु एक एव मनः द्रुतगतित्वात्सर्वं सम्पाद्यते परञ्च तत्रापि पौर्वापर्यभावः विद्यते।।

योगदर्शने तु सांख्यदर्शनवन्न मध्यमपरिमाणकमपितु विभुपरिमाणवन्मनः इति निर्णयः। विभुपरिमाणं स्वीकृते सति प्रति जीवः सर्वज्ञः स्यादिति न शंकनीयम् यतः प्रतिशरीरवृत्तिमनसः प्रवृत्तिरदृष्टवशात् विशिष्टविषय एव भवति अतो न सर्वज्ञत्वापत्तिः। उक्तञ्च व्यासभाष्ये–"वृत्तिरेवास्य विभुःसंकोच–विकासिनीत्या चायं तच्च धर्मादिनिमित्तापेक्षमिति। आचार्यविज्ञानभिक्षुनापि योगवार्तिके विभुत्वं प्रतिपादितम्– धर्माधर्मवासनाश्रयतया प्रतिपुरुषमन्तःकरणं नित्यम्। तच्च नाणु सम्भवति योगिनां सर्वावच्छेदेन एकदा अखिलसाक्षात्कार–सम्भवात्, नान्तःकरणं मध्यमपरिमाणवत् प्रलये विनाशेन धारणानुपपत्तेः। अतः परिशेषतोऽन्तःकरणं विभु एव सिद्ध्यति।

वाचस्पतिमिश्रेणापि तत्त्ववैशारद्यां निगदितम्–

एतन्मते मनः नित्यं किन्त्वत्र जिज्ञासोदेति यत् नित्यं त्वजन्यं भवति इदं खलु सात्त्विकाहंकारजन्य अतो न नित्यमिति न वाच्यं यतः एतत्समाधानं विज्ञानभिक्षुणा एवं कृतम्–

कार्यकारणरूपभेदेन मनसः द्वैविध्यमिति कार्यरूपेण मनः अनित्यं कारणरूपेण च नित्यमिति योगसिद्धान्तः।

मीमांसकप्रवरप्रभाकरमतानुसारेण मनः अणुपरिमाणवद् भवति। यदि मनः विभुः स्यात्तर्हि उभयोः संयोग एव न स्यात् किमपि ज्ञानं नोत्पद्येत अतः मनोऽणुरेव। अणुत्वान्नित्यमपि।

अद्वैतवेदान्तमते तु "तन्मनो कुरुत" एतस्माज्जायते प्राणः मनः सर्वेन्द्रियाणि च इति श्रुत्या मनसः अनित्यत्वं परिच्छिन्नत्वं प्रतिष्ठापितम् सहैव मनसः भौतिकत्वमपि साधितम्।

"रामानुजदर्शनेऽपि **'अन्तरिन्द्रियं परिच्छिन्नं मनः एक एव।।**[11]

---

11. ब्र. सू. श्रीभा– 4/23

रामानुजीयानां वेदान्तिनां मते एकमेवान्तःकरणं मनः।

किञ्च मनसो विभुत्वे तत्र क्रियाऽभावेन संयोगाऽनुपपत्तिः नित्य-संयोगस्य तु सार्वदिकतया सुषुप्तावपि विषयावभासप्रसंग इत्यपि बोध्यम्। भौतिका एव परमाणवो मनांसि अनन्तधर्मिणाम् अतिरिक्तायाश्च जातेः कल्पनाऽपेक्षया क्लृप्तानामेव धर्मिणां तद्रूपेण हेतुत्वस्य युक्तत्वात् ज्ञानक्रम-नियमस्तु अदृष्टादिबलादुपपद्यते इति वदन्ति।

## सन्दर्भग्रन्थसूची


1. कारिकावली- विश्वनाथः, स.- हरिरामशुक्लशास्त्री, काशीसंस्कृत-सीरीज- 6, वाराणसी- 1972।
2. तर्कसंग्रहः- दीपिकासहिता, अन्नंभट्टः, मोतीलालबनारसीदासः, देहली- 1971।
3. न्यायभाष्यम्- वात्स्यायनः, सं.- नारायणमिश्रः, काशी संस्कृत-ग्रन्थमाला, वाराणसी- 1970।
4. न्यायसिद्धान्तमुक्तावली- पं श्रीकृष्णवल्लभाचार्यः- चौखम्बासंस्कृत-संस्थानम्, वाराणसी- 2005।
5. न्यायसूत्रम्- गौतमः- सं. नारायणमिश्रः, काशीसंस्कृतग्रन्थमाला-43, वाराणसी- 1997।
6. वैदिकदर्शनविमर्शः (डॉ महानन्दझा)- अमरप्रिंटिंगप्रैस, देहली-110009, प्रकाशनवर्षः- 2015।
7. साङ्ख्यकारिका- चौखम्बासुरभारतीप्रकाशनम्।


❑❑❑

# अद्वैतवेदान्तदर्शने अवच्छेदवादविमर्शः

**-अनुपमण्डलः ***

भामतीप्रस्थानस्य मुख्यः सिद्धान्तः अवच्छेदवादः अस्ति। अस्य वादस्य मूलभूतानि तत्त्वानि पूर्ववर्तिवाङ्मयेऽपि उपलभ्यन्ते। शांकरभाष्यम् अस्य मुख्य आधारः अस्तीति सुस्पष्टमेव। जीवब्रह्मणोः पारस्परिकसम्बन्धः कीदृशः? अविद्यायाः सम्बन्धः जीवेन सह ब्रह्मणा सह च कीदृशः? इत्येतान् एतादृशान् अन्यान् च प्रश्नान् समाधातुं वाचस्पतिना अवच्छेवादस्य प्रवर्तनं कृतम्।

अत्रैतत् ज्ञातव्यं वर्तते यत् उपर्युक्तानां प्रश्नानाम् एव समाधानाय सुरेश्वराचार्येण आभासवादस्य तथा पद्मपादेन प्रकाशात्मयतिना च प्रतिबिम्बवादस्य उद्भावनं कृतम्। अतः एतेषां वादानां मध्ये एकस्य निरूपणम् आकलनं वा अन्ययोः द्वयोः आकलनं विना सम्यग्रूपेण प्रतिपादनं सम्भवं नास्ति। अत्र अवच्छेदवादविषये आलोचना क्रियते।

जीवेश्वरयोः औपाधिकः भेदः न तु पारमार्थिकः इति अद्वैतीनां सिद्धान्तः। अवच्छेदवादानुसारम् अन्तःकरणावच्छिन्नं चैतन्यं जीवः, अविद्या-वच्छिन्नं चैतन्यम् ईश्वरः। ईश्वरस्य उपाधिः माया, जीवस्य उपाधिः अन्तःकरणम्। ब्रह्मणः सखण्डाभिव्यक्तिः। जीव-ब्रह्मणोः सम्बन्धः घटाकाश-महाकाशयोः इव वर्त्तते। "अंशो नानाव्यपदेशात्"[1] इत्यादि सूत्रेषु च परमात्मनः अंशत्वेन जीवस्वरूपकथनात् अयम् अवच्छेदवादः अंशवादो वा सूत्रकाराणाम् अभिप्रेतः। एवमेव "ममैवांशो जीवलोके जीवभूतः सनातनः"

---

* शोधच्छात्रः, अद्वैतवेदान्तविभागः, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्व-विद्यालयः, नवदेहली।

1. ब्र.सू. 2.3.43

इति भगवद्गीतावाक्यमपि जीवस्य ब्रह्मांशत्वं प्रतिपादयति– इति भामती–पन्थिनोऽभिप्रयन्ति।

"न स्थानतोऽपि" इत्यादि सूत्रेणे भाष्यकारेण स्वयं प्रतिबिम्बवादः निराकृतः। अस्यैवाधिकरणस्य अत एव चोपमा सूर्यकादिवत् 'इति सूत्रे जलसूर्यदृष्टान्तग्रहणात् प्रतिबिम्बवादः एव सूत्रकारसम्मतः' इति प्रतिबिम्बवादिभिः उच्यमाने अवच्छेदवादिभिः उच्यते– 'अम्बुवदग्रहणात्तु न तथात्वम्' इति उत्तरसूत्रे एव भाष्यकारेण सर्वगतस्य आत्मनः प्रतिबिम्बत्वं निराकृतम्। अम्बुसूर्यादिभ्यो गर्तेभ्यः विप्रकृष्टे देशे वर्तते। आत्मा तु अमूर्तः। तस्य च सर्वव्यापितत्वात् तस्मात् विप्रकृष्टदेशे वर्तमानं प्रतिबिम्बयोग्यं न किमपि वस्तु अस्ति। अतः सर्वगतस्य आत्मनो प्रतिबिम्बः न युक्तः। ब्रह्मणः सूर्यवत् प्रतिबिम्बत्वे न किञ्चिदपि तात्पर्यम्।

अत्र यथा सूर्यः जले प्रतिबिम्बितः सन् जलगतकम्पनाद्युपाध्यधीनो भवति, तथा ब्रह्मणि अन्तःकरणादिपरिच्छिन्नं सत् अन्तःकरणगत–सुखदुःखादिभागं भवति। अतएव चोपमा सूर्यकादिवर्ता इत्यस्य सूत्रस्य तात्पर्यं न तु ब्रह्मणः सूर्यवत् प्रतिबिम्बत्वे। वाचस्पतिमिश्रैः अवच्छेदवादम् अवलम्ब्य नीरूपस्य चैतन्यस्य नीरूपे अन्तःकरणाद्युपाधौ प्रतिबिम्बत्वं निराकृतम्। तथा चोक्तम्–"रूपवद्धि द्रव्यम् अतिस्वच्छतया रूपवतो द्रव्यान्तरस्य तद्विवेकेन गृह्यमाणस्यापि छायां गृह्णीयात्। चिदात्मा तु अरूपो विषयो न विषयच्छायाम् उद्ग्राहयितुम् अर्हति। यथाहुः– **"शब्दगन्धरसादीनां कीदृशी प्रतिबिम्बिता"** इति। उदके तु न गगनस्य प्रतिबिम्बः, किन्तु आलोकस्य नक्षत्रादीनां वा अविद्योपाधानकल्पितावच्छेदो जीवः परमात्म–प्रतिबिम्बकल्प" इत्यत्र अविद्योपाधानं च यद्यपि विद्यास्वभावे परमात्मनि न साक्षादस्ति। तथापि तत्प्रतिबिम्बकल्पजीवद्वारेण परस्मिन् उच्यते इत्यत्र च जीवस्य प्रतिबिम्बसादृश्यकथनात् प्रतिबिम्बवादः भामतीपन्थिभ्यः असम्मतः।

भामतीपन्थिनामेतदपि कथनं वर्तते यत् "यथा घटाकाशो नाम न परमाकाशादन्यः" इत्यादि ग्रन्थे घटाकाशोदाहरणेन "स एव तु (परमात्मा) अविद्योपाधानभेदात् घटकरकाद्याकाशवत् भेदेन प्रथते" इत्यत्र औपाधिकत्वाच्च

"भेदस्य घटकरकाद्याकाशवत् विरुद्धाधर्मसंसर्गस्योपपत्तेः" इत्यत्र च जीवस्य घटकरकाद्याकाशवत् अवच्छिन्नत्वोक्त्या अवच्छेदवादः एव सूत्रकारेण प्रतिपादितः वाचस्पतिमिश्राणां मते अनाद्यविद्यावशात् सच्चिदानन्दं ब्रह्म क्रियाशक्तिः भोगशक्तिर्वा सम्भवति। यस्य च बुद्ध्यादेः कार्यकारणसंघातस्य कर्तृत्वेन भोक्तृत्वेन च प्रत्यवभासते। न हि उदासीनस्य निष्क्रियस्य आत्मनः कियाशक्तिः न तस्य चैतन्यम्।

वाचस्पतिमिश्राः अवच्छेदवादिनः सन्तीति स्पष्टमेव घटाकाशादि-दृष्टान्ताः हि अवच्छेवादे एव उपयुज्यन्ते। "अवस्थितेरिति काशकृत्स्नः" इति सूत्रभाष्यस्य[2] व्याख्याने वाचस्पतिः कथयति "न जीव आत्मनोऽन्यः" नापि तद्धिकारः, किन्त्वात्मैवाविद्योपाधानकल्पितावच्छेदः। आकाश इव घटमणिकादिकल्पितावच्छेदो घटाकाशो मणिकाकाशो न तु परमाकाशादन्य-स्तद्विकारो वा ततश्च जीवात्मनोपक्रमः परमात्मनैवोपक्रमतस्तस्य ततो भेदात्।"[3]

कैश्चित् विद्वभिः एषा शंका उद्भाव्यते यत् "अंशो नानाव्यपदेशात्" इत्यादिसूत्रभाष्याणां व्याख्यानप्रसंगे वाचस्पतिमिश्रः अपि जीवस्य ब्रह्म-प्रतिबिम्बत्वं स्वीकृतमिति। तद्यथा "यथा च दर्पणापनये तत्प्रतिबिम्बं बिम्बभावे अवतिष्ठते न कृपाणो प्रतिबिम्बितमपि एवम् अविद्योपाधानाविगमे जीवे ब्रह्मभाव इति सिद्धं जीवो ब्रह्मांश इव तत्तन्त्रतया न त्वंश इति तात्पर्यार्थः" "एवं प्रकारेण वाचस्पतिमिश्राः अपि प्रतिबिम्बवादिनः इति केचन वदन्ति। किन्तु परिमलकारैः समन्वयाधिकरणस्य उपसंहारे अस्य आरोपस्य प्रत्याख्यानम् एवं कृतम्- "तस्मादवच्छेदपक्षे न सूत्रादिविरोधशङ्का तत्र तत्र प्रतिबिम्बत्वव्यवहारस्तु वृद्धिह्रासभावत्वसूत्रक्लृप्तसादृश्यमूलो गौणः। न हि ज्वलनाभिन्नत्वेनावगते माणवके अग्निरधीते अग्निरागच्छतीत्यादि प्रयोगसहस्रसत्त्वेऽप्यग्निशब्दो माणवके मुख्यत्वम् अश्नुवीत, अन्तःकरणकृत-स्यैवात्मनो जीवान्तर्यामिभावेन भेदस्त्वविद्याश्रयत्वतद्विष्यत्वान्तःकरणं संवलितत्वन्तु संङ्कलितत्वाधमेष उपपद्यते, अन्यथा सकलप्रपञ्चविवर्ताधिः

---

2. भामती, 1.1.1 पृ.8
3. ब्र.सू., 1.4.22

"षडस्माकमनादय" इति सिद्धान्ते जीवेश्वरभिन्नत्वेनाभ्युपगतस्य जीवेश्वर-तद्भेदादि सकलप्रपञ्चविवर्ताधिष्ठानत्वेन सर्वगतस्य शुद्धचैतन्यस्याप्यन्तः-करणे सत्त्वमवर्जनीयं, तत्तु प्रतिबिम्बपक्षमाश्रित्य द्विगुणीकृत्य वृत्त्युपपादनेनापि न निर्वहतीति त्रिगुणीकृत्य हरिरूपपादनीया भवेत् प्रतिब्रह्मोपासनमुपास्य-धर्मिभेदस्याचार्यैरानन्दमयाधिकरणारम्भे वक्ष्यमाणत्वात्।"

## अवच्छेदवादस्य विरुद्धं प्रतिबिम्बवादिनामाक्षेपाः

उपर्युक्तानां भाष्यवाक्यानाम् अनुसारं यद्यपि अवच्छेदवादस्य निरूपणं वाचस्पतिमिश्रप्रभृतिभिः कृतं, तथापि भाष्ये एतादृशानि कथनानि अपि सन्ति, येषाम् अनुसारं प्रतिबिम्बवादस्यापि प्रतिपादनं संजायते। जीव-ब्रह्मणोः अभेदप्रतिपादनाय जलप्रतिबिम्बस्यापि ये दृष्टान्ताः प्रस्तुताः तेषु प्रतिबिम्बवादस्य बीजानि उपलभ्यन्ते। तद्यथा (क) 'अत एव चोपमा सूर्यकादिवत्' इत्यस्य सूत्रस्य 'एकैव हि भूतात्मा भूते भूते व्यवस्थितः। एकधा बहुधा चैव दृश्यते जलश्चन्द्रवत्।" इति वाक्यमुदाहृत्य भगवता शंकराचार्येण प्रतिबिम्बवादस्य समादरः कृतः। (ख) प्रश्नोपनिषदः शांकर-भाष्येऽपि निम्नलिखितानि वचनानि उपलभ्यन्ते- "ज्ञानस्यैकत्वोपपत्तेः सर्वदेशकालपुरुषाद्यवस्थमेकमेव ज्ञानं नामरूपाद्यनेकोपाधिभेदात्सवित्रादि-जलादिप्रतिबिम्बवत् अनेकधावभासत इति।

"स एष प्रज्ञानरूप आत्मा ब्रह्म परं सर्वशरीरस्थः प्राणः प्रज्ञात्मा अन्तःकरणोपाधिष्वनुप्रविष्टो जलभेदगतसूर्यप्रतिबिम्बवत् हिरण्यगर्भः प्राणः प्रज्ञात्मा। एष एवेन्द्रो गुणाद्देवराजो वा।"[4]

बृहदारण्यकोपनिषदः शांकरभाष्येऽपि प्रतिबिम्बवादस्य परामर्शः दृश्यते तद्यथा- "तस्य प्रतिबिम्बाख्यस्य पुरुषस्य निष्पत्तिरसो प्राणात्। बुद्ध्याद्युपाधि-स्वभावानुविधायी हि सः, चन्द्रादिप्रतिबिम्ब इव जलाधनुविधायी।" ऐतरेयोप-निषदः शांकरभाष्येऽपि प्रतिबिम्बवादस्य उल्लेखः दृश्यते।

"ब्रह्मसूत्रशांकरभाष्ये एतदपि स्पष्टीकृतं वर्तते यत् उपाधेः प्रभावः प्रतिबिम्बे पतति न तु बिम्बे तद्यथा- यथा चोदकशरावादिकम्पनान्तद् गते

4. ऐ.उ.शा.भा., 3/3, पृ.86

सूर्यप्रतिबिम्बे कम्पमानेऽपि न तद्वानसूर्यः कम्पते, एवमविद्याप्रत्युपस्थापित-बुद्ध्याद्युपहिते जीवाख्येऽशेदुःखायमानेऽपि न तद्वानीश्वरो दुःखायते। जीवस्यापितुदुःखप्राप्तिरविद्यानिमित्तैवेवैत्युक्तम्।" एतद्वशानाम् अन्येषां च भाष्यवाक्यानाम् आश्रयं गृहीत्वा प्रकाशात्मयति प्रभृतिभिः प्रतिबिम्बवादस्य समर्थनं प्रवर्तनं च कृतम्। तद्यथा-

(क) जीव : प्रतिबिम्बश्चेत् न बिम्बात्मतामवगन्तुमलं प्रतिबिम्बात् अक्षिपात्रगतदेवदत्तप्रतिबिम्बवत्- इत्येतन्निष्टे 'देवदत्तस्यात्ते तनांशस्य' इति। अचेतनत्वप्रयुक्ता तत्रानवगतिः, न प्रतिबिम्बत्वप्रयुक्ता, घटादिषु तथा दर्शनात् इति भावः।[5]

ननु देवदत्तस्यैव बिम्बस्य भ्रमनिवर्तकतत्त्वज्ञानाश्रयत्वं दृष्टम्। एवं बिम्बत्वात् ब्रह्मण एव भ्रमनिरासितत्वज्ञानाश्रयत्वं स्यात्, इति। नेति 'यस्य हि भ्रान्तिः' इति। न बिम्बत्वकृतं तत्त्वज्ञानाश्रयत्वम्, किन्तु भ्रान्तत्वकृतम्, तदपि जीवत्वनिमित्तमितिभावः।

अवच्छेदवादस्य विपरीतं प्रतिबिम्बवादस्य समर्थने विवरणकारस्य एतत् कथनम् अवधेयं वर्तते- "ननु घटकाशवदुपाध्यवच्छिन्नो जीवः किं न स्यात्? सामान्यविशेषाभ्याम् उपाधिभिरण्डान्तवर्तिब्रह्मणाः सर्वात्मना जीवभावेनावच्छिन्नत्वात् अनवच्छिन्नस्य ब्रह्मणोऽण्डाद्बहिरेव सद्भावप्रसंगात्। तत्र सर्वगतसर्वनियन्तृत्वादिब्रह्मणो न स्यात्। अवच्छिन्नप्रदेशेष्वनवच्छिन्नस्य द्विगुणीकृत्य इत्ययोगात्। स्वरूपापेक्ष्या तत्सर्वं न बहिस्थितब्रह्मापेक्षया इति चेत्, न। 'यो विज्ञाने तिष्ठन् इत्यादौ जीवव्यतिरिक्तस्यैव ब्रह्मणो जीवसंनिधानेन विकारान्तरावस्थानश्रवणात्। प्रतिबिम्बपक्षे तु जलगतस्वाभाविकाकाशे सत्येव-प्रतिबिम्बाकाशप्रदर्शनात् एकत्रैव द्विगुणीकृत्य वृत्युपपत्तेः, जीवावच्छेदेषु ब्रह्मणोऽपि नियन्तृत्वादिरूपेणावस्थानम् उपपद्यते इति प्रतिबिम्बपक्ष एव 'श्रयान्' इति।

प्रतिबिम्बवादस्य निरूपणेन सदैव विवरणकारः प्रकाशात्मयतिभिः प्रतिबिम्बवादस्य समर्थनाय अवच्छेदवादे अनेके दोषाः संदर्शिताः। तद्यथा-

5. प.पा.वि., पृ.64

(क) यदि अवच्छेदवादः आश्रीयते तर्हि अन्तर्याभिर्ब्रह्मणः संगतिः नोपपद्यते। बृहदारण्यकोपनिषदि 'यः आत्मानमन्तरीयमति' इत्यादिश्रुतौ एतदुक्तमस्ति यत् जीवब्रह्मात्मनि अन्तर्यामिरूपेण अवस्थीयते। यदि जीवः अन्तःकरणोपाध्यवच्छिन्नं चैतन्यमस्तीति स्वीक्रियेत तर्हि तस्मिन् अवच्छिन्नं चैतन्यरूपं ब्रह्म अवस्थातुं न शक्नोति। यथा घटे घटावच्छिन्नस्य घटाकाशस्य एव वृत्तिः भवति न त्वनवच्छिन्नस्य महाकाशस्य। तथैवावच्छिन्ने जीवे अनवच्छिन्नस्य चैतन्यस्य वृत्तिः न सम्भवति।

(ख) यदि अवच्छेदवादः स्वीक्रियते तर्हि ब्रह्मणः सर्वगतत्वस्य सर्वनियन्तृत्वस्य च हानिः संजायेत। तद्यथा– अनवच्छिन्नस्य ब्रह्मणो अण्डाद् बहिरेव सद्भावप्रसङ्गात् तत्र सर्वगतत्वसर्वनियन्तृत्वादि ब्रह्मणो न स्यात्। अनवच्छिन्नप्रदेशेषु अनवच्छिन्नस्य द्विगुणीकृत्य वृत्ययोगात्।

(ग) यदि जीवः अन्तःकरणावच्छिन्नं चैतन्यम् इति स्वीक्रियेत तर्हि तस्य कर्मसमये तथा कर्मफलभोगसमये भिन्नकालत्वात् तथा कर्मस्थले (अर्थात् पृथिव्यां) कर्मफलत्वाप्तिस्थले (अर्थात् स्वर्गे) प्रदेशभेदत्वात् कृतहानि अकृताभ्यागमदोषयोः प्रसक्तिः संजायेत।

(घ) अन्तःकरणावच्छिन्नं चैतन्यं यदि प्रमातृत्वेन स्वीक्रियेत तर्हि घटाद्यवच्छिन्नस्य चैतन्यस्यापि प्रभातृत्वं (जीवत्वं) प्रसज्येत। उत घटादिवत् अन्तःकरणमपि भूतवर्गस्य कार्यमस्ति। अतः तदपि भौतिकं वर्त्तते। यथोक्तं विद्यारण्यमुनिना–

**शृण्वसंगपरिच्छेदमात्राज्जीवो भवेत् न हि।**
**अन्यथा घटकुडयादेरवच्छिन्नस्य जीवता।।**[6]

## प्रतिबिम्बवादस्य विरुद्धम् अवच्छेदवादिनामाक्षेपाः

प्रतिबिम्बवादस्य विरुद्धं ये दोषाः अवच्छेदवादिभिः अन्यैश्च आचार्यैः उद्भाव्यन्ते तेषु केचिदत्र उल्लिख्यन्ते।

(क) अमूर्तस्य ब्रह्मणः प्रतिबिम्बः कथम्? अस्य आक्षेपस्य समाधानाय विवरणकारः कथयति– "अमूर्तस्य चाकाशस्य साभ्रनक्षत्रस्य

---

6. पञ्चदशी (कूटस्थखण्ड)

जले प्रतिबिम्बवत्, अमूर्तस्य ब्रह्मणोऽपि प्रतिबिम्बसम्भवात्।[7]

(ख) केषांचित् इदं कथनमस्ति यत् जले अमूर्तस्य आकाशस्य प्रतिबिम्बो न पतति अपितु जलान्तर्गतः आकाशः एव अभ्रादेः प्रतिबिम्बेन सह फलतः दृश्यते। अस्य आक्षेपस्य समाधानाय विवरणकारः कथयति यत् जले (ब्र.सू.) आकाशस्य प्रतिबिम्बः स्वीकरणीय एव अन्यथा जानुमात्रप्रमाणजले दूरस्थस्य विशालस्य आकाशस्य यत् दर्शनं भवति तस्य समीचीना व्याख्या न सम्भवेत्। तद्यथा– "जानुमात्रपरिमाणेऽपि जले दूरविशालाकाशदर्शनात् एवाभ्रादिप्रतिबिम्बयुक्तो जलान्तराकाश दृश्यत इति वक्तुमशक्यत्वात् तत्प्रतिबिम्बत्वं चिद्रूपत्वं च शास्त्रप्रतिपन्नं प्रत्यक्षप्रतिपन्नं न निराकर्तुं शक्यते इति भावः।"

(ग) प्रतिबिम्बवादस्य विरुद्धम् अपरो दोषो उद्भावयते यत् अन्तःकरणोपाधेः नीरूपत्वात् तस्मिन् चैतन्यस्य प्रतिबिम्बः न शक्नोति।

प्रतिबिम्बार्थं न केवलं बिम्बस्य रूपवत्वम् अपितु प्रतिबिम्बोपाधेरपि रूपवत्त्वम् आवश्यकं वर्त्तते। रूपवत् उपाधौ एव प्रतिबिम्बाः संभवः। रूपहीने उपाधौ न रूपवति दर्पणे एव मुखस्य प्रतिबिम्बः पतति रूपहीने वाय्वौ न। अतः अन्तःकरणरूपोपाधेः रूपहीनत्वात् तत्र चैतन्यस्य प्रतिबिम्बः न शक्नोति।

अस्य दोषस्य निराकरणार्थं प्रतिबिम्बवादिभिः इदमुच्यते यत् नीरूपोपाधौ अपि प्रतिबिम्बः पतितुं शक्नोति। उदाहरणतया नीरूपध्वनौ नीरूपवर्णानां प्रतिबिम्बः पतति। अस्मिन् विषये प्रतिपक्षिभिः एतत् कथयितुं शक्यते यत् यथा जपाकुसुमस्य आरुण्यं समीपवर्तिनो स्फटिके प्रसज्यते। तथैव सामीप्यत्वात् वर्णेषु ध्वनिगतधर्माणाम् आरोपः जायते। अतः अत्र बिम्बप्रतिबिम्बत्वं नास्तीति।

अत्र केचित् कथयन्ति यत् नीरूपध्वनौ नीरूपवर्णानां प्रतिबिम्बत्वं यदि न स्वीक्रियते तथापि प्रतिध्वनिस्तु ध्वनेः प्रतिबिम्ब अस्त्येव। अतः यथा नीरूपध्वनिः नीरूपकणे प्रतिध्वनित्वेन प्रतिध्वन्तिः भवति। तथैव

7. प.पा.वि., पृ.289

नीरूपं चैतन्यं नीरूपे चैतन्ये प्रतिबिम्बितं भवति। अस्मिन् विषये प्रतिबिम्बवादविरोधीनाम् इदं कथनमस्ति यत् प्रतिध्वनिः वस्तुतः अपरः ध्वनिः वर्त्तते। अस्योत्पादकः आकाश तथा निमित्तकारणं पूर्वध्वनि वर्त्तते। अतः प्रतिध्वनिः पूर्वध्वनेः प्रतिबिम्बः नापितु तस्मादुत्पन्नः ध्वन्यन्तरः अस्ति। एवं प्रकारेण प्रतिध्वनेः दृष्टान्तम् आश्रित्य नीरूपोपाधौ प्रतिबिम्ब-भाववादस्य सम्भावना समीचीनाः नास्ति।

प्रतिबिम्बवादस्य विरुद्धम् एषः आक्षेपः अपि क्रियते यत् विप्रकृष्टदेशस्थितस्य सूर्यादेरेव प्रतिबिम्बः विप्रकृष्टे देशस्थे मूर्ते पतति। किन्तु चैतन्यम् अन्तःकरणोपाधितः विप्रकृष्टं नास्ति। यतः चैतन्यं सर्वगतम् अस्ति। अस्य आक्षेपस्य समाधानं प्रतिबिम्बवादिभिः ब्रह्मसूत्रभाष्यादपि कर्तुं शक्यते। शंकराचार्यस्य कथनमेतदस्ति यत् दृष्टान्तदान्तिकयोर्मध्ये सर्वसारूप्यं दर्शयितुं न शक्यते।[8] अस्य तात्पर्यमिदमस्ति यत् यथा जलगतं सूर्यप्रतिबिम्बं जलगतचलनहासादिधर्मानुयायि इव प्रतीयते न तु परमार्थतः सूर्यस्य तथात्वं साधयति तथैव परमार्थतः अविकृतं ब्रह्म देहाद्युपाध्यन्तर्भावात् उपाधिमत् प्रतीयते न वस्तुतः तस्य तथात्वमस्ति। जीवस्य प्रतिबिम्बरूपत्वे स्वीकृते सति तस्मिन् अचेतनत्वमपि प्रसज्येत यतः प्रतिबिम्बः सदा अचेतने एव दृश्यते। एवमेव यदि जीवः ब्रह्मणः प्रतिबिम्बः इति स्वीक्रियेत तर्हि जीवब्रह्मणोः भेदः आवश्यकः स्यात्।

**प्रतिबिम्बवाद-अवच्छेदवादयोर्भेदः**

उपर्युक्तकथनानां साररूपत्वेन विवरणप्रस्थान-भमतीप्रस्थानयोः भेदः निम्नलिखितप्रकारेण निरूपयितुं शक्यते।

(1) विवरणप्रस्थानानुसारं मायाशबलितं ब्रह्म जगत्कारणम्। किन्तु भामतीपन्थिनः कथयन्ति यत् ब्रह्म एव केवलं जगतः कारणम्। माया तु सहकारिमात्रम्।

(2) अविद्याप्रतिबिम्बो जीवः बिम्बभूतः ईश्वर इत्यस्य विवरणमतस्य विरुद्धां भामतीपन्थिनः एतत् कथयन्ति यत् अन्तःकरणावच्छिन्नं चैतन्यं जीवः अनवच्छिन्नं चैतन्यम् ईश्वरः।

8. ब्र.सू.शा.भा.- 2.3.29, पृ.359

(3) अविद्यायाः आश्रयः ब्रह्म इति विवरणपन्थिनः किन्तु भामतीपन्थिनाम् अनुसारमविद्यायाः आश्रयः जीवः।

(4) 'शुद्ध० ब्रह्म न वृत्तिविषयः' इत्यस्य विवरणमतस्य विरुद्धं भामती-पन्थिनः कथयन्ति यत् शुद्धं ब्रह्म वृत्तेर्विषयः।

(5) श्रवणादौ विधिः इति विवरणपन्थिनः, किन्तु श्रवणादौ विधिर्नास्तीति भामतीपन्थिनः।

(6) श्रुतिः प्रत्यक्षात् बलीयसि इति विवरणपन्थिनः। किन्तु तात्पर्यवती श्रुतिः एव प्रत्यक्षात् बलीयसि इति भामतीपन्थिनः।

(7) विवरणकाराणां मते यज्ञादिकर्मणामुपयोग वेदने अस्ति। किन्तु भामतीकाराणां मते यज्ञादिकर्मणाम् उपयोगः विविदिषायां वर्तते।

किन्तु सत्यपि उपर्युक्ते मतभेदे उभयोः प्रस्थानयोः अस्मिन् विषये मतैक्यमस्ति यत् ब्रह्मात्मैक्यसाक्षात्कारात् मुक्तिः जायते।

## सन्दर्भग्रन्थसूची


(1) त्रिपाठी, केदारनाथः, ब्रह्मसूत्रशाङ्करीवृत्तिः, शैवभारती-शोधप्रतिष्ठानम्, वाराणसी, 1998।

(2) शर्मा, राममूर्तिः, शंकराचार्य उनके मायावाद तथा अन्य सिद्धान्तों का आलोचनात्मक अध्ययन, साहित्यभण्डार, मेरठ।

(3) मंजु, अद्वैतवाद और शून्यवाद, ईस्टनबुकलिङ्कर्स, दिल्ली, 1686।

(4) एम्. वसन्ता, अद्वैतवेदान्ते भामतीप्रस्थानस्य तुलनात्मकमध्ययनम्, नागपब्लिशर्स, दिल्ली, 2013।

(5) वल्लभाचार्यः, ब्रह्मसूत्र-अणुभाष्यम्, मदनलालशास्त्री, मुम्बई, 1975।

(6) शास्त्री, अनन्तकृष्णः, ब्रह्मसूत्रशाङ्करभाष्यम्, राष्ट्रीयसंस्कृतसंस्थानम्, नवदेहली, 2012।


❏❏❏

# भारतीयदर्शनेषु सविशेषाद्वैतवादस्य समीक्षणम्

**-रुद्रनारायणदासः ***

अस्माकं भारतवर्षः दर्शनशास्त्रस्य आध्यात्मिकज्ञानस्य च प्रदाने प्रेरकः इति मन्यते। स्मृतौ कथितमस्ति- एतद्देशप्रसूतस्य सकाशादग्रजन्मनः। स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः।।[1] मानवमात्राणां कृते संस्कृतचरित्र-निर्माणाय भारतीयदर्शनशास्त्रस्य महति भूमिका वर्तते।

भारतीयदर्शनशास्त्रम् आस्तिकदर्शनं नास्तिकदर्शनम् इति च भागद्वयेन विभक्तमस्ति। नास्तिको वेदनिन्दकः।[2] इति स्मृतिवचनात् ये वेदवाक्यस्य प्रामाण्यं न स्वीकुर्वन्ति ते नास्तिकाः। वेदप्रामाण्याऽस्वीकारात् बौद्धजैन-चार्वाग्दर्शनानि नास्तिकदर्शनानीति मन्यन्ते। ये वेदवाक्यस्य प्रामाण्यं स्वीकुर्वन्ति ते आस्तिकाः भवन्ति। तस्मात् न्यायदर्शनम्, वैशेषिकदर्शनम्, सांख्यदर्शनम्, योगदर्शनम्, मीमांसादर्शनम्, वेदान्तदर्शनम् एतानि दर्शनानि आस्तिकदर्शनमिति मन्यन्ते।

भारतीयमनीषिणः चतुर्वर्गफलप्राप्त्यर्थं वैदिकदर्शनशास्त्रस्य तत्त्वान्वेष-णविधानं कृतवन्तः। वैदिकदर्शनानुसारेण चतुर्वर्गेषु मोक्षः परमपुरुषार्थः मन्यन्ते। परमपुरुषार्थस्य प्राप्तिं वेदान्तदर्शनस्य श्रवणमनननिदिध्यासनेनैव संभवति। अतः वेदान्तदर्शनस्य तत्त्वान्वेषणमपेक्षते।

"वेदानामन्तः सारभागः वेदान्तः" इति व्युत्पत्त्यात् वेदप्रतिपादार्थस्य निर्णयः यस्मिन् ग्रन्थे प्राप्यते स वेदान्तः। अत्र सारभागेन ब्रह्मप्रतिपादकश्रुतीनां

---

* शोधच्छात्रः, विशिष्टाद्वैतवेदान्तविभागः, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृत-विश्वविद्यालयः, नवदेहली।

1. मनुस्मृतिः, 2.20
2. मनुस्मृतिः, 2.11

ग्रहणं भवति। यद्यपि सर्वे वेदाः परोक्षापरोक्षरूपेण ब्रह्मणः प्रतिपादनं कुर्वन्ति तथापि उपनिषद्श्रुतयः साक्षात् ब्रह्मणः प्रतिपादनं कुर्वन्ति यथा–

**विद्यां चाविद्यां च यस्तद्वेदोभयं सह।**
**अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते।।**[3]

वेदान्तदर्शनं भागत्रयेण विभक्तमस्ति यथा श्रुतिप्रस्थानम्, स्मृतिप्रस्थानम्, न्यायप्रस्थानम्। यत्र ब्रह्मप्रतिपादकश्रुतीनां संकलनं प्राप्यते तत् श्रुतिप्रस्थानम्। अतः ईशावास्याद्युपनिषदः श्रुतिप्रस्थानम्। श्रीमन्महाभारतस्यांशिकदर्शनरूपेण प्रसिद्धं श्रीमद्भगवद्गीतायामपि "आध्यात्मविद्या विद्यानां"[4] "य इमं परमं गुह्यं"[5] "ज्ञानयज्ञेन"[6] "सर्वगुह्यतमं भूय श्रुणु मे परमं वचः"[7] "इति ते ज्ञानमाख्यातं गुह्याद्गुह्यतरं"[8] इत्यादिप्रकारेण ब्रह्मविद्यायाः प्रतिपादनं प्राप्यते। अतः श्रीमद्भगवद्गीता स्मृतिप्रस्थानम्। महर्षिबादरायणेन विरचिते ब्रह्मसूत्रे "अथातो ब्रह्मजिज्ञासा"[9], "जन्माद्यस्य यतः"[10] इत्यादिवचनानि साक्षादेव ब्रह्मणः प्रतिपादनं कुर्वन्ति, अतः ब्रह्मसूत्रं न्यायप्रस्थानम् इति मन्यते।

यद्यपि महर्षिबादरायणेन न्यायप्रस्थानं ब्रह्मसूत्रस्य वेदानुसारं ब्रह्मणः सिद्धिं कृतं तथापि भिन्न–भिन्ना आचार्याः ब्रह्मसूत्रभाष्यरूपेण स्व–स्व–सिद्धान्तस्य प्रतिपादनं कृतवन्तः। यथा श्रीशंकराचार्येण अद्वैतवादसम्मतः, श्रीमध्वाचार्येण द्वैतवादसम्मतः, श्रीनिम्बार्काचार्येण द्वैताद्वैतवादसम्मतः, श्रीवल्लभाचार्येण शुद्धाद्वैतवादसम्मतः, श्रीरामानुजाचार्येण विशिष्टाद्वैतवादसम्मतः तथाऽन्यान्याचार्येण भिन्न–भिन्नं सिद्धान्तानां प्रतिपादनं कृतम्। तदनुसारं स्व–स्व–वादस्य प्रतिपादनार्थं गीताभाष्यम्, उपनिषद्भाष्यमपि लिखितम्।

---

3. ईशावास्योपनिषत्, 11
4. श्रीमद्भगवद्गीता, 10.30
5. श्रीमद्भगवद्गीता, 18.68
6. श्रीमद्भगवद्गीता, 18.70
7. श्रीमद्भगवद्गीता, 18.64
8. श्रीमद्भगवद्गीता, 18.70
9. ब्रह्मसूत्रम्, 1.1.1
10. ब्रह्मसूत्रम्, 1.1.2

अत्र श्रीरामानुजाचार्येण प्रतिपादितं विशिष्टाद्वैतवाद एव सविशेषाद्वैतवादः कथ्यते। सविशेषपदेन विशेषेण सह इति सविशेषः ईश्वरः, विशेषणपदेन चिदचित् स्वीकृतम्। विशिष्टाद्वैतमते अद्वैतब्रह्म चिदचित् विशिष्टं भवति। अत्र अद्वैतपदम् अभिन्नार्थकम्- द्वाभ्यां प्रकाराभ्याम् इदं ज्ञातं द्वीतं तदेव द्वैतम्, अत्र स्वार्थेऽण् प्रत्ययः।[11] न द्वैतम् अद्वैतम् इति व्युत्पत्यात् अद्वैतपदं धर्मीणः बोधकं वर्त्तते। विशिष्टम्-अद्वैतं ब्रह्मैव विशिष्टाद्वैतं सविशेषः-विशिष्टञ्च तद् अद्वैतञ्च विशिष्टाद्वैतम्। विशिष्टपदं सविशेषपदस्य समानार्थकम्।[12] सविशेषेण विशेषणेन युक्तः, अत्र विशेषणेन ईश्वरस्य गुणविभूतिविग्रहादिश्च ग्रहणीयः। भिन्नभिन्नगुणेन युक्तेनापि विशेष्यमेकमेव वर्त्तते, अतः तद् अद्वैतब्रह्ममेकमेवाद्वितीयम्।

**चिदचिद्विशिष्टब्रह्म**

अद्वैतब्रह्मणि चिदचित् विशेषणः वर्त्तते, चित् जीवात्मवाचकः, अचित् जडपदार्थस्य बोधकः। अत्र चिदचित् विशेष्यविशेषणभावसम्बन्धेन च शेषशेषीभावसम्बन्धेन ब्रह्मणि तिष्ठति। यदा चित्स्वरूपस्य निरूपणं भवति- "आत्मस्वरूपं देहेन्द्रियमनः प्राणबुद्धिभ्यो विलक्षणम्, अजडम्, आनन्दरूपम्, नित्यम्, अणु-अव्यक्तम्, अचिन्त्यम्, निरवयवम्, निर्विकारम्, ज्ञानाश्रयभूतम्, ईश्वरस्य नियाम्यम्, धार्यम्, शेषभूतञ्च।"[13] अन्यत्रापि जीवात्मस्वरूपनिर्णये देवमनुष्यादिप्रकृतिपरिणामात् भिन्नं ज्ञानानन्दैकस्वरूपमिति निरूपितम्। आत्मा भिन्नभिन्नशरीरे तादात्म्येन तिष्ठति, तादात्म्यसम्बन्धात् 'शरीरमेवात्मा' इति प्रतीति जायते तथापि आत्मा शरीरात् भिन्नमेव भवति। तथाहि-

**पुमान् न देवो न नरो न पशुर्न च पादपः।**
**शरीराकृतिभेदास्तु भूपैते कर्मयोनयः॥**
**नायं देवो न मर्त्यो वा न तिर्यक् स्थावरोऽपि वा।**
**ज्ञानानन्दमयस्त्वात्मा शेषो हि परमात्मनः॥**[14]

---

11. विशिष्टाद्वैतकोशः
12. विशिष्टाद्वैतकोशः
13. तत्त्वत्रयम्- चित्प्रकरणम्- 1
14. वेदार्थसंग्रहः- हिन्दीव्याख्या स्वामी नीलमेघाचार्यः- पृष्ठम्-15

अर्थात् कर्मवशात् पुरुषः देवमनुष्यादिशरीरं धारयति। भिन्न-भिन्नं शरीरे भिन्न-भिन्नमात्मानः तिष्ठन्ति। तेषां स्वरूपं ज्ञानानन्दमयश्च परमात्मनः शेषीभूतं वर्त्तते। संहितायां वर्णनं प्राप्यते- "ज्ञानानन्दमयस्त्वात्मा शेषो हि परमात्मनः"[15] पुराणेऽपि कथितमस्ति- "निर्वाणमय एवायमात्माज्ञान-मयोऽमलः।"[16] इति।

## सविशेषाद्वैतवादः

यद्यपि "नेह नानास्ति किंचन"[17] इति श्रुतिवचनात् जगन्मिथ्यात्वं निर्विशेषाद्वैतवादिनः वदन्ति।

तथापि "नेह नानास्ति किंचन" इति श्रुतौ "विनभ्यां नानाञौ न सह"[18] इति सूत्रेण वि शब्दात् नञ् तथा ना शब्दात् नाञ् प्रत्यये विना, नाना शब्दः निष्पन्नः भवति, महाभाष्यकारानुसारं- "विनञ् इति एताभ्यामसह-वाचिभ्यां नानाञौ भवतः"[19] इति भाष्यवचनात् नानाशब्दः पृथकार्थकः भवति। यथा रूपरसगन्धस्पर्शादिनां आश्रयद्रव्यं भिन्न-भिन्नं भवति, रूपादि-विशिष्टद्रव्यम् अपृथक् भवति। अत्र विशेषण-विशेष्यरूपेण भिन्नं वर्त्तते, स्वरूपैकताऽभावेऽपि आश्रयी-आश्रयत्वेन रूपादिविशिष्टद्रव्यं अपृथक् भवति। तथाहि चेतनाऽचेतनात्मकं जगद्भिन्नं ब्रह्म विशेषण-विशेष्यभावसम्बन्धेन अपृथक् भवति। "नेह नानास्ति" इति श्रुतौ अब्रह्मात्मकं पृथक्पदार्थस्य निषेधः भवति न तु ब्रह्मात्मकमपृथक् वस्तुनः।

दृश्यमानं चेतनाऽचेतनात्मकं सर्वे पदार्थाः ब्रह्मणः शरीरमेव वर्त्तते, शरीरी परमात्मा एव तस्यात्मा भवति। "अन्तः प्रविष्टः शास्ता जनानां सर्वात्मा"[20], "यः पृथिव्यां तिष्ठन् पृथिव्यामन्तरो यं पृथिवी न वेद यस्य

15. पांचरात्रसंहिता
16. विष्णुपुराणम्- 6.7.22
17. बृहदारण्यकोपनिषत्- 4.4.19
18. अष्टाध्यायीसूत्रम्- 5.2.27
19. महाभाष्यम्- 5.2.27
20. तैत्तिरीयाआरण्यकम्- 3.11.3

पृथिवी शरीरं यः पृथिवीमन्तरो यमयति, एष त आत्माऽन्तर्याम्यमृतः।"[21] "यो विज्ञाने तिष्ठन् विज्ञानादन्तरो यं विज्ञानं न वेद यस्य विज्ञानं शरीरं यो विज्ञानमन्तरो यमयति, एष त आत्माऽन्तर्याम्यमृतः।"[22] इत्यादि श्रुतौ जगद्ब्रह्मणौ शरीरात्मभावसम्बन्धः विवेक्षितमस्ति। अत्र विवेक्षितं "ब्रह्म आत्मा नियन्ता येषाम् ते ब्रह्मात्मकाः" इति व्युत्पत्त्यात् ब्रह्मनियाम्य सर्वे शरीराः ब्रह्मात्मकाः।

अतः "नेह नानास्ति किंचन" इति श्रुतिवाक्येन सर्वस्य निषेधः न कर्तुं शक्यते। यदि सर्वस्य निषेधः स्वीकृतं तर्हि "सर्वस्य वशी सर्वेस्येशानः सर्वस्याधिपतिः एष सेतुर्विधरणः"[23], "एष सर्वेश्वर एष सर्वज्ञ एषोऽन्तर्याम्येष योनिस्सर्वस्य। प्रभवाप्ययौ हि भूतानाम्।"[24] इत्यादि श्रुतिवाक्ये सत्यसंकल्पत्व-सर्वेश्वरत्व-स्वामीत्व-धारकत्वादिगुणानां वर्णनं व्यर्थं भविष्यति। यत्र सर्वं हि नास्ति तत्र सर्वस्य ईश्वरः, सर्वस्य धारकं, सर्वज्ञं कथं वक्तुं शक्यते। इत्यादि तर्केणाऽपि निर्विशेषाद्वैतवादसम्मतः जगन्मिथ्या नैव वक्तुं शक्यते।

अर्थात् ब्रह्मैव कारणं ब्रह्मैव कार्यम्। स्वयं श्रीकृष्णेनोक्तम्-

**यच्चापि सर्वभूतानां बीजं तदहमर्जुन।**
**न तदस्ति विना यत्स्यान् मया भूतं चराचरम्॥**[25]

इत्यादि वचनेनाऽपि ब्रह्मैव बीजं ब्रह्मैव कार्यम्। "सदेव सोम्येदमग्र आसीद् एकमेवाद्वितीयम्।"[26] इति श्रुत्यनुसारेण प्रलयकाले सत् ब्रह्मैव आसीत्, तस्य संकल्पेन जगदुत्पत्ति अभवत्। "तदैक्षत बहु स्याम्।"[27], "सोऽकामयत बहु स्याम्।"[28] "तन्नामरूपाभ्यामेव व्याक्रियत।"[29] इत्यादि

---

21. बृहदारण्यकोपनिषत्- 3.7.7
22. बृहदारण्यकोपनिषत्- 3.7.26
23. बृहदारण्यकोपनिषत्- 4.4.22
24. माण्डूक्योपनिषत्- 2.4.
25. श्रीमद्भगवद्गीता- 10.39
26. छान्दोग्योपनिषत्- 6.2.1
27. छान्दोग्योपनिषत्- 6.2.3
28. तैत्तिरीयोपनिषत्- 2.6.2
29. बृहदारण्यकोपनिषत्- 1.4.7

श्रुतिप्रमाणात् परिलक्षते ब्रह्मैव नामरूपात्मकचेतनाऽचेतनरूपेण नानारूपेण स्थितः।

तथा च बृहदारण्यके यो ब्रह्मणः पृथक् पश्यति तस्य पराभवः भवति। यत्र त्वस्य सर्वमात्मैवाभूत। "सर्वं तं परादात् योऽन्यत्रात्मनः सर्वं वेद:।"[30] यो ब्रह्मणः स्वतन्त्रतया पृथक्त्वेन पश्यति स अन्धं तमः वदति। "तद्धैतत् पश्यन् ऋषिर्वामदेवः प्रतिपेदे अहं मनुरभवं सूर्यश्चेति।"[31] इति श्रुतौ ब्रह्मसाक्षात्कारदशायाम् 'अहम्' इति द्रष्टाऽऽत्मा रूपेण तथा मनुसूर्यादि दृश्यपदार्थरूपेण साक्षात्कारः प्रतिपादयति। अतः यदि सर्वद्वैतं निषेधः इति द्वैतनिषेधकश्रुतीनामभिप्रायमिति मन्यन्ते तर्हि अयं श्रुतिविरोधः भविष्यति। अज्ञानिपुरूषस्य लौकिकानुभूतकाले द्रष्टा-दृश्यस्वातन्त्र्येण पश्यति, तस्य निषेधः श्रुतिवाक्येन भवति न तु ब्रह्मात्मकद्वैतस्य। अतः श्रीरामानुजाचार्येण प्रणीतः विशिष्टाद्वैतवादः श्रुतिसम्मतः इति।

❒❒❒

30. बृहदारण्यकोपनिषत्- 2.4.6
31. बृहदारण्यकोपनिषत्- 1.4.10

# न्यायभाष्यवृत्तिदिशा प्रयोजनवादविमर्शः

**-सुमनकल्यानसामन्तः** *

भारतीयदार्शनिकपरम्परायां न्यायशास्त्रे वैशेषिकग्रन्थे च "मानाधीना मेयसिद्धिः मेयाधीना मानसिद्धिः" चेत्यनयोर्विषये तलस्पर्शिविश्लेषणमुपलभ्यते। दार्शनिकचिन्तनपरम्परा भारतीयायाः संस्कृतेः सभ्यतायाश्चात्मा वरीवर्ति विशेषतश्च तस्योत्कृष्टमीमांसापद्धतेः कारणात्। यथार्थतत्त्वज्ञानं दर्शनशास्त्रस्य प्रधानलक्ष्यभूतम्। तदर्थञ्च न्यायदर्शनं सुदृढमाधारं विधिं साधनानि च पुरस्करोति। न्यायप्रमाणमीमांसा च तेषां विधिसिद्धान्तनियमानां विशदां व्याख्यां विधाय ज्ञानावाप्तेः पन्थानं प्रशस्तयति। तस्माद् भारतीयदर्शनावबोधाय न्यायप्रमाणमीमांसापद्धतेरवगमो निशायामरण्यप्रवेशे आलोकदर्शनमिव महदुपकरोति। अतो भारतीयदर्शनशास्त्रस्याध्ययनार्थं भारतीयसंस्कृतेस्तत्सभ्यतायाश्च आत्मानमधिगन्तुं न्यायदर्शनस्याध्ययनमतीवोपयुज्यते। तत्र षोडशपदार्थानां तत्त्वज्ञानाद् दुःखात्यन्तिकनिवृत्तिरूपमोक्षस्य प्राप्तिर्भवति। तत्र मुख्यरूपेण प्रयोजनपदार्थस्योपयोगित्वं वर्तते।

न्यायशास्त्रस्योद्देशो लक्षणं परीक्षा चेति त्रिविधा प्रवृत्तिः। अतः तर्कभाषायां केशवमिश्रेणोक्तम्- **"त्रिविधा चास्य शास्त्रस्य प्रवृत्तिरुद्देशो लक्षणं परीक्षा चेति"**[1]। येन क्रमेणैव उद्देशो भवति, तेन क्रमेणैव लक्षणं परीक्षा च भवति इति बोद्धव्यम्। अतएव **"प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः"**[2] इति प्रथमन्यायसूत्रे

* शोधच्छात्रः, न्यायविभागः, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः, नवेदहली।

1. तर्कभाषा
2. न्या.सू.- 1.1.1

प्रयोजनपदार्थः संशयात् परमार्थात् चतुर्थपदार्थत्वेनोद्दिष्टः। सूत्रकारगौतमेन संशयपदार्थलक्षणात् परं क्रमप्राप्तं प्रयोजनपदार्थलक्षणं कृतम्। तथाहि– **"यमर्थमधिकृत्य प्रवर्तते तत् प्रयोजनम्"**[3] इति। अर्थात् यमर्थमाश्रित्य पुरुषः प्रवर्तते निवर्तते वा तदेव प्रयोजनमिति सूत्रार्थः। संशयपदार्थवत् प्रयोजनपदार्थोऽपि न्यायपूर्वाङ्गं भवति। प्रयोजनं व्यतिरिच्य केवलं विचारबलेनैव तत्त्वानुसन्धानं न भवितुमर्हति। अतः उद्योत्करेणोक्तम्–**"या खलु निष्प्रयोजना चिन्ता, सा न न्यायाङ्गमिति, परीक्षाविधेस्तु प्रधानाङ्गं प्रयोजनमेव, तन्मूलत्वात् परीक्षाविधेः"**[4] इति। मुख्यगौणभेदेन प्रयोजनपदार्थो द्विविधः। यस्मिन् विषये जीवेच्छा स्वतः जायते सा एव मुख्यप्रयोजनं स्वतःप्रयोजनं वा। अपि च सुखदुःखनिवृत्तिविषये स्वतः जीवेच्छा उत्पद्यते, अतः सुखदुःखनिवृत्तिरेव जीवानां मुख्यप्रयोजनमस्ति। किन्तु महर्षिगौतमेन अस्य प्रयोजनद्वयस्य सूचनार्थं सूत्रे 'अर्थम्' इति शब्दप्रयोगः कृतः। अर्थशब्द–व्याख्यानप्रसङ्गे भाष्यकारेणोक्तम्– **"यमर्थमाप्तव्यं हातव्यं वा व्यवसाय"**[5] इति। अर्थात् पदार्थमिमं प्राप्तव्यं हातव्यं वा इति व्यवसायेन निश्चयेन वा अर्थस्याधिकारो विद्यते। अस्मिन् सूत्रे 'अधिकृत्य' पदेन पदार्थग्राह्यत्वनिश्चयः त्याज्यत्वनिश्चयो वा विवक्षितः। 'प्रयुज्यतेऽनेन' इति व्युत्पत्या यः पदार्थ उक्तरूपेण जीवकर्मप्रवृत्तेर्योजकं भवति, स एव प्रयोजनपदार्थ इति भाष्यकाराभिप्रायः।

अधिकारपदस्यारम्भादिभिन्नार्थो विद्यमानः। अतो भिन्नार्थप्राप्तिकारणत्वे सति वृत्तिकारेण विश्वनाथन्यायपञ्चाननेन अधिकारपदस्योद्देश्यार्थो बोद्धव्य इत्युक्तम्। अत्र 'अधिकृत्य' इति सकर्मकक्रियापदस्यार्थ उद्दिश्यम्। सकर्मकत्वे सति प्रश्नो भवति, अत्र कर्म किम्? उत्तरे वृत्तिकारो वदति अत्र सूत्रस्थोऽर्थपदार्थ एव कर्मपदार्थः। अतएव उद्देश्यभूतार्थ एव प्रयोजनपदार्थः। कस्योद्देश्यभूतार्थत्वं प्रयोजनत्वम्? सूत्रे वर्णितं 'प्रवर्तते' अर्थात् प्रवृत्त्युद्देश्य–भूतार्थत्वं प्रयोजनत्वम्। अपि तु इच्छाविषयत्वमुद्देश्यत्वं ज्ञातव्यम्। अतएव

---

3. न्या.सू.– 1.1.24
4. न्या.वा.
5. न्या.भा.– 1.1.24

प्रवृत्त्यनुकूलेच्छाविषयत्वमेव प्रयोजनम्। प्रवृत्तिरिच्छाजन्यत्वादेव भवति। प्रवृत्तिं प्रति इच्छा हेतुस्वरूपा भवति। अतः प्रवृत्तेर्हेतुभूतेच्छाविषयत्वं प्रयोजनत्वमिति प्रयोजनलक्षणम्। अस्माकं प्रवृत्तिः सुखलाभाय दुःखपरिहाराय च भवति। प्रवृत्तेर्हेतुभूतेच्छा सुखलाभार्थं दुःखपरिजिहीर्षार्थञ्च भवति। न्यायमते तु इच्छा सविषयिका भवति। केवलं सुखप्राप्तेर्दुःखपरिहानस्येच्छार्थं प्रवृत्तिर्न भवति इति ज्ञायते। परन्तु 'इदं मदिष्टसाधनम्' तथा 'इदं मदनिष्टसाधनम्' अनेन इष्टसाधनताज्ञानेन पुरुषाः सुखसाधनप्राप्तौ दुःख-परिहारेच्छायाञ्च प्रवृत्तं भवन्ति। इतः सुखसाधनप्राप्तिर्दुःखसाधनपरिहारश्च भेदेन प्रयोजनद्वयं विद्यते। स्वतः उदीयमानार्थं सुखप्राप्तित्वं दुःखपरिहारत्वञ्च मुख्यप्रयोजनम्। किन्तु सुखसाधनलाभेच्छा यद्यपि सुखलाभेच्छाधीना वर्तते तथापि दुःखसाधनपरिहारेच्छा केवलं दुःखपरिहारेच्छाधीना प्रवर्तते, तद् गौणप्रयोजनमेव। वृत्तिकारेण प्रयोजनपदार्थस्य परिनिष्ठितलक्षणप्रकाशार्थमुक्तम्- **"तथा च प्रवृत्तिहेत्विच्छाविषयत्वं तत्त्वम्"**[6] इति। यदि प्रवृत्तिहेतु-भूतेच्छाविषयत्वं प्रयोजनत्वं तर्हि तत्र सुखत्वादौ अतिव्याप्तिर्भवति। सुखलाभेच्छाविषयो यथा सुखप्राप्तिर्भवति तथा परम्परया सुखत्वादिरपि भवति। अत्र विषयत्वमित्युक्ते विषयतासामान्यं न बोद्धव्यम्। तर्हि **"विषयत्वं साध्यताख्यविषयताविशेषः, तेन सुखत्वादिवारणम्"**[7] इति। अर्थात् प्रकृतप्रवृत्तेः साध्यमेव सुखप्राप्तिर्दुःखपरिहारो वा इति तात्पर्यम्। साध्यता केवलं सुखप्राप्तौ तथा दुःखपरिहारे विद्यमानैव, सुखत्वादौ न। अतएव इच्छानिरूपितसाध्यताख्यविषयता सुखप्राप्तिं दुःखपरिहारनिष्ठञ्च भवति, तदेव प्रयोजनपदार्थरूपेण बोद्धव्यम्। तादृशी विषयता सुखत्वादिनिष्ठा न भवति चेत् सुखत्वादिवारणं स्यात्। एक नियमोऽस्ति-

**ज्ञानजन्या भवेदिच्छा इच्छाजन्या भवेत्कृतिः।**
**कृतिजन्या भवेच्चेष्टा ततश्च फलमाप्नुयात्॥** इति॥

अर्थाद् ज्ञानाद्विषयप्राप्तेरिच्छा उत्पद्यते, इच्छाया विषयप्राप्तेरानुकूलप्रयत्न उत्पद्यते, प्रयत्नात् प्रवृत्तिस्तथा तदनन्तरं फलं प्राप्नोति। अतएव कस्यचिद्

6. न्या.सू.वृ.- 1.1.24
7. न्या.सू.वृ.- 1.1.24

विषयप्राप्तेरिच्छायाः परम्परया तस्य विषयस्य प्राप्तेरानुकूलप्रवृत्तिरुत्पद्यते। प्रवृत्तेर्साध्यं तथा इच्छायाः साध्यमेको विषय एव वर्तते इति वैपरित्यं दृश्यते। तथाहि– **"प्रवृत्तिहेतुभूतेच्छासाध्यत्वं प्रयोजनत्वम्"** इति प्रयोजनपदार्थस्य लक्षणे इच्छासाध्यमेव प्रवृत्तेर्साध्यं भवति, इच्छासाध्यकथनेन प्रवृत्तिसाध्यं बोद्धव्यम्। अतः 'प्रवृत्तिहेतु' पदमिदं लक्षणे न निवेशनीयम्। तर्हि कथमत्र प्रवृत्तिहेतुपदं प्रविष्टम्? अत्र प्रवृत्तिहेतुपदं प्रयोजनलक्षणघटकं नास्ति, स्वरूपकथनमात्रमेव। तस्मात् कारणाद् वृत्तिकारेणोक्तम्–**"प्रवृत्तिहेत्विति स्वरूपकथनम्"**[8] इति।

तथापि भिन्नरीत्या इमां शङ्कां निवारयितुं शक्यते। एकदेशीय–मतप्रदर्शनेन विश्वनाथन्यायपञ्चाननेन प्रोक्तम्– "इच्छाविषयत्वं प्रयोजनत्वम्" इति लक्षणं भवति चेत् तक्षकचूडामणौ सुमेरुपर्वतादौ च सुखसाधनपदार्थप्राप्ते–रिच्छाविद्यमानत्वे सति तत् तदिच्छाविषयत्वमपि विद्यमानम्, तर्हि तत् तत् स्थले प्रयोजनलक्षणस्यातिव्याप्तिः स्यात्। अत इच्छाविषयत्वं प्रयोजनस्य लक्षणं न स्यात्। प्रवृत्तिहेतुभूतेच्छाविषयत्वं प्रयोजनत्वमिति लक्षणेनातिव्याप्तिं निवारयितुं शक्यते। तक्षकचूडामणावित्यादौ प्राप्तेरिच्छाविषयविद्यमानत्वेऽपि उक्तेच्छाप्रवृत्तेर्जनको न भवति। अर्थात् तक्षकचूडामणिसंग्रहे कोऽपि प्रवृत्तं न भवति। अतएव तत् तत् पदार्थप्राप्ताविच्छाविषयसत्त्वेऽपि हेतुभूतेच्छा–विषयत्वं न विद्यते। अत्र 'प्रवृत्तिहेतुपदम्' तक्षकचूडामणिप्रभृतौ पदार्थप्राप्तौ प्रयोजनलक्षणस्यातिव्याप्तेर्निवारकम्। अस्मिन् प्रसङ्गे वृत्तिकारेणोक्तम्– **"तक्षकचूडामणिसुमेर्वादिप्राप्तिवारकं तदिति केचित्"**[9] इति।

वृत्तिकारेण मुख्यगौणभेदेन प्रयोजनपदार्थस्य द्विविधत्वं प्रदर्शितम्। सुखदुःखयोरभाव एव मुख्यप्रयोजनम्। अपि च सुखदुःखसाधनयोरभावसामग्री एव गौणप्रयोजनम्। किमर्थं सुखादिरेव मुख्यप्रयोजनं तथा सुखादिसाधनमेव गौणप्रयोजनम्? उत्तरे वृत्तिकारेणोक्तम्– **"अत्र च निरुपाधीच्छाविषयत्वात् सुखदुःखाभावयोर्मुख्यं प्रयोजनत्वम्। तदुपायस्य तु तदिच्छाधीनेच्छा–**

8. न्या.सू.वृ.– 1.1.24
9. न्या.सू.वृ.–1.1.24

**विषयत्वात् गौणं प्रयोजनत्वमिति"**[10]। अर्थात् सुखेच्छा दुःखाभावेच्छा च अन्येच्छाधीना न वर्तते। अतएव सुखेच्छा तथा दुःखाभावेच्छा भिन्नेच्छानधीनभूतसत्त्वेऽपि तत् तदिच्छाविषयसुखादिरेव मुख्यप्रयोजनस्वरूपः। अपरपक्षे, सुखसाधनशकटादिप्राप्तेरिच्छा अहिदंशनादिदुःखाभावसाधनभूतौष-धादेर्प्राप्तेरिच्छा च यथाक्रमेण सुखेच्छाधीना दुःखाभावेच्छाधीना च भवन्ति एवं भिन्नेच्छानधीनभूतविषयत्वाभावेऽपि तत् तत् प्रयोजनं गौणप्रयोजनम्। सापेक्षनिरपेक्षयोर्मध्ये निरपेक्ष एव मुख्यं प्रधानं वा। अतो निरुपाधिकेच्छाविषयत्वं मुख्यप्रयोजनत्वं तथा भिन्नेच्छाधीनभूतविषयत्वं गौणप्रयोजनत्वं वर्तन्ते। नियमोऽस्ति- **"सापेक्षनिरपेक्षयोः निरपेक्षस्यैव प्राधान्यम्"** इति।

**"प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते"** इति न्यायेन जगति किमपि कार्यं प्रयोजनं विना न भवत्येव। कीटादिनां जीवनचक्रेऽपि प्रयोजनपदार्थस्य प्रयोजनत्वं दरीदृश्यते। विषयेऽस्मिन् न्यायमञ्जरीकारो जयन्तभट्टः स्पष्टीकरोति-

**क्रिमेरपि यथा तथा किमपि जीवितं बिभ्रतः।**
**प्रयोजनबहिष्कृतं न खलु चेष्टितं दृश्यते।।**[11] इति।।

लोके प्रसिद्धमेतत् पत्युः सुखादिप्रयोजनाय स्वामी प्रीतिभाजनं न भवति, स्वस्य भार्यायाः सुखादिप्रयोजनाय भार्यायाः स्वामी प्रीतिपात्रं भवति। पत्न्याः सुखादिप्रयोजनाय पत्नी पत्युः समीपे प्रीतिपात्रं न भवति, पत्युः स्वस्य सुखादिप्रयोजनाय पत्युः पत्नी प्रीतिपात्रं भवति। पितुर्मातुश्च वत्सानां सुखादिप्रयोजनाय वत्साः स्नेहभाजनं न भवति, पितुर्मातुर्वा सुखादिहेतोः वत्साः प्रीतिभाजनं भवन्ति। अतो वृहदारण्यकोपनिषदि प्राप्यते- **"न वा अरे पत्युः कामाय पतिः प्रियो भवत्यात्मनस्तु कामाय पतिः प्रियो भवति। न वा अरे जायायै कामाय जाया प्रिया भवत्यात्मनस्तु कामाय जाया प्रिया भवति। न वा अरे पुत्राणां कामाय पुत्राः प्रिया भवन्त्यात्मनस्तु कामाय पुत्राः प्रिया भवन्ति"**[12] इति। महाभाष्येऽपि

---

10. न्या.सू.वृ.- 1.1.24
11. श्रीसूर्यनारायणशुक्लकृतः न्या.म.- पृ. 126
12. वृ.उ.- 4.5.6

शब्दानुशासनस्य प्रयोजनानि दृश्यन्ते **"रक्षोहागमलघ्वसन्देहाः प्रयोजनम्"**[13] इति। तत्र साधुशब्दसमूहज्ञानानां प्रयोजनार्थमिन्द्रः वृहस्पतिसकाशे दिव्यसहस्र-वर्षयावत् शब्दोपदेशग्रहणं करोति। तथाहि- **"वृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं प्रतिपदोक्तानां शब्दानां शब्दपारायणं प्रोवाच नान्तं जगाम"**[14] इति किरणावलीकारोऽपि उत्पत्तिविषये प्रयोजनं दर्शयति। तथाहि-'न हि बीजप्रयोजनाभ्यां विना कस्यचिदुत्पत्तिरिति'।[15] न केवलं न्यायशास्त्रे अपि तु सर्वशास्त्रान्तरेषु प्रयोजनस्योपयोगित्वं विद्यते। अस्माकं दैनन्दिनजीवनेऽपि प्रयोजनं विना किमपि कार्यं न कर्तुं शक्यते इति शम्।

## सन्दर्भग्रन्थसूची


- उदयनाचार्यः, किरणावली, जितेन्द्रः एस. जेटली, बरदाः, ओरियेण्टल इन्स्टीट्यूट, 1971
- पतञ्जलिः, महाभाष्यम् (सं.) सङ्घमित्रा सेनगुप्त, कोलकाता : संस्कृत पुस्तक भाण्डार, 1417।
- वृहदारण्यकोपनिषद् (सं.) डॉ. झर्णा भट्टाचार्यः, कोलकाता : संस्कृत पुस्तक भाण्डार, 1999।
- भट्टः, जयन्तः, न्यायमञ्जरी (सं.) पण्डितराजः श्रीसूर्यनारायणशुक्लः, वाराणसी : चौखम्बा विद्याभवन, 1971।
- भट्टाचार्य्यः, विश्वनाथन्यायपञ्चाननः, न्यायसूत्रवृत्तिः (सं.) सेख साविर आलि, कोलकाता : संस्कृत पुस्तक भाण्डार, 2015।
- महर्षिगौतमः, न्यायदर्शनम् (सं.) श्रीयुक्तफणिभूषणतर्कवागीशः, कोलकाता : पश्चिमवङ्ग राज्य पुस्तकपर्षत्, 2000।


---

13. महाभाष्यम् प.आ.- पृ. 15
14. महाभाष्यम् प.आ.- पृ. 67
15. किरणावली, पृ.- 7

- महर्षिगौतमः, न्यायदर्शनम्, (सं.) श्रीनारायणमिश्रः, दिल्ली : चौखम्बा संस्कृत संस्थान, 1990।
- मिश्रः, केशवः, तर्कभाषा (सं.) डॉ. अनामिकारायचौधुरी, कोलकाता : संस्कृत वुक डिपो, 2010।
- श्रीभारद्वाजोद्योत्करः, न्यायवार्त्तिकम्, वाराणसी : चौखम्भा संस्कृत भवन, 2007।


❑❑❑

# द्वैत-न्यायमतरीत्या वादविमर्शः

-श्रीनिधिःवि*

**कथालक्षणम्**

वादादीनां कथाविशेषत्वात्कथासामान्यलक्षणम् अवश्यं ज्ञेयम्। अत एव "तिस्रः कथा भवन्ति वादो जल्पो वितण्डा च" इति न्यायसूत्रभाष्ये भाषितम्। तथा कथालक्षणेऽपि "वादो जल्पो वितण्डेति त्रिविधा विदुषां कथा" इति परिगणितम्।

ननु कथा नाम वाक्यसन्दर्भः। वाक्यप्रबन्धार्थकान्वात्कथधातोः "चिन्तिपूजिकथिकुम्बिचर्चश्च" इति अङ्प्रत्यये "अजाद्यतष्टाप्" इति टापि कथा- शब्दो निष्पद्यते। अयं च वाक्यप्रबन्धः वादादिभिन्नोऽपि लोके बहुलं दृश्यते। सति चैवमुक्तविभागः कथं संगच्छताम्।

अत्रोच्यते। तिस्रः कथा भवन्ति-वादो जल्पो वितण्डेति। नायं कथानियमः, किन्तु विचारवस्तुनियमः। यद् वस्तु विचार्यते तत् त्रेधाविचार्यते। तत्र विचारः वादो जल्पोवितण्डेति। अयंभावः न यादृशतादृशोवाक्यप्रबन्धोऽत्र-कथापदेनविवक्षितः, अपि तु 'मुख्यामुख्ययोर्मुख्येकार्यसंप्रत्ययः' इति न्यायेन विचारार्हवस्तु- विषयक-वाक्यप्रबन्ध एव। तस्यैव सप्रयोजनत्वेन मुख्यत्वादिति (न्या० ली)।

तत्त्वनिर्णय-विजयान्यतर-स्वरूपयोग्य-न्यायानुगत-वचनसंदर्भः कथा। लौकिकविवादवारणाय न्यायेत्यादि। यत्रैकेन न्यायः प्रयुक्तः। अपरेण तु मतपरिग्रहोऽपि न कृतस्तद्वारणायाऽऽयंविशेषणमिति (न्या० वृ०)।

अनेकविद्वत्कर्तृको विचारगोचरो वाक्यप्रबन्धः कथा। वैदुष्यं च

---

* शोधच्छात्रः, न्यायविभागः, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः, नवदेहली।

कथा- महावाक्यस्य निर्वाहकत्वम्। पूर्वोत्तरपक्ष-बलाबल-चिन्ताविचारः। अत्रानेककर्तृकत्वोक्त्यैककर्तृकेभ्यो मीमांसा वाक्येभ्यो व्युदासः। वैदुष्योक्त्या कलहाद्- गौतमोक्तषट्कक्ष्यादिरूपकथाभासाच्च। विचारगोचरत्ववचनेन-विदुषामन्योऽन्य-मुखव्यवहारेभ्य इति (क०ल०टी०)।

एवमपि देवमीमांसायामतिव्याप्तिः। तत्र बादरायण-पैल-शेषरूपानेक-विद्वत्कर्तृकत्वादि-रूपलक्षणसद्भावात्। समाधानम्-वादिप्रतिवादि-भावापन्नानेक-विद्वत्कर्तृकत्वस्य विवक्षितत्वाद् न दोष इति।

### कथाधिकारिणः

तत्वनिर्णय-विजयान्यवराभिलाषिणः सर्वजन-सिद्धानुभवानपलापिनः श्रवणादिपटवः अकलहकारिणः कभौपयिकव्यापारसमर्था इति (न्या०)। स्वस्थः सर्वजनप्रत्ययावलम्बी सावधानोऽकलहकारश्चेति (क०ल०टी०)।

### कथाविभागफलम्

ननु? कथाविभागः किमर्थं कृतः प्रत्युत निष्प्रयोजनत्वात् न कर्तव्यः, विभागस्य न्यूनाधिक-संख्याव्यवच्छेदः प्रयोजनम्। न च तादृशसंख्यावादिनो-वादिनो दृश्यन्त इति चेद् अत्रसमाधीयते-सन्ति केचिद्वादिनो निरुक्तविभाग-विरोधिनः। एक एव कथामार्ग इति बाह्याः। वादवितण्डे द्वे एवेति श्रीहर्षः। वादः, जल्पः, वादवितण्डा, जल्पवितण्डावाचेतिचतस्रः कथा इति गौडनैयायिकाः। एतन्मतप्राप्तन्यूनाधिक-संख्याव्यवच्छेद एवविभागस्य प्रयोजनम् इति (क० ल०टी०)।

### वादलक्षणम्

न्यायसूत्रं तावत् "प्रमाणतर्कसाधनोपालम्भः सिद्धान्ताविरुद्धः पञ्चावयवोपपन्नः पक्षप्रतिपक्षपरिग्रहो वादः" इति (न्या.सू-1-2-1)

### पक्षप्रतिपक्षपरिग्रहः वादः

पक्षप्रतिपक्षौ विप्रतिपत्तिकोटी तयोः परिग्रहः=तत्साधनोद्देश्यकोक्ति-प्रत्युक्तिरूपवचनसन्दर्भः वादः (व्या.वृ)

एकाधिकरणौ विरुद्धावेककालावनवसितौ वस्तुधर्मी पक्षप्रतिपक्षौ। अत्रास्त्यात्मानास्त्यात्मा इति उदाहरणम्। अत्रानित्याबुद्धिः, नित्य आत्मेत्यादौ, द्रव्यं गुणवत्क्रियावच्चेत्यादौ, द्रव्यं क्रियावत् अक्रियं चेत्यादौ, निश्चितस्थले, असंदिग्धत्वेन विचाराप्रयोजके वस्तुसामान्ये चातिव्याप्तिवारणाय क्रमेण पक्षप्रतिपक्षविशेषणानि ज्ञेयानि (न्या०वा०)।

**प्रमाणतर्कसाधनोपालम्भः**

जल्पादावतिव्याप्तिवारणायैतद्विशेषणम्, प्रमाणेन=प्रत्यक्षादिना तर्केण च साधनम्=स्थापना, उपालम्भः=दूषणमत्र सः इतियथाश्रुतार्थः। इदं च जल्पादौ नास्ति, तस्य चछलजातिनिग्रहस्थानसाधनोपालम्भत्वाद् इति (न्या०वृ०)

ननु साधनोपालम्भावित्यस्य कोऽर्थः? साध्यतेऽनेनेति व्युत्पत्या न्यासिद्धिकरणं साधनमुपालभ्यतेऽनेनेति व्युत्पत्त्योपालम्भकरणमुपालम्भः। सोऽर्थः परप्रतिपादनार्थ- विचारे सम्भवतीति।

**सिद्धान्ताविरुद्धः पञ्चावयवोपपन्नः**

नन्विदं विशेषणद्वयं किमर्थं? तेनवारणीयस्य लक्षणदोषस्याभावादिति चेत्, अत्र प्रतिवचनं न लक्षणघटकत्वमनयोः, अपि तु वादस्वरूप-परिचयार्थ-मनयोरुपादानम्। परिचयस्तु वादे प्रवर्त्यमान-उद्भावनार्हाणि निग्रहस्थानानि चत्वार्येव हेत्वाभासाः। न्यूनमधिकमपसिद्धान्त इति। वस्तुतस्तु वादस्य-वीतरागकथात्वेनतत्त्वनिर्णयस्योद्देश्यतया पुरुषदोषस्याविज्ञातार्थादेरिव न्यूनाधि-कयोरपि नोद्भाबन मुचितम्। अत एव पञ्चावयवावश्यकत्वं भाष्यकारो नानुमीयते।

हेत्वाभासाद्युद्भावनेनापि च तदैव कथाविच्छेदो यदि हेत्वन्तरेणापि साधयितुं न शक्यते। इतरथा तु तद्धेतोरेव दुष्टत्वम्। इत्थं च पञ्चावयवोपपन्न इति प्रायिकत्वाभिप्रायेणेति तत्त्वमिति (न्या०वृ०)।

अन्येषां प्रतिवचनं तु प्रमाणत्वेन तर्कत्वेन च ज्ञातकरणकसाधनो-पालम्भवति अल्पविशेषेऽतिव्याप्तिवारणायैव विशेषणद्वयोपादानम्। ततश्चाप-सिद्धान्तादिचतुष्टयमात्रोद्भावनार्हत्वमिति दलान्तरं निवेशनीयमिति।

अथवा छलजाति-निग्रहस्थान-साधनोपालम्भो जल्प इति जल्पलक्षण-कथनाद् जल्प एव निग्रहस्थानान्युद्भावनीयानि न तु वाद इति शङ्कापरिहारार्थं-विशेषणद्वयम्। अस्ति वादजल्पयोः स्वरूपकृतोऽपि विशेषः। वादजल्पयोर्निग्रह-स्थानोद्भावनार्हत्वमात्रेणाभेदप्रतीतावपि वादेऽपसिद्धान्तन्यूनाधिकहेत्वाभासानां चतुर्णामेवोद्भावनमिति नियमः। एतन्नियमाभावो जल्पे, अन्येषामपि तेषा-मुद्भावनार्हत्वात्। न च वाच्यं कथं पुनरयं नियमो वादे चत्वार्येवोद्भा-व्यानीत्यादिरिति। गुर्वादिभिस्सह वादोपदेशाद् इति नियमः। यस्मादयं तत्त्वबुभुत्सुगुर्वादिभिस्त्रिविधं फलमाकाङ्क्षन्वादं करोति, ततोऽस्य तत्व-बुभुत्सावतस्तावत्साधनं वक्तव्यं यावदनेनज्ञातव्यम्, अप्रतिद्वन्द्वित्वात्। प्रतिद्वन्द्विना सह न वादः, किन्तु जल्पः। अतस्तत्र समस्तनिग्रहस्थानप्रयोग इव युक्तम्, इति (न्या० वा०)।

**अथकथालक्षणानुसारिवादलक्षणम्**

> **तत्त्वनिर्णयमुद्दिश्य केवलं गुरुशिष्ययोः।**
> **कथाऽन्येषामपि सतांवादोवासमितेः शुभा॥**

इति कथालक्षणग्रन्थस्तावत्।

केवलं तत्त्वनिर्णयमुद्दिश्य (प्रवर्तमाना) कथा वाद इति प्रथमं लक्षणम्। तत्र तत्त्वम् = प्रमाणसिद्धं वस्तु। तस्य निर्णयस्त्रिविधः- अज्ञातस्य ज्ञानम्, संशयविपर्ययव्युदासः, अभ्यनुज्ञानेन दृढीकरणं चेति। 'तत्त्वनिर्णयसाधनं कथा वादः' इत्यभिधाने जल्पविशेषेऽतिव्याप्तिः। तथा हि यदा हि ख्यात्याद्यर्थयमानौ विजिगीषू सद्भ्यामेव साधनदूषणाभ्यां स्वपरपक्षसाधनो-पालम्भौ कुर्वाते स जल्पोऽपि तत्त्वनिर्णयहेतुर्भवति। नाह्यसदेव जल्पे वक्तव्यमितिनियमः, प्रतीयमानसदति क्रमे कारणाभावात्। किं नाम सदपरिस्फूर्तावैकान्तिकपराभवाद्वरः पाक्षिक इति मन्वानोऽसदप्युपादत्ते। न च तत् साधनं तत्त्वनिर्णयं न करोतीति, व्याघातात्। एवं प्रसक्ताया अतिव्यातेर्वारणाय तत्त्वनिर्णयोद्देश्यकत्वमिति कथितम्।

अत्र लक्षणे केवलपदाभावे वितण्डाविशेषेऽतिप्रसङ्गापत्तिर्वितण्डा-विशेषश्च-यदा च स्वयमध्यवसितार्थः कारुणिकतया पाषण्डप्रसञ्जितौ-लोकस्य संशयविपर्ययौ पराकर्तुं तज्जिगीषुर्या वितण्डामारभते सा। साऽपि

तत्त्वनिर्णयमुद्दिश्य कथा भवत्येवेति तत्र प्रसङ्गपरिहाराय केवलमिति पदम्। पाषण्डजयस्यापितत्रोद्देश्यत्वेन तत्र नातिप्रसङ्गः। न च वाच्यं या वितण्डा-लोकसंशय-विपर्ययनिरासख्यात्यादिकं चोद्दिश्य प्रवर्तते, तस्या अनेन व्युदासो यातु, केवलं संशयाय पाकरणायैव, कथं ततो व्यावृत्तिरिति। केवलशब्दस्य साक्षादर्थत्वाद् न हि-कायि वितण्डा साक्षात् तत्त्वनिर्णयं करोति, किन्तु परम्पराद्वारैवेति।

## सतां कथा वाद इत्यपरंवादलक्षणम्

तर्हि जल्पेऽतिव्यापकम् इत्यतः सन्तो व्याख्यातारो गुरुशिष्ययोरन्येषां सखि-सब्रह्मचार्यादीनामिति।

ननु यदा विदिततत्त्वावदुष्टमनसौ परप्रार्थि नीकथां कुरुतः स वादो न वा? आद्येऽव्यापकमाद्यं लक्षणम्, द्वयोरपि तत्त्वज्ञानितया तदुद्देशिताऽभावात्। द्वितीये द्वितीयमतिव्यापकम्। सेयमुभयतः पाशारज्जुरिति। अत्रोच्यते-न केवल-मिय वादकथा, कथकगत-तत्त्वनिर्णयार्था विवक्षिता। किं नाम, यदा गुरुशिष्यौ तदा शिष्यस्य, यदि सखिप्रभृतयस्तदासर्वेषाम्, यदा तु विदिततत्त्वी तदा कृतप्रार्थनायाः समितेः शुभस्य तत्त्वनिर्णयस्यहेतुः। सामान्यञ्चान्यत्र विवक्षितम्। न च सामान्येनोक्तस्य विशेषाबलम्बेन दोषावकाश इति (क०ल०टी०)।

## वादाधिकारिणः

वादाधिकारिणस्तु तत्त्वबुभुत्सवः प्रकृतोक्तिका अविप्रलम्भका यथा-कालस्फूर्तिका अनपेक्षका युक्तिसिद्धप्रत्येतार इति (न्या०वृ०)।

अदुष्टमनसः सन्तो वादाधिकारिणः। ते च गुरुशिष्यौ सखिसब्रह्मचार्या-दयः प्रकृतोक्तिका अविप्रलम्भका यथाकाल-स्फूर्तिका अनपेक्षकाः प्रमाणसिद्ध-सम्प्रत्याविनश्च इति (क०ल०टी०)।

प्रतिषिद्धस्तुतिमानलिप्सोर्वाद इति (न्या०वा०)।

वादं च निर्णयफलार्थिभिरेव शिष्य-सब्रह्मचारिगुरुभिः सह वीतरागैः।

न ख्यातिलाभ-रभसप्रतिवर्धमान-स्पर्धाऽनुबन्धविधुरात्मभिरारभेत। इति। (न्या० मं०)

यथाशक्ति यथानियममानापमानव्यञ्जनादिकम्। तथा हि वादे प्रसक्तस्य पराजयहेतुस्तत्त्वनिर्णयवैलोम्यम्। स हेतुर्द्विविधो मुख्यामुख्यभेदात्। तत्र वादिप्रतिवादिभ्यामभिलषितस्य तत्त्वनिर्णयस्य विरुद्धाचरणं विरुद्धवचनं वा वादे मुख्यः पराजयहेतुः, कथावसानकारणत्वात्। इतरोऽमुख्यः, कथावसाना-हेतुत्वात्। तत्र वादिनः प्रतिवादिनोत्वात स्वनिर्णयवैलोम्ये प्राप्ते तत्र च तेन संवादेकृते विमलबोद्धृतया स्तुत्यतैवस्यान्नपराजितत्वेनापमानः। इतरस्य च निर्णीतवतोगुरुत्वं स्यादिति स्थिति इत्यलं नातविस्तरेण।

❑❑❑

# न्यायाभिमतान्यथाख्यातिवादः

-मिन्टु दे*

भारतीयदर्शने यथार्थानुभवः प्रमाशब्देनाभिधीयते। अतः प्रमायाः करणरूपत्वेन प्रमाणानां प्रसिद्धिः अनुभूयते। यद्यपि प्रमाणशब्दस्यार्थः यथार्थानुभवः भवितुमर्हति भावे प्रमीयते इति प्रमाणं व्युत्पत्त्यानुसारेण। अतः यदि प्रमाणशब्दः करणव्युत्पत्तिस्मारकं भवति चेत्तर्हि तत्र प्रमाणशब्दः प्रमीयते अनेनेति करणबोधकं भवति। तत्तु प्रमायाः करणसदृशः प्रमाणरूपः भवति। प्रायशः शास्त्रे करणबोधकप्रमाणशब्दस्य प्रयोगः दृश्यते। भारतीय-दर्शनसम्प्रदायमध्ये प्रमाणविभागविषये वादानुवादसत्त्वेऽपि दर्शनसम्प्रदायकुले प्रत्यक्षप्रमणस्य प्रामाण्यमङ्गीकुर्वन्ति। प्रत्यक्षप्रमाणविषये स्वाभाविकतया प्रश्नः आयाति- प्रत्यक्षप्रमाणम्सर्वत्रैव यथार्थज्ञानस्य प्रकाशकः भवति न वा? यदि तस्यावधारणं सर्वत्रैव याथार्थ्य स्वीकृयते चेत्तर्हि इदमेव कथनमध्ये असङ्गतिः आगच्छति भ्रमज्ञानस्य विद्यमानत्वात्। अतः भारतीयदर्शने प्रत्यक्षप्रमाणेन सह भ्रमविषयकप्रत्यक्षसम्बन्धीयालोचनायाः वर्णनं तुल्यत्वेन प्राप्यते। अतः एवमेव जायमानं सर्वमपि ज्ञानमप्रमैवेत्यपि वक्तुं न शक्यते। अतः विवेकिभिः सर्वैरपि प्रमात्मकमप्रमात्मकज्ञानमभ्युपेयम्। इदमेव भ्रमविषयकप्रत्यक्षसम्बन्धीयालोचनं भारतीयदर्शने 'ख्यातिवादः' इति नाम्नाभिधीयन्ते शास्त्रकारैः। ख्यातिवादः इति पदस्थितः ख्यातिशब्दः ज्ञानशब्दपरकः। व्यक्तायां वाचि विद्यमानात् चक्ष्-धातोः क्तिन्- प्रत्ययेन ख्यातिशब्दः निष्पन्नः जातः। 'ख्याप्यते इति ख्यातिः' इति व्युत्पत्त्यनुसारेण ख्यातिशब्दः ज्ञानपरकः भवति। ख्यातिशब्दस्य ज्ञानम् इत्यर्थः। दर्शनशास्त्रे ख्यातिशब्दः भ्रमे भासमानवस्तुनः ज्ञाने रूढः। नैयायिकानां मते तु-

---

* शोधच्छात्रः, न्यायविभागः, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः, नवदेहली।

अप्रमा, अयथार्थानुभवः, भ्रमः, विपर्ययः, मिथ्याज्ञानम्, ख्याति- रित्यनर्थान्तरम्[1] इति। सांख्यानां मतानुसारम्- 'सत्त्वपुरुषयोः प्रकृतिपुरुषयोरन्यतया अन्यत्वेन-मियोभिन्नत्वेन ख्यातिं ज्ञानं चाधिगम्य प्रकृतिपुरुषौ भिन्नाविवितिज्ञात्वेत्यर्थः प्रकृतिपुरुषयो विवेकग्रहणात्संसारः विवेकात्मुक्तिरिति'[2] इति। माघेनापि उक्तम्-'ख्यातिञ्च सत्त्वपुरुषान्यतयाऽधिगम्य वाञ्छन्ति तामपि समाधिभृतो निरोद्धुमः'। न्यायवार्तिककार-भारद्वाज-उद्योतकरेणापि ज्ञानार्थबोधकख्याति-शब्दस्य व्यवहारः कृतः[3]। वाचस्पतिमिश्रेणापि विपर्ययग्रन्थव्याख्यानावसरे इदं प्रथमतया अन्यथाख्यातिपदं तत्पर्यायतया प्रयुक्तम्[4]। प्रशस्तपादभाष्ये विपर्ययशब्दः अतस्मिंस्तदिति प्रत्ययपरतया व्याख्यातः[5]। गदाधरभट्टाचार्येणापि-'असत्ख्यातिः' इत्यस्य व्याख्यानांशे ख्यातिर्ज्ञानम् इति समुपदर्शितम्। योगदर्शनेऽपि सममेव वर्णितम्। व्यासदेवकृतयोगभाष्ये तु 'एकमेव दर्शनं ख्यातिरेव दर्शनम्[6]' इत्यत्र चित्तस्योत्पत्तिः विनाशशीलवृत्त्यर्थे प्रयुक्तः ख्यातिशब्दः। तथापि 'ख्यातिः' शब्देन भ्रमीयविषयस्य प्रतीति एव जायते। अपरस्तावत् 'वादशब्दः', यस्यार्थः 'विचारः' एव नैयायिकैः उपस्थापितः। अतः स्वीकृतः यः मतवादः भ्रमविषयकः भ्रमीयविषयस्य स्वरूपः वा आधारीकृत्यैव अग्रे प्रसरति, सः एव ख्यातिवादः। दार्शनिकाः भ्रमे भासमानवस्तुनः स्वरूपविषये विविधमतानि उपस्थापयन्ति। अतः विविधख्यातयः प्रसिद्धाः सन्ति। भारतीयदर्शने मुख्यतया ख्यातिवादस्य पञ्चविधत्वमङ्गीकृतम्। शास्त्रेऽपि ख्यातिवादस्य ख्यातिपञ्चकं नाम्नाऽपि उल्लेखः प्राप्यते। ख्यातिवादस्य पञ्चविधत्वप्रतिपादकचरणमस्ति-

**आत्मख्यातिरसत्ख्यातिरख्यातिः ख्यातिरन्यथा।**
**तथाऽनिर्वचनख्यातिरित्येतत् ख्यातिपञ्चकम्॥**

---

1. न्यायदर्शनम्
2. सांख्यदर्शनम्
3. न्यायवार्तिकम्
4. 'केचित् स्वाकारबाह्यत्वविषयं ज्ञानं विपर्यय इत्याचक्षते। अन्ये असद्विषयं ज्ञानम्।.... अन्यथाख्यातिं तु वृद्धाः। ता.टी.160
5. अतस्मिंस्तदिति प्रत्ययो विपर्ययः, यथा गव्येवाश्च इति। प्र.भा.88
6. पातञ्जलयोगदर्शनम्, पादः-1, सूत्रम्-4

**योगाचारा माध्यमिकास्तथा मीमांसका अपि।**
**नैयायिका मायिनश्च प्रायः ख्यातीः क्रमाज्जगुः॥**[7] इति।

श्लोकेऽस्मिन् उल्लिखितपञ्चविधख्यातिवादस्य राहित्येऽपि भारतीय-दर्शने पृथक्तया अपरख्यातिनामुल्लेखः प्राप्यते। यथा-निर्विषयख्यातिः, निरधिष्ठानख्यातिः, भोजराजकृतः अलौकिकख्यातिः, प्रसिद्धार्थख्यातिः, वैयाकरणसांख्ययोः सदसत्ख्यातिः, प्रभाकरमिश्रकृतः विवेकख्यातिः, अचिन्त्यख्यातिः, अभिनवान्यथाख्यातिश्च प्रभृतयः प्रसिद्धाः सन्ति। अतः ख्यातिवादः पञ्चविधः इति तु न युक्तियुक्तः। यदि सत्ख्यातिः, असत्ख्यातिः, सदसत्ख्यातिः, अनिर्वचनीयख्यातिश्च स्वीकरोति चेत् तर्हि अयमेव चतुर्विधख्यातिवादस्य अन्यतमत्वे प्रसिद्धाप्रसिद्धख्यातिनाम् अन्तर्भावः सम्भवति।

आत्मख्यातिवादे विज्ञानधर्मस्य सत्यस्य एव रजतस्य भ्रमस्थले स्वीकारात्, अख्यातिवादे च स्मृतिविषयस्य सत्यस्य एव विषयस्य शुक्तौ इदं रजतम् इति ज्ञानस्थले अङ्गीकारात्, अन्यथाख्यातिवादे च देशान्तरस्थस्य सत्यस्यैव रजतस्य भ्रमस्थले प्रतीयमानत्वात् एतेषां सत्ख्यातिः इत्यभिधानेनापि व्यपदेशो भवति। उच्यते च इष्टसिद्धिकारेण विमुक्तात्मना-

**अन्यथाख्यातिरख्यातिरात्मख्यातिरिति त्रयः।**
**सत्ख्यातिपक्षा नैतेऽपि विना सिद्ध्यन्ति मायया॥**[8] इति।

नैयायिकानां भाट्टमीमांसकानां च ख्यातिविषयकवादः अन्यथा-ख्यातिवाद इत्युच्यते। विपरीतख्याति इत्यस्य नामान्तरमस्ति। अन्यथा-ख्यातिर्नामान्यस्यान्यरूपेण प्रतीतिः। अतः 'अन्यथा अन्यरूपेण ख्यातिर्ज्ञानम्' इति। अर्थात् यस्य यद्धर्मवत्वेन ज्ञानमुचितं तस्य तद्भिन्नधर्मेण ज्ञानम्। अन्यरूपशब्दे रूपशब्दार्थः धर्मोऽस्ति। अतः धर्मरूपेण अर्थात् अन्यधर्मेण प्रतीयते। यथा- ह्रदो वह्निमानित्यादिज्ञानं तच्च भ्रमात्मकं तद्भाववति तत्प्रकारकत्वात्। तच्च विशिष्टमेकं ज्ञानं तस्यैव प्रवर्त्तकत्वात् तथा च

7. यतीन्द्रमतदीपिका, पृ.-8
8. श्रीभाष्यम्

शुक्तौ रजतत्वभ्रमात् रजतार्थिनः तद्ग्रहणे प्रवृत्तिरूपः जायते। तदनुसारं शुक्तिवस्तुनि इन्द्रियसन्निकर्षः सत्त्वे दोषवशात् शुक्तित्वधर्मस्य ज्ञानमभूत्वा रज तत्वधर्मस्य ज्ञानं जायते। इत्यत्र रजतत्वधर्मः शुक्तेः व्यधिकरणधर्मत्वेन अर्थात् रजतत्वनिष्ठप्रकारतानिरूपित-शुक्तिनिष्ठविशेष्यताशाली-विशिष्टज्ञानत्वेन अवभाषते[9] इत्थं च शुक्तेः शुक्तित्वरूपेण प्रतीतिः अभूत्वा शुक्तिभिन्नरजतत्वस्य धर्मपूर्विकाः प्रतीतिः जायते। देशकालान्तर्गतं रजतमेव शुक्तित्वं प्रयुक्तेन दोषोपहतेनेन्द्रियेण शुक्ल्यात्मना गृह्यते। न चैवमननुभूतस्यापि ग्रहणं स्यादिति वाच्यम्, सादृश्यादेर्नियामकत्वात्। प्रयोगश्च विवादपदं शुक्तिसकलं रजतज्ञान-विषयो रजतोपायान्यत्वे सति रजतार्थिप्रवृत्तिविषयत्वात्सत्यरजतवत्। रजत-स्योपायः कारणं खन्यादिः। तस्य रजतार्थिप्रवृत्तिविषयेऽपि रजतज्ञान-विषयत्वाभावाद्व्यभिचारः। तद्वारणाय सत्यन्तं विशेषणमुपात्तमिति नैयायिकाः। इयमन्यथाख्यातिः भवति। मणिकारेण अन्यथाख्यातिसाधकानि अनुमानानि ग्रन्थे प्रदर्शितानि।[10] परन्तु भाट्टैः अन्यथाख्यातिवादः स्वीक्रियते एवञ्च नैयायिकैः विपरीतख्यातिवादः स्वीक्रियते एवं राद्धान्तः प्रचलितः आसीत्। वस्तुतः अन्यथाख्यातिवादविपरीतख्यातिवादयोर्मध्ये नास्ति किञ्चन मतवैषम्यमिति। तदर्थमेव नव्यनैयायिकैः विपरितख्यातेः 'अन्यथाख्यातिः' नामग्रहणं क्रियते। तेषां मते तु विपरीतख्यातिः मात्रमेव हि अन्यथाख्यातिः; किन्तु सर्वविधः अन्यथाख्यातिः न हि विपरीतख्यातिः। अन्यथाख्यातिवादः वैशेषिकदर्शनस्वीकृतेऽपि वैशेषिकाचार्यैः अन्यथाख्यातिनामधेयेन नाङ्गीक्रियते। इत्यस्मिन्विषये कणाद-प्रशस्तपादाचार्य-व्योमशिवाचार्यादयः आचार्याः

9. तर्कभाषा, पृ.-444

10. तानि च यथा-

(क) 'विसंवादिप्रवृत्तिः विशिष्टज्ञानजन्या, प्रवृत्तित्वात्, संवादिप्रवृत्तिवत्'। संवादिप्रवृत्तौ विशिष्टज्ञानस्य हेतुत्वोपगमेन विसंवादिप्रवृत्तावपि तस्य हेतुत्वमनपलपनीयम्।

(ख) 'रजतेच्छाजन्यशुक्तिविषयप्रवृत्तिजनकरजतत्वप्रकारकं ज्ञानं शुक्तिविशेष्यकम्, शुक्तिप्रवृत्तिप्रयोजकज्ञानत्वात्, शुक्तौ शुक्त्यर्थिप्रवृत्तिप्रयोजकज्ञानवत्।'

(ग) 'विवादास्पदं शुक्तिविशेष्यकं ज्ञानं रजतत्तप्रकारकम्, रजतेच्छाजन्य-प्रवृत्तिहेतुज्ञानत्वात्, सत्यरजतज्ञानवत्।'

सुस्पष्टतया स्वाभिमतं न प्रदर्शितम्। परन्तु न्यायकन्दलीकारेण श्रीधरभट्टेन विपरीतख्यातिवादस्य उपस्थापनं सुस्पष्टतया ग्रन्थे उपस्थापितम्।[11] उदयणाचार्येणापि किरणावलीग्रन्थे परीतख्यातिवादस्य समर्थनं कृतम्।[12] भाट्टमते तु अन्यथाख्यातिः द्विविधः- मिथ्याज्ञानमभावज्ञानञ्चेति भेदेन। भाट्टैस्तावद् भ्रमज्ञाने अन्यस्य अन्यथाभानात्मिका ख्यातिः अन्यथाख्यातिरिति काचन ख्यातिरूरीक्रियते।[13]

मिथ्याज्ञाने यथा एकः भाववस्तु अन्यरूपेण ज्ञानस्य विषयं भवति तथैव अभावज्ञानेऽपि अन्यत्र सद्वस्तु अन्यरूपेण ज्ञानस्य विषयं भवति। न्यायसूत्रकारैः भ्रमज्ञानं मिथ्याज्ञानरूपेण वर्णितम्।[14] मिथ्याज्ञानं नाम विपरीतख्यातिः इति तु तात्पर्यटीकायां भाष्यकारैः अटीकितम्। मिथ्याज्ञानं भवति विविधरूपेणावस्थितं वस्तुं यत् अन्यरूपेण ज्ञायते। प्राचीनैः तु मिथ्याज्ञानम् अन्यथाख्यातिरूपेण बोध्यते। नव्यैरपि मतमिदं समर्थ्यते।

भामतीग्रन्थे वाचस्पतिमिश्रेण अन्यथाख्यातिवादस्यालोचनां विशेषरूपेण न कृतः परन्तु असद्ख्यातिं निराकुर्वन् अनिर्वचनीयख्यातेः स्थापना कृता। अतः अन्यथाख्यातिवादः अनावश्यको इति मत्वा वाचस्पतिमिश्रेण परित्यक्ता। किन्तु केचन जनाः अवश्यं सन्दिह्यमाना आसन् यत् टीकाकारस्य अन्यथाख्यातिवादः अभीष्टः वर्तते। तथाहि कल्पतरुकारेणोक्तम्-

**स्वरूपेण मरीच्यम्भो मृषा वाचस्पतेर्मतम्।**
**अन्यथाख्यातिरिष्टा स्येत्यन्यथा जगृहुर्जनाः॥**[15] इति।

नव्यैः अयथार्थानुभवान्तर्गतः विपर्ययः भ्रमज्ञानरूपेण मिथ्याज्ञानरूपेण वा बोध्यते। भ्रमज्ञाने विशेष्यस्तु अन्यवस्तुनः धर्मेण विशिष्टरूपेण प्रतीयमानत्वात्भ्रमं हि अन्यथाख्यातिः। अन्यथाख्यातिवादीभिः प्राचीनैः तथा

---

11. न्यायकन्दली
12. किरणावली, पृ.-442
13. तस्माद्यदन्यथा सन्तमन्यथा प्रतिपद्यते। तन्निरालम्बनं ज्ञानमभावालम्बनं च तत्॥ श्लोकवार्तिकम्, 245
14. न्यायदर्शनम्
15. कल्पतरुः, अ.भा.पृ-24

नव्यनैयायिकैः कथ्यते यत् भ्रमस्य अधिष्ठानमारोप्यं चेति विषयद्वयमेव सत्यवस्तुः। सर्वैः नैयायिकैः केवलं धर्मांशे हि भ्रमः स्वीकृयते न तु धर्म्यंशे स्वीक्रियते। अन्यथाख्यातिवादी नैयायिकैः सत्ख्यातिवादीरूपेणापि अभिधीयते। तेषां मतेऽपि अधिष्ठानमारोप्यमिति द्वयमेव सत्यवस्तुः।

परन्तु प्राचीननैयायिकैः भ्रमे लौकिकप्रत्यक्षं स्वीकृतेऽपि नव्यनैयायिकैः तु व्यवहृतसत्यरजतेषु लौकिकप्रत्यक्षं न स्वीक्रियते। तेषां नये तु आदावेव चक्षुरिन्द्रियैः लौकिकसन्निकर्षत्वादेव शुक्तौ लौकिकप्रत्यक्षं भवति। अतः परमेव शुक्तिकया रजतस्य सादृश्यवशादेव रजतस्य संस्कारवशादेव रजतस्य स्मृतिर्भवति। एतत् स्मृतिर्ज्ञानं ज्ञानलक्षणासन्निकर्षरूपेण व्यवहृतसत्यरजतस्य अलौकिकचाक्षुषप्रत्यक्षं भवतीति शिवम्।

## सहायकग्रन्थसूची


1. अन्नम्भट्टः, तर्कसंग्रहः, सम्पा. नारायणचन्द्रगोस्वामी, कोलकाताः, संस्कृतपुस्तकभण्डार, 2007।
2. ख्यातिवादेरदिग्दर्शन, सम्पा. मृदुला भट्टाचार्यः, कोलकाताः, महाबोधी बुक एजेन्सी, 2015।
3. गौतम, न्यायदर्शन् (1), सम्पा. फणिभूषणतर्कवागीश, कोलकाताः, पश्चिमवङ्गराज्यपुस्तकपर्षत्, पञ्चमसंस्करणम्, 2014।
4. गङ्गेशोपाध्यायः, तत्त्वचिन्तामणिः, सम्पा. नगीन जी शाह, दिल्लीः, मोतिलालबनारसीदासः, प्रथमसंस्करणम्, 2005।
5. वाचस्पतिमिश्रः, न्यायवार्तिकतात्पर्यटीका, काशी, काशी सं सीरीज, विद्यालयप्रेस, 1925।
6. उद्योतकरः, न्यायवार्त्तिकम्, सम्पा. विन्ध्येश्वरीप्रसाद द्विवेदी, दिल्ली, इस्टर्नबुकलिंकर्स, 1986।
7. भट्टाचार्यः, विश्वनाथन्यायपञ्चाननः, न्यायसिद्धान्तमुक्तावली, सम्पा. श्री. कृष्णवल्लभाचार्यः, वाराणसी, चौखम्बासंस्कृतसंस्थानम्, षष्ठसंस्करणम्, 2003।

8. भट्टाचार्यः, विश्वनाथन्यायपञ्चाननः, भाषापरिच्छेदः, सम्पा. डॉ० अनामिका रायचौधुरी, कोलकाता, संस्कृतपुस्तकभाण्डारम्, द्वितीयसंस्करणम्, 2009।

9. मिश्रः, केशवः, तर्कभाषा, सम्पा. गङ्गाधरकरः, कोलकाताः महाबोधि–वुकएजेन्सि, तृतीयसंस्करणम्–2019।

10. सांख्यदर्शनेर विवरण, सम्पा. विधुभूषणभट्टाचार्यः, कोलकाता, पश्चिमवङ्गराज्यपुस्तकपर्षद्, 1984।

❒❒❒

# न्यायनये प्रमाणतत्त्वनिर्वचनम्

**- जगत् ज्योति पात्र:***

भूमिका- प्र-उपसर्गकमाधातो: "कृत्यल्युटो बहुलम्"[1] इत्यनेन करणे ल्युटि प्रत्ययेऽर्थे 'कृत्यच:'[2] इत्यनेन णत्वे प्रमाणपदवाच्यसिद्धः भवति। 'प्रमीयते येन तत् प्रमाणमिति'[3] करणव्युत्पति:। अर्थात् "प्रमाकरणं प्रमाणम्"[4] इत्यर्थ:। प्रमाकरणमिति षष्ठीतत्पुरुष: भवति न तु कर्मधारय:।

भावव्युत्पत्त्या प्रमापरोऽपि क्वचित्। यद्यपि प्रमाता प्रमाणं प्रमेयं प्रमितिरिति चतसृषु विधासु तत्त्वं परिदृश्यते तथापि क्रियासिद्धौ विवक्षितं प्रकृष्टोपकारकं करणं भवति। अत: "प्रमाता येन अर्थं प्रमिणेति तत्प्रमाणम्"[5] इति भाष्यकारवचनसिद्धम्। प्रमाया: करणं यथा चक्षुरादिप्रत्यक्षात्मकं प्रमाया: प्रमाणम्। अनुमितौ च लिङ्गदर्शनं प्रमाणम्। उपमितौ च सादृश्यज्ञानं प्रमाणम्। शाब्दे च वेदा: प्रमाणमित्यादौ शब्द: प्रमाणम्। "उपलब्धिसाधनानि प्रमाणानीति समाख्यानिर्वचनसामर्थ्याद् बोद्धव्यम्- प्रमीयतेऽनेनेति करणार्थाभि-धानो हि प्रमाणशब्द:"[6] इति। परन्तु प्रमाणलक्षणनिरूपणावसरे दार्शनिकानां मध्ये यथेष्टमतभेद: दरीदृश्यते। तत्र "असन्दिग्धाविपरीतानधिगतविषयक-चित्तवृत्ति: प्रमा तत्साधनं प्रमाणमिति"[7] सांख्या:। "अनधिगततत्त्वबोधपौरुषेयो

---

* पूर्वशोधच्छात्र:, न्यायवैशेषिकविभाग:, श्री.ला.ब.शा.रा.सं.विश्वविद्यालय:, नवदेहली-110016

1. पाणिनीयसूत्रम् 3.3.113
2. पाणिनीयसूत्रम् 8.4.29
3. न्यायमञ्जरी, प्रथमाह्निकम् पृ. 36
4. तर्कभाषा, प्रमाणलक्षणम्, पृ. 7
5. न्यायभाष्यम् 1.1.1
6. न्यायभाष्यम् 1.1.3, पृ. 68
7. सांख्यतत्त्वकौमुदी, कारिका 4

व्यवहारहेतुः प्रमा तत् करणं प्रमाणमिति"[8] तत्त्ववैशारदिकाराः वाचस्पतिमिश्राः। "मन्त्रायुर्वेदप्रामाण्यवच्च तत्प्रामाण्यमाप्तप्रामाण्यात्"[9] इति अक्षपादाः। "अनधिगतार्थगन्तृ प्रमाणम्"[10] इति भाट्टाः। "अदृष्टकरणजन्यमनुपलब्धा-बाधितार्थविषयकं ज्ञानं प्रमा, तत् करणं प्रमाणमि"ति[11] मीमांसकाः। "अनधिगताबाधितार्थकविषयकं ज्ञानं प्रमा, तत् करणं प्रमाणम्"[12] इति वेदान्तिनः। "अदृष्टं विद्या"[13] इत्यत्र करणोत्कर्षेण प्रमोत्कर्षं भवति। तत् करणं च प्रमाणमिति काणादपादाः। "साधनाश्रयाव्यतिरिक्तत्वे सति प्रमाव्याप्तं प्रमाणम्"[14] इति मध्वाः। "प्रमाणमविसंवादिज्ञानार्थक्रियास्थितिः"[15] इति बौद्धाः। "अव्यभिचारिणीमसन्दिग्धामर्थोपलब्धिं विदधति बोधाबोधस्वभावा सामग्री प्रमाणम्, बोधाबोधस्वभावा हि तस्य स्वरूपम्, अव्यभिचारादि-विशेषणार्थोपलब्धिसाधनत्वं लक्षणमि"ति[16] जरन्नैयायिकाः जयन्तभट्टाः प्रतिपादिताः। "अविसंवादकं ज्ञानं सम्यग् ज्ञानं अनधिगतविषयं प्रमाणम्"[17] इति धर्मकीर्तिना प्राहुः। पुराणेऽपि "स्वापूर्वार्थव्यवसायात्मकं ज्ञानं प्रमाणमि"[18]त्येव साधुः।

तत्र प्रमाणलक्षणनिरूपणप्रसङ्गावसरे तार्किकदृष्ट्या विषयसमीक्षणे वरदराजस्य कण्ठशोभिता निःसृतवाणी च समादृता। तद्यथा-

---

8. तत्त्ववैशारदीटिका 1.1.7
9. न्यायसूत्रम् 2.1.68
10. सिद्धान्तचन्द्रोदयः 1 पृ. 20
11. श्लोकवार्त्तिकम्, श्लोकः 100-101, पृ.124
12. वेदान्तपरिभाषा पृ. 16
13. वैशेषिकसूत्रम् 9.2.12
14. सर्वदर्शनसंग्रहः पृ. 389
15. प्रमाणवार्त्तिकम् 2.1
16. न्यायमञ्जरी, प्रथमाह्निकम् पृ. 36
17. न्यायबिन्दुः पृ. 4
18. पद्मपुराणम् 1

**"अविसंवादि विज्ञानं प्रमाणमिति सौगताः।**
**अनुभूतिः प्रमाणं सा स्मृतेरन्येति केचन॥**

**अज्ञातचरतत्त्वार्थनिश्चायकमथापरे।**
**प्रमेयव्याप्तमपरे प्रमाणमिति मन्वते॥**
**प्रमानियतसामग्रीं प्रमाणं केचिदूचिरे"**[19]॥ इति।

अतः तद्वति तत्प्रकारको ज्ञानकरणं ज्ञानं प्रमाणम् इति सिद्धम्।

**दर्शनान्तरेषु प्रमाणभेदप्रदर्शनम्–**

"प्रमीयते परिच्छिद्यते अनेनेति प्रमाणम्"[20]। तत् द्विविधं मानुषं दैविकं चेति। प्रकारान्तरेण प्रमाणं "शब्दोपजीवि शब्दानुपजीवि"[21] भेदेनैव द्विविधम्। इदानीं मतभेदेन दार्शनिकानां मध्ये प्रमाणसंख्याविषये भिन्न-भिन्नमतं परिदृश्यते। यथार्थानुभवः प्रत्यक्षमेव इति चार्वाकाः, अनुमितिरपि इति काणादबौद्धाः, उपमितिरपि इति नैयायिकैकदेशिनः, शाब्दमपीति नैयायिकाः, अर्थापत्तिरिति प्राभाकराः, अनुपलब्धिकोऽपीति भाट्ट-वेदान्तिनौ, साम्भविकैतिह्यकौ अपीति पौराणिकाः, चेष्टिकोऽपीति तान्त्रिकाः। एतत् विषये तार्किकरक्षायाम्–

**"प्रत्यक्षमेकं चार्वाकाः कणादसुगतौ पुनः।**
**अनुमानञ्च तच्चापि सांख्याः शब्दश्च त अपि॥**

**न्यायैकदेशिनोऽप्येवमुपमानञ्च केचन।**
**अर्थापत्या सहैतानि चत्वार्याहुः प्रभाकराः॥**

**अभावषष्ठान्येतानि भाट्टा वेदान्तिनस्तथा।**
**सम्भवैतिह्ययुक्तानि तानि पौराणिका जगुः"**[22]॥

---

19. तार्किकरक्षा श्लोकः 5- 7
20. मिताक्षराटीका, अध्यायम् 2, श्लोकः 22
21. न्यायकुसुमाञ्जलिः
22. तार्किकरक्षा पृ.100

प्रत्यक्षमेकं प्रमाणमिति नास्तिकशिरोमणि चार्वाकाः प्राहुः। प्रत्यक्षानुमानं चेति प्रमाणद्वयं मन्यन्ते कणादप्रधाना वैशेषिकाः। एतन्मते "शब्दोपमानयो-रनुमानविधयैव प्रामाण्यम्"[23] न तु स्वतन्त्रं लाघवप्रसङ्गात्। प्रत्यक्षं परोक्षञ्च भेदेनैव प्रमाणं द्विविधम् इति आर्हताः। प्रत्यक्षानुमानं शाब्दं चेति प्रमाणत्रयं मन्वादयः स्वीयग्रन्थे प्रतिपादिताः। अलौकिकविषये "वेदो ब्रह्मसूत्रं भगवद्गीता श्रीमद्भागवतमिति प्रमाणचतुष्टयमि"ति[24] स्वीकृताः वाल्लभाः। प्रत्यक्षमनुमान-माप्तवचनमिति त्रीणि प्रमाणानि इति सांख्या योगिनो अद्वैततत्त्ववादिवेदान्ति-नश्चाहुः। तथैवोक्तम्-

**"दृष्टमनुमानमाप्तवचनं च सर्वप्रमाणसिद्धत्वात्।**
**त्रिविधं प्रमाणमिष्टं प्रमेयसिद्धिः प्रमाणाद्धि"**[25]॥ इति।

**न्यायनये प्रमाणचतुष्टयम्-**

प्रत्यक्षादि प्रमाणत्रयमिति न्यायस्यैकदेशिनो भासर्वज्ञमतमभिप्रायः। "प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि"[26] इति नैयायिकानां सिद्धान्तः। तत्र शब्दस्य स्वतन्त्रप्रामाण्यमुक्तं "आप्तोपदेशसामर्थ्याच्छब्दादर्थसंप्रत्ययः"[27] "आप्तवाक्यं शब्दः"[28] चेति। यथार्थवक्ताजन्ययथार्थज्ञानादुत्पत्तेः अर्थात् शब्दात्प्रत्येमि इति विलक्षणप्रतीतेर्व्याप्तिनिरपेक्षादाकाङ्क्षादिज्ञानादुत्पत्तेः तत् करणतया शब्दस्यातिरिक्तं प्रामाण्यं न्यायेति सिद्धम्। तथाहि-

**प्रत्यक्षप्रमाणनिरूपणम्-**

"अक्षस्याक्षस्य प्रतिविषयं वृत्तिः प्रत्यक्षम्"[29] इति। वृत्तिस्तु सन्निकर्षो ज्ञानं वा। यदा सन्निकर्षस्तदा ज्ञानं प्रमितिः। 'अक्षमक्षं प्रतीति प्रत्यक्षम्' इति

---

23. तर्ककौमुदी पृ. 8
24. न्यायकोशः पृ. 556
25. सांख्यकारिका 4
26. न्यायसूत्रम् 1.1.3
27. न्यायसूत्रम् 2.1.52
28. तर्कसंग्रहः पृ. 159
29. न्यायभाष्यम् 1.1.3, पृ. 17

करणव्युत्पत्त्या 'प्रत्यक्ष्यतेऽनेनेति प्रत्यक्षम्' इति पदवाच्यं सिद्धिर्भवति।[30] एवञ्च 'कुगतिप्रादयः'[31] इति सूत्रेण 'प्रतिगतम् अक्षम्' इति विग्रहवाक्येन गतिसमासबद्धं 'प्रत्यक्षम्' इति पदमिति समुत्पद्यते।[32] "इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्षम्"[33] इति। अत्र नित्यप्रत्यक्षे अतिव्याप्तिवारणाय 'इन्द्रियार्थसन्निकर्षोत्पन्नं' अर्थात् 'इन्द्रियजन्यत्वमि'ति पदम्। "आत्मा मनसा संयुज्यते मन इन्द्रियेण इन्द्रियमर्थेन ततः प्रत्यक्षम्" इति भाष्यकारः वचनप्रामाण्यात्। 'अव्यपदेश्यम्' अर्थात् 'अशाब्दं ज्ञानम्' 'शाब्दबोधभिन्नत्वं ज्ञानम्' 'निर्विकल्पकज्ञानम्' वा इति बोध्यम्। तदुक्तं न्यायभाष्ये– "अशाब्दम् इन्द्रियार्थसन्निकर्षोत्पन्नमर्थज्ञानं प्रत्यक्षम्" इति। 'अव्यभिचारि' अर्थात् 'भ्रमभिन्नं ज्ञानम्'। यथा इदं रजतमिति। तथा च 'व्यवसायात्मकम्' अर्थात् 'निश्चयात्मकं' 'सविकल्पकं ज्ञानं' भवति। यथा– घटे घटोऽयमिति। परन्तु 'स्थाणुर्वा पुरुषो वा' इत्यादि ज्ञानं न तु व्यवसायात्मकमपि तु संशयात्मकं ज्ञानं भवति। अत्र कोटिद्वयं वर्तते।

प्रमाणचतुष्टयमध्ये यद्यपि प्रत्यक्षप्रमाणम् अन्यतमं भवति तथापि प्रत्यक्षस्य लक्षणावसरे दार्शनिकानां मध्ये यथेष्टमतभेदः दृश्यते। यथा– "प्रत्यक्षज्ञानकरणं प्रत्यक्षम्"।[34]

"इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षम्"।[35] "साक्षात्कारिप्रमाकरणं प्रत्यक्षम्। प्रति विषयं प्रति गतम् अक्षम् इन्द्रियं यस्मै प्रयोजनाय तत् प्रत्यक्षम्। प्रतिगतं विषयं प्रतिगतम् अर्थात् विषयसन्निकृष्टम् अक्षं प्रत्यक्षम्। प्रति विषयं प्रति गतम् अक्षं स प्रत्यक्षः"।[36] "इन्द्रियजत्वम् अपरोक्षात्मकं

30. न्यायभाष्यम् 1.1.3, पृ. 18
31. पाणिनीयसूत्रम् 2.2.18
32. न्यायसूत्रवृत्तिः 1. 14
33. न्यायसूत्रम् 1.1.4
34. तर्कसंग्रहः पृ.108
35. तर्कसंग्रहः पृ. 109
36. तर्कभाषा पृ. 61

ज्ञानं प्रत्यक्षम्"।[37] प्रत्यक्षं प्रमाणमपि वर्तते, प्रत्यक्षं प्रमा (यथार्थज्ञानम्) अपि भवति। प्रत्यक्षेण प्रमाणेन या प्रमा (यथार्थज्ञानं) भवति तदपि प्रत्यक्षम् इति उच्यते।[38] न्यायमते प्रत्यक्षं द्विविधं नित्यम् अनित्यं च। तत्र नित्यं परमात्मापरमेश्वररूपम्। तथा च अनित्यं जीवरूपम्। अनित्यं प्रत्यक्षमपि द्विविधं लौकिकम् अलौकिकं चेति। तत्र लौकिकं प्रत्यक्षं अपरोक्षप्रमाव्याप्तं प्रत्यक्षं वा द्विविधं निर्विकल्पकं सविकल्पकञ्चेति।

### निर्विकल्पकं प्रत्यक्षम्-

"निष्प्रकारकं ज्ञानं निर्विकल्पकम्"।[39] "विशेषणताशून्यं ज्ञानम् अथवा विशेष्यताशून्यं ज्ञानम् अथवा संसर्गताशून्यं ज्ञानम् अथवा विलक्षण-विषयताशालिज्ञानं निर्विकल्पकम्"।[40] "विशेषणविशेष्यसम्बन्धानवगाहिज्ञानं निर्विकल्पकम्"।[41] यथा- इदं किञ्चित्। "विकल्पेभ्यो विशेषणेभ्यो निर्मुक्तं निर्विकल्पं, निर्विकल्पमेव निर्विकल्पकम् अथवा विकल्पकेभ्यो विशेषणेभ्यो निर्मुक्तं निर्विकल्पकम्"[42] इति व्युत्पत्तिः। तदुक्तं भाषापरिच्छेदे-

**"तत्प्रमा न प्रमा नापि भ्रमः स्यात् निर्विकल्पकम्।**
**प्रकारतादिशून्यं हि सम्बन्धानवगाहि तत्"।।** इति।

अनुमानप्रमाणेन निर्विकल्पकप्रत्यक्षस्य अस्तित्वं सिद्धिर्भवति। यथा- 'अयं गौः' इति विशिष्टज्ञानं विशेषणज्ञानजन्यं विशिष्टज्ञानत्वात् इति अनुमानस्य प्रमाणत्वात्।

### सविकल्पकं प्रत्यक्षम्-

"सप्रकारकं ज्ञानं सविकल्पकम्"।[43] "नामजात्यादियोजनासहितं

37. प्रमाणमञ्जरी पृ. 67
38. तर्कसंग्रहः पृ.153
39. तर्कसंग्रहः पृ. 109
40. तर्कभाषा पृ. 65
41. तर्कसंग्रहदीपिका पृ. 109
42. तर्कभाषा पृ. 62
43. तर्कसंग्रहः पृ. 109

ज्ञानं सविकल्पकम्"।[44] "अभिलापसंसर्गयोग्यप्रतिभासं सविकल्पकम्"।[45] "नामजात्यादिविशेषणविशेष्यसम्बन्धावगाहिज्ञानं सविकल्पकम्"।[46] "विशेष्यतानिरूपकज्ञानत्वं संसर्गतानिरूपकज्ञानत्वम् इति सविकल्पकस्य लक्षणम्"।[47] "संज्ञाजातिगुणक्रियाविशिष्टं ज्ञानं सविकल्पकम्"[48] इति फलितम्। यथा 'गोनामा', 'गोत्ववान्', 'गौः शुक्लः' इति ज्ञानं प्रत्यक्षात्मकं सविकल्पकम्। "विकल्प्यते विशिष्यते वस्तु येन स विकल्पः- विशेषणम्, तेन सहितं सविकल्पकं, सविकल्पमेव सविकल्पकम् अथवा विकल्पयति- विशिनष्टि वस्तु यत् तद् विकल्पकं- विशेषणम्, तेन सहितं सविकल्पकं- सविशेषणम्" इति व्युत्पत्तिना सविकल्पकं पदवाच्यत्वं सिद्धमेव।[49]

**अनुमानसमीक्षणम्-**

"अनुमितिकरणम् अनुमानम्"[50] इति अनुमानस्य सामान्यलक्षणं भवति। "अनुमीयते अनेनेति अनुमानम्"[51] इति करणव्युत्पत्त्या 'अनुमानम्' इति पदवाच्यं सिद्धिर्भवति। अत्र प्रश्नम् आयाति, अनुमितिकरणं किं भवति? तदुत्तरे- "फलायोगव्यवच्छिन्नं कारणं करणम्"[52] इति प्राचीनैः स्वीकृतम्। अर्थात् फलाव्यवहितप्राक्क्षणावच्छिन्नं कारणम् एव करणमिति। यथा- अनुमितिं प्रति परामर्शः करणम्। लिङ्गपरामर्शोऽनुमानमिति फलितम्। "प्रधानोपसर्जनताविवक्षायां लिङ्गपरामर्श इति न्याय्यम्"।[53]

---

44. तर्कभाषा पृ. 62
45. तर्कभाषा पृ. 62
46. तर्कसंग्रहदीपिका पृ. 109
47. न्यायबोधिनी पृ. 157
48. तर्कसंग्रहः पृ. 158
49. तर्कभाषा पृ. 62
50. तर्कसंग्रहः पृ. 173
51. न्यायभाष्यम् 1.1.3 पृ. 18
52. न्यायदर्शनविमर्शः पृ. 106
53. न्यायवार्तिकम् 1.1.5 पृ. 103

**तदेव तर्कसंग्रहकारेण उक्तम्-**

"स्वार्थानुमिति परार्थानुमित्योर्लिङ्गपरामर्श एव करणम्। तस्माल्लिङ्ग-परामर्शोऽनुमानम्"[54] इति। "येन ह्यनुमीयते तदनुमानम्। लिङ्गपरामर्शेण चानुमीयते, अतः लिङ्गपरामर्शोऽनुमानम्"[55] इति तर्कभाषायां केशवमिश्रेण प्रतिपादितम्।

ज्ञायते यत् तत् ज्ञायमानं अर्थात् वर्तमानकालीनं व्याप्तिज्ञानविषयकं लिङ्गमेवानुमानम् इति प्राचीनः स्वीकृतं मताभिप्रेतं न तु समीचीनम्। यदि ज्ञायमानलिङ्गस्य अनुमितिकरणत्वं स्वीक्रियते तर्हि भविष्यत्कालीनेन धूमेन इयं यज्ञशाला वह्निमती भविष्यति भाविधूमादित्यत्र भूतकालीनेन च धूमेन इयं यज्ञशाला वह्निमती आसीत् अतीतधूमादित्यत्र च अनुमितिर्न भवेत्, यतः वर्तमानकाले ज्ञायमानधूमस्याभावात् इति सर्वमतसिद्धः। तथा चोक्तं कारिकावल्याम्-

**"अनुमायां, ज्ञायमानं लिङ्गं तु करणं न हि।**
**अनागतादिलिङ्गेन न स्यादनुमितिस्तदा"।।**[56] इति।

अनुमाननिरूपणावसरे मणिकाराणां प्रतिज्ञावाक्यं समुद्भाषितं यत् "तत्र व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यं ज्ञानमनुमितिः, तत्करणमनुमानम्। तच्च लिङ्गपरामर्शो न तु परामृश्यमानं लिङ्गमि"ति।[57] वस्तुतस्तु "व्यापारवत् कारणं करणम्"[58] अर्थात् परामर्शरूपव्यापारद्वारा व्याप्तिज्ञानं व्याप्तिस्मरणं वा करणम् इति नवीनैः स्वीकृतमतं विज्ञजनः प्रशंसितम्। तज्जन्यत्वे सति अर्थात् व्याप्तिजन्यत्वे सति तज्जन्यजनकत्वम् अर्थात् व्याप्तिजन्यमनुमिति-जनकत्वं व्यापारत्वम् अर्थात् परामर्शव्यापारत्वम्। तद्वती व्याप्तिरेव करणम्। तथा चोक्तं कारिकावल्याम्-

---

54. तर्कसंग्रहः पृ. 131
55. तर्कभाषा पृ. 51
56. कारिकावली 66- 67
57. तत्त्वचिन्तामणिः, अनुमानप्रकरणम्
58. न्यायदर्शनविमर्शः पृ. 156

**"व्यापारस्तु परामर्शः करणं व्याप्तिधीर्भवेत्"।**[59]

अतः अनुमितौ परामर्शो व्यापारः, व्याप्तिज्ञानं तु करणम्, तदेव अनुमानम् इत्यर्थः विद्वद्भिः समादृतः।

## अनुमानभेदचिन्तनम्-

न्यायवैशेषिकतन्त्रे अनुमानं द्विविधं स्वार्थं परार्थम् चेति। स्वस्यैवार्थः प्रयोजनं (अनुमितिः) यस्मात्तत् स्वार्थम्। तथा च परस्य प्रतिवादिनो मध्यस्थस्य वा अर्थोऽनुमित्यात्मकं प्रयोजनं संशयनिवृत्तिर्वा यस्मात्तत् परार्थम्। परार्थानुमाने प्रतिज्ञादिपञ्चावयववाक्यं वर्तते। इदमेव पञ्चावयववाक्ये प्रत्यक्षादिभेदेन प्रमाणचतुष्टयं वर्तते इति भाष्यकारेण वात्स्यायनेन उक्तम्। यथा-

i) 'पर्वतो वह्निमान्' इति शब्दविधया प्रतिज्ञावाक्यम्।

ii) 'धूमवत्त्वात्' हेतुवाक्यम्। अत्र हेतुः शब्दस्यार्थः भवति अनुमानम्।

iii) 'यत्र यत्र धूमस्तत्र तत्र अग्निः' यथा- महानसम्। इति प्रत्यक्षविषयक उदाहरणम्।

iv) 'तथाचायम्' अर्थात् 'वह्निव्याप्यधूमवानयं पर्वतः' इति उपनयः।

v) 'तस्मात्तथेति' निगमनम्।

भाष्यकारः 'परमो न्याय' इति शब्देन प्रतिज्ञादिपञ्चावयववाक्यसमूहं स्वीकृतम्।

प्रकारान्तरेणानुमानं त्रिविधम्। पूर्ववत् शेषवत् सामान्यतोदृष्टम् च। तदुक्तं गौतमीयन्यायसूत्रे- "अथ तत्पूर्वकं त्रिविधमनुमानं पूर्ववच्छेषवत्सामान्यतोदृष्टं च"[60] इति। अत्र तत्पूर्वकम् अर्थात् प्रत्यक्षपूर्वकम् इति।

i) पूर्ववत्- 'पूर्वं कारणं तद्वत्' इति व्युत्पत्त्या कारणलिङ्गकं कारणेन कार्यमनुमीयते वा। यथा- मेघोन्नत्या वृष्टिर्भविष्यति।

---

59. कारिकावली 66

60. न्यायसूत्रम् 1.1.5

ii) शेषवत्– 'शेषः कार्यं तद्वत्' इति व्युत्पत्त्या कार्यलिङ्गकं कार्येण कारणमनुमीयते वा। यथा– धूमेन वह्न्यनुमानम्।

iii) सामान्यतोदृष्टम्– सामान्यतोदृष्टं च कार्यकारणभिन्नलिङ्गकम्। यथा– पृथिवीत्वेन द्रव्यत्वानुमानं सामान्यदृष्टान्तसहितं वर्तमानकालीनं अनुमानम् इति भवत्यर्थः।

**उपमाननिरीक्षणम्–**

"प्रसिद्धसाधर्म्यात् साध्यसाधनमुपमानम्"।[61] "उपमितिकरणम् उपमानम्"।[62] उपमीयतेऽनेनेति उपमानमिति करणार्थाभिधानम्। अर्थात् उपमितिकरणत्वबोधकं करणत्वबोधकल्युट्प्रत्ययघटितम् उपमानपदवाच्यं सिद्धम्।[63] पदपदार्थयोः सम्बन्धज्ञानम् "संज्ञासंज्ञिसम्बन्धज्ञानम्"[64] वा उपमितिः। सादृश्यज्ञानकरणं ज्ञानम् उपमितिः। उपमितेः करणम् उपमानं सादृश्यज्ञानं वा। 'गोसदृशो गवयः' इति पदवाच्यं सादृश्यज्ञानम् अर्थात् उपमानरूपेणैव अतिदेशवाक्यं पूर्वश्रुतवाक्यं वा इति बोद्धव्यः। तथाहि संस्कृतदिग्दर्शिकायाम्–

**"प्रसिद्धवस्तुसाधर्म्यादप्रसिद्धस्य साधनम्।**
**उपमानं समाख्यातं यथा गौ गवयस्तथा"।।**

उपमितौ सादृश्यज्ञानं करणम्, अतिदेशवाक्यार्थस्मरणम् अवान्तर-व्यापारः, उपमितिश्च फलं भवति। तथा चोक्तं कारिकावल्याम्–

**"ग्रामीणस्य प्रथमतः पश्यतो गवयादिकम्।**
**सादृश्यधीर्गवादीनां या स्यात् सा करणं मतम्।।**
**वाक्यार्थस्यातिदेशस्य स्मृतिर्व्यापार उच्यते।**
**गवयादिपदानां तु शक्तिधीरुपमा फलम्"।।**[65] इति।

---

61. न्यायसूत्रम् 1.1.6
62. तर्कसंग्रहः पृ. 157
63. न्यायभाष्यम्. 1.1.3 पृ. 18
64. तर्कसंग्रहः पृ. 157
65. कारिकावली 79– 80

सादृश्यविशिष्टपिण्डज्ञानं वैधर्म्यविशिष्टपिण्डज्ञानम् असाधारणविशिष्टपिण्डज्ञानञ्च भेदेनैव उपमानं त्रिविधम्।

**शब्दतत्त्वपरीक्षणम्-**

'शब्द्यतेऽनेनेति शब्द' इति करणार्थाभिधानं करणत्वबोधकल्युट्प्रत्ययघटितं शब्दरिति पदवाच्यत्वं सिद्धमेव भवति।[66] "श्रोत्रग्रहणो योऽर्थः स शब्दः"[67] इति। श्रवणेन्द्रियजन्यलौकिकप्रत्यक्षविषयवृत्तिगुणत्वव्याप्यजातिमत्त्वम्। तादृशी जातिश्च शब्दत्वरूपा। गुणत्वव्याप्यजातिघटितलक्षणकरणेन अश्रुतशब्दे नाव्याप्तिः। न वा सत्त्वगुणत्वादिकमादाय गुणान्तरेष्वतिव्याप्तिश्च।[68] शब्दस्तु बाह्यैकेन्द्रियग्राह्यः आकाशमात्रवृत्तित्वात्। "आप्तोपदेशः शब्दः, स द्विविधो दृष्टादृष्टार्थत्वात्"।[69] "आप्तवाक्यं शब्दः"[70] इति अन्नंभट्टपादाः। आप्तोच्चारितत्वे सति वाक्यत्वं शब्दस्य लक्षणम्। वाक्यत्वमात्रोकौ अनाप्तोच्चारितवाक्ये अतिव्याप्ति-वारणाय लक्षणे 'आप्तोच्चारितः' इति पदम्। तावन्मात्रोकौ जबगडदशादौ अतिव्याप्तिः स्यात्। न। अत्र वाक्यत्वमुपात्तम्।[71]

"आप्तस्तु यथार्थवक्ता"।[72] "भ्रमः प्रमादो विप्रलिप्सा करणपाटवम् इत्येतद्दोषचतुष्टयविहीनः पुरुषः आप्तः। भ्रमो विपर्ययज्ञानम्, प्रमादः असावधानता, विप्रलिप्सा वञ्चनाभिप्रायः, करणापाटवम् इन्द्रियदौर्बल्यम्। एतेभ्यो दोषेभ्य यो मुक्तः स आप्तः"।[73] ध्वन्यात्मकवर्णात्मकौ द्विविधावपि प्रत्येकं त्रिविधौ संयोगजौ विभागजौ शब्दजौ चेति। "संयोगाद् विभागाच्च

---

66. न्यायभाष्यम् 1.1.3 पृ. 18
67. वैशेषिकसूत्रम् 2.2.21
68. कणादसूत्रविवृति 2.2.21
69. न्यायसूत्रम् 1.1.7- 8
70. तर्कसंग्रहः, शब्दप्रकरणम् पृ. 159
71. न्यायदर्शनविमर्शः पृ. 176
72. तर्कसंग्रहः, शब्दप्रकरणम् पृ. 159
73. न्यायदर्शनविमर्शः पृ. 176

शब्दाच्च शब्दनिष्पत्तिः"[74] इति। तत्रादौ भेर्यामभिहन्यमानायां भेरीदण्डसंयोगाद् ध्वन्यात्मकः। वायुकण्ठताल्वादिसंयोगाद्वर्णात्मकश्च। द्वितीयौ वंशे पाट्यमाने दलद्वयविभागात् चट-चटात्मको ध्वन्यात्मकः ओष्ठद्वयविभागाद्वर्णात्मकश्च। तृतीयौ च द्वितीयशब्दादिचरमशब्दान्तौ। तत्र संयोगजे ध्वन्यात्मके भेर्याकाश-संयोगोऽसमवायिकारणम्। भेरीदण्डसंयोगे निमित्तकारणम्। समवायिकारणं तु सर्वत्रैवाकाशम् इति ज्ञेयम्। विभागजे ध्वन्यात्मके तु वंशदलद्वयाकाश-विभागोऽसमवायिकारणम्। वंशदलद्वयविभागो निमित्तकारणम् इति।[75] शब्दज-शब्दविषये तु 'वीचीतरङ्गन्यायेन' 'कदम्बमुकुलन्यायेन' वा ये द्वितीयादयः शब्दाः ते शब्दजाः। तत्रोत्तरोत्तरशब्दे पूर्वपूर्वशब्दोऽसमवायिकारणम्। तथा च अनुकूलवातादिकं निमित्तकारणमिति स्थितिः।[76]

"प्रयोगहेतुभूतार्थतत्त्वज्ञानजन्यः शब्दः"।[77] सोऽपि द्विविधः लौकिकः वैदिकश्च। तत्र लौकिकः शब्दः आप्तोक्त एव प्रमाणभूतः। वैदिकस्तु सर्व एव प्रमाणभूतः। परमाप्तेन भगवता प्रणीतत्वात्। प्रकारान्तरेणापि प्रमाणशब्दो द्विविधः दृष्टार्थः अदृष्टार्थश्चेति। तत्राद्यौ घटोऽस्ति इत्यादिरूपः। द्वितीयः स्वर्गनरकापूर्वादिशब्दः इति। अप्रमाणशब्दस्तु वह्निना सिञ्चति, अत्र शब्दो न प्रमाणम् योग्यताविरहात्।

यद्यपि न्यायवैशेषिकः समानतन्त्रं तथापि वैशेषिकमते शब्दो न तु पृथक् प्रमाणम् अपि तु अनुमानप्रमाणेऽन्तर्गतं भवति। परन्तु नैयायिकाः पृथगेव शब्दो मानम्। तदेव प्रमाणं गौतमप्रणीतं न्यायसूत्रम्। तदुक्तं-"आप्तोपदेशसामर्थ्याच्छब्दादर्थसंप्रत्ययः"[78] इति।

---

74. वैशेषिकसूत्रम् 2.2.31
75. वैशेषिकसूत्रोपस्कारः 2.2.31
76. तर्ककौमुदी (LXXVI) पृ. 26
77. तत्त्वचिन्तामणिः, शब्दखण्डम्
78. न्यायसूत्रम् 2.1.52

## सन्दर्भग्रन्थसूची


1. कणादसूत्रवृतिः – जयनारायणतर्कपञ्चाननभट्टाचार्यः, सम्पा. विन्ध्येश्वरीप्रसादः, कलकत्ता, 1861
2. कारिकावली – विश्वनाथपञ्चाननभट्टाचार्यः, भारतीय बुक कॉरपोरेशन, दिल्ली, 1861
3. तर्ककौमुदी – लौगाक्षिभास्करः, सं.वी.एल.एस. पनसीकरः, निर्णयसागर प्रेस, बम्बई, 1928
4. तर्कभाषा – केशवमिश्रः, सम्पा. बदरीनाथशुक्लः, मोतीलाल बनारसीदास, वाराणसी, 1968
5. तर्कसंग्रहः – अन्नंभट्टः, सम्पा. गोविन्दाचार्यः, चौखम्बा (दीपिका–न्यायबोधिनी–सुरभारती प्रकाशनम्, वाराणसी, 2015 पदकृत्य–श्रीनिवासमुखोल्लासिनी)
6. तत्त्वचिन्तामणिः – गंगेशोपाध्यायः, गादाधरीसंस्करणम्, कलकत्ता, 1892
7. न्यायकुसुमाञ्जलिः– उदयनाचार्यः, सं.महाप्रभुलालगोस्वामी, मिथिला विद्यापीठग्रन्थमाला सं. 28, 1972
8. न्यायकोशः – भीमाचार्यझलकीकरः, चौखम्बा सुरभारती प्रकाशनम्, वाराणसी, 1928
9. न्यायदर्शनविमर्शः – कालीप्रसादसिंहः, संस्कृतबुकडिपो, कलकत्ता, 1980
10. न्यायबोधिनी – कनकलालठक्कुरः, मा. खेलाड़ीलालप्रकाशनम्, 1928
11. न्यायभाष्यम् – आचार्यवात्स्यायनः, व्याख्या. सुदर्शनाचार्यः (प्रसन्न–पदाव्याख्याविभूषिता) सम्पा. द्वारिकादासशास्त्री, सुधी प्रकाशनम्, वाराणसी, 1986
12. न्यायमञ्जरी – जयन्तभट्टः, सम्पा. गङ्गाधरशास्त्रीतैलङ्गः, चौखम्बा संस्कृतसीरीज, वाराणसी, 1985

13. न्यायसूत्रम् – महर्षिगौतमः, सम्पा. तारानाथः, देहली, 1984

14. पद्मपुराणम् – महर्षिवेदव्यासः, अनु. मुन्नीलालगुप्ता, गीताप्रेसः, गोरखपुरम्, 1996

15. पाणिनीयसूत्रम् – सम्पा. डॉ. प्रबोधचन्द्रलाहिड़ी, पं. हृषीकेशशास्त्री, डॉ. प्रद्योतकुमारवन्द्योपाध्यायः, दि ढाका स्टुडेन्टस् लाइब्रेरी, 1959

16. वैशेषिकसूत्रम् – महर्षिकणादः, सम्पा. नारायणमिश्रः, चौखम्बा संस्कृतसीरीज, वाराणसी, 1966

17. वैशेषिकसूत्रोपस्कारः – शंकरमिश्रः, सम्पा. ढुण्ढिराजशास्त्री, काशी संस्कृतग्रन्थमाला, वाराणसी, 1969

18. श्लोकवार्त्तिकम् – कुमारिलभट्टः, सं. द्वारिकादासशास्त्री, तारा पब्लिकेशन्स, वाराणसी, 1978

19. सर्वदर्शनसंग्रहः – माध्वाचार्यः, सम्पा. उमाशंकरशर्मा 'ऋषि' चौखम्बा विद्याभवनम्, वाराणसी, 1964

20. सिद्धान्तचन्द्रोदयः – कृष्णधूर्जटि, चौखम्बा संस्कृतसीरीज, वाराणसी, 1986

21. सांख्यकारिका – ईश्वरकृष्णः, सम्पा. आद्याप्रसादमिश्रः, अक्षयवट–प्रकाशनम्, इलाहाबाद, 2027, वि. संवत्

❑❑❑

# स्फोटवादविमर्शः

– **सुषमा** *

इह लोके शब्देन व्यवहारः अत्यन्तं मुख्यतया भवति। शब्दव्यवहाराभावे मनुष्यः मनसि विद्यमानं स्वेष्टं स्वानिष्टनिवृत्तिं वा बोधयितुं न पारयति। अतः परबोधनाय शब्दप्रयोगस्य अवसरः अनिवार्यः एव सर्वत्र। एवं लोकयात्रां निर्वहति शब्दः। अत एव शब्दः सर्वार्थप्रकाशकत्वात् ज्योतिरित्यभिधीयते।

**यदाह आचार्यदण्डी–**

**इदमन्धं तमः कृत्स्नं जायेत भुवनत्रयम्।**
**यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते।।**[1] इति

अतएव शास्त्रदीपिकायां "शास्त्रं शब्दविज्ञानाद् संनिकृष्टेऽर्थे विज्ञानमिति"[2] विज्ञातात् शब्दात् पदार्थाभिधानद्वारेण यद् वाक्यार्थविज्ञानं तच्छाब्दं नाम प्रमाणम्।

**स्फोटः–**

उच्चारितं नाम तादृशध्वनिभिः अभिव्यक्तः स्फोटः। अनेन ज्ञायते सर्वशास्त्रज्ञानां सहमति वर्तते, शब्दप्रयोगे इति 'घटः' इत्यत्र घ् अ ट् अ विसर्गः इति श्रवणानन्तरं क्रमेण कश्चन एकः शब्दोऽर्थो वा अभिव्यज्यते।

तेन अर्थो बुध्यते इति हेतोः 'स्फुट् विकसने' इति धातोः करणव्युत्पत्त्या स्फुटति येन स स्फोटः[3]। इति तस्य संज्ञा सिद्ध्यति, हेतौ अर्थे स्फुटति

---

* शोधच्छात्रा, मीमांसाविभागः, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः, नवदेहली।

1. का.आ. 1.4
2. शा.भा. 1.1.5, भा. 1 पृ. 44
3. पाणिनीय धातुपाठ पृ. 18

यस्मात् इति व्युत्पत्त्यापि स्फोटः इति तस्य संज्ञा। नादाख्यैः ध्वनिभिः अभिव्यक्तात् शब्दात् यः अर्थबोधः जायते स एव स्फोटः इति सिद्धम्।

अत्र 'अकर्तरि च कारके संज्ञायाम्'[4] इति सूत्रप्रमाणम्।

**स्फोटवादः**

इयं शब्दात् उच्चरितात् अर्थावगतिः। न च इयं अर्थावगतिः अकरणिका भवितुमर्हति। तदस्याः करणं स्फोट इति कार्यानुमानमिदमस्तु, अर्थावगतिरूपात् कार्यात् तत्करणस्य स्फोटस्यानुमानम्। स च स्फोटः निरवयवः नित्यः निष्क्रमकश्चेति न वर्णपक्षोक्तदूषणानामवकाशः। किं च वर्णातिरिक्तः स्फोट एवार्थप्रतिपादकः ''शब्दादर्थं प्रतिपद्यामहे' इति व्यवहारात्। वर्णानां वाचकत्वे शब्दात् इत्येकवचनानुपपत्तिः। स्फोटात्मकस्य शब्दस्य तु वाचकत्वे 'शब्दात्' इति प्रातिपदिकार्थः विभक्त्यर्थश्च द्वयमप्युपपन्नम्।[5]

**महाभाष्ये (व्याकरणे स्फोटवादः)**

अयं च स्फोटो महाभाष्यकारेण भगवता पतञ्जलिना वर्णितः– 'एवं तर्हि स्फोटः शब्दः'।[6] ध्वनिः शब्दगुणः। कथम्? भेर्याघातवत्। तद्यथा– भेर्याघातो भेरीमाहात्ये कश्चित् विंशतिपदानि गच्छति। कश्चित् त्रिंशत्। कश्चित् चत्वारिंशत्। स्फोटश्च तावानेव भवति। ध्वनिकृता वृद्धिः।

**ध्वनिः स्फोटश्च शब्दानां ध्वनिस्तु खलु लक्ष्यते।**
**अल्पो महांश्च केषांचित् उभयं तत्स्वभावतः॥**

अत्र स्फोटपदेन व्यक्तिस्फोटो विवक्षित इति कैयटः। तथान्यत्र च प्रत्याहाराह्निके चतुर्थसूत्रे–

'अथ वा उभयतः स्फोटमात्रं निर्दिश्यते, रश्रुतेर्लश्रुतिर्भवतीति'[7] अत्र जातिस्फोटो विवक्षित इति कैयटः।

---

4. अष्टाध्यायी (3.3.19) पृ. 32
5. न्याय. मं. आ. 6 भा. 2, पृ.- 148
6. म.भा. 1.1.70
7. म.भा. 1.1.2.3, भाग. 1. पृ. 120

**श्लोकवार्त्तिकानुसारेण स्फोटवादः-**

श्लोकवार्त्तिके भट्टपादाः भाष्योक्तमेव विवृण्वन्ति स्म। तत्र भाष्यानुक्तः विशेषः प्रदर्श्यते। 'औत्पत्तिकस्तु शब्दस्यार्थेन संबंध'[8] इति संबंधनित्यत्वसाधनावसरे शब्दस्वरूपनिरूपणं किमित्यसंगतं भाष्यकारेण कृतमिति शङ्कायाः उत्तरम्-

**आधारात्मनि विज्ञाते सुखमाधेयबोधनम्।**
**तस्यैव तावत् प्रस्तावादथ गौरित्यतोऽब्रवीत।।**[9]

संबंन्धिद्वयाधारो हि संबंधः नानिरूपितयोः तयोर्निरूपयितुं शक्यते। न हि वर्णातिरिक्तस्य शब्दस्य शशविषाणायमानस्य संबंध एव संभवति, न तरां नित्यत्वम्। अतः प्रयोजनवत् वर्णानां शब्दत्वम्।

**प्रकरणपञ्चिकायां स्फोटवादः-**

'शास्त्रं शब्दविज्ञानात् यद् संनिकृष्टार्थविज्ञानम्'[10] इति भाष्यम्। शब्दविज्ञानापेक्षात् आत्ममनः संनिकर्षात् यत् अदृष्टार्थविषयं विज्ञानं तत् शास्त्रम्।

**न्यायरत्नमालायां स्फोटवादः-**

वैयाकरणाः अविभागमेव वाक्यं व्यञ्जकध्वनिभेदात् तेन वर्णपद-विपर्यासात्मना अवगम्यमानं तस्य वाक्यार्थस्य प्रतिपादकमिति मन्यन्ते।[11] क्रमिकैराशुतरविनाशिभिः वर्णैः प्रत्येकं यौगपद्येन च वाक्यार्थप्रतीतेरसंभवात् तत् वर्णाभिव्यङ्ग्यम्। खण्डं स्फोटाख्यं शब्दतत्त्वं तन्मूलभूतमेषितव्यम्। अविभागम्-अखण्डम्। व्यञ्जकध्वनिभेदात्, व्यञ्जकवर्णभेदात्। वर्णपद-विपर्यासात्मना अवगम्यमानं-वर्णविपर्यासे सति पदं पदान्तरात्मना, पद-विपर्यासे सति वाक्यं वाक्यान्तरात्मना अभिव्यज्यमानम्। विपर्यासो नाम तत्स्थाने वर्णान्तरपदान्तरसंनिवेशः।

---

8. जै.सू. 1.1.5
9. श्लोक वा. स्फोट. का.- 1
10. शा.भा. 1.1.5
11. न्याय.र.मा.पृ.- 12-18

यथैव हि वर्णात्मकभागावगमे सत्यपि एकपदावभासात् अर्थप्रतीतेश्च वर्णेभ्योऽनुपपत्तेः भागावगमस्य मिथ्यात्वानिरवयवमेव पदं पदार्थस्य वाचकमाश्रितम्। तत्रापि हि "एकमिदं वाक्यम्" इति। परामर्शोऽस्तीति स एव सभागत्वं प्रतिक्षिपति। वाक्यार्थप्रतिपत्तिः च अनन्योपाया वाक्यमेव निर्भागं कल्पयतीति।

**शांकरब्रह्मसूत्रभाष्ये स्फोटवादः-**

किमात्मकं पुनः शब्दमभिप्रेत्येदं शब्दप्रभवत्वमुच्यते भूरादिलोकानां देवादिव्यक्तीनां च[12] स्फोटमित्याह। वर्णपक्षे हि तेषामुत्पन्नप्रध्वंसित्वात् नित्येभ्यः शब्देभ्यो देवादीनां प्रभव इति अनुपपन्नं स्यात्। उत्पन्नप्रध्वंसिनश्च वर्णाः प्रत्युच्चारणमन्यथा चान्यथा च प्रतीयमानत्वात्। तथा हि- 'अदृश्यमानोऽपि पुरुषविशेषः अध्ययनध्वनिश्रवणादेव विशेषतो निर्धार्यते, देवदत्तोऽयमधीते' यज्ञदत्तोऽयमधीते' इति। न चायं वर्णविषयोऽन्यथात्वप्रत्ययः मिथ्याज्ञानं (भ्रमः) इति वाच्यम्। उत्तरकाले बाधकप्रत्ययाभावात्। नापि वर्णेभ्योऽर्थाव-गतिर्युक्ता। तेषां प्रत्येकमर्था अवगतिहेतुत्वे एकवर्णोच्चारणम् अनन्तरमर्थ-प्रतीतिप्रसङ्गः वर्णान्तरोच्चारणम् अनर्थक्यप्रसङ्गः। वर्णानामनेकत्वात् एकप्रत्यय-विषयत्वानुपपत्तेः तस्य च स्फोटस्य प्रत्युच्चारणं 'स एवायं गकारः' इति प्रत्यभिज्ञायमानत्वात् नित्यत्वम्। भेदप्रत्ययस्तु वर्णविषयकः।

तस्मात् नित्यात् शब्दात् स्फोटरूपात् अभिधायकात् क्रियाकारक-फललक्षणं जगत् अभिधेयभूतं प्रभवति इति। कार्येण अनुमितैः संस्कारैः संहितोऽन्त्यो वर्णः अर्थप्रत्याययिष्यतीति संस्कारकार्यस्य स्मरणस्यापि क्रमिकत्वात्। तस्मात् स्फोट एव शब्दः।

**शास्त्रदीपिकायां स्फोटवादः-** अवयवाऽवयविगत्वादिकं नास्ति इति न तु वर्णा एव शब्दा इति। अर्थप्रत्ययाऽनुपपत्तेः तथाहि -

**न ह्येकाक्षरविज्ञानादर्थधीरूपजायते।**
**वाचश्च क्रमवर्त्तित्वात् साहित्यं नाऽवकल्पते॥**[13]

---

12. ब्र.सू.शां.भा.- 1.3.28, पृ.- 322
13. शा.दी.(गजानन.पृ. 431)

अर्थप्रत्यायकः शब्दः इति उक्ते अर्थप्रत्यायकत्वम् एकस्मिन् वर्णे वर्तते उत समुदाये? यदि प्रत्येकं वर्णे अस्ति गकारोच्चारणमात्रेण अर्थबोधाय पर्याप्तं भवेत् तर्हि भवतु समुदाये। समुदाय एव कथं भवति? तत्रापि द्वेधा गतिः। उत्पद्यन्ते विनश्यन्ति वर्णा इति मते उत्तरोत्तरवर्णकाले पूर्वपूर्ववर्णो नास्तीति कृत्वा अविद्यमानानां वर्णानां कथं समुदायो भवितुमर्हति? नित्या विभवश्च वर्णाः इति उच्चमानेऽपि समुदायो नास्ति। वाचः उच्चारणस्य क्रमवर्त्तित्वात् क्रमवर्तिनां समुदायः अपेक्ष्यते। अन्यथा सरः रसः इत्यत्र त एव वर्णास्सन्ति इति कृत्वा एकार्थबोधः स्यात्। तस्मात् क्रमवर्तित्वम् आवश्यकम्। तत्तु नित्यानां विभूनां च न सम्भवति कालतो वा देशतो वा क्रमो न सम्भवति। अतः वर्णेभ्यः अर्थप्रत्यायकत्वं न सम्भवति इति अर्थप्रत्यायकः शब्दः अन्यः कश्चन वक्तव्यः स एव स्फोट इति उच्यते।

अत्र सिद्धान्ती वदति-

**यथाऽऽग्नेयादिकर्माणि क्रमवर्तीनि सत्यपि।**
**संहत्यकुर्वते कार्यमेकं वर्णास्तथैव नः।।**[14]

वर्णेभ्यः एव अर्थप्रतीतिः संभवतीति स्फोटकल्पनाऽनावश्यकी। आग्नेयादियागानां क्षणिकानामपि स्वजन्यापूर्वद्वारा यथा साहित्यं तथा संस्कारद्वारा वर्णानामपि क्रमवर्तित्वं साहित्यं शक्यं वक्तुम्।

**स्फोटवादी वदति-**

एकं शब्दतत्त्वं कल्प्यतां, कल्पना यथासम्भवं न्यूना हि कर्त्तव्या। यावन्तः वर्णाः तावन्तः संस्काराः भवता कल्पनीयाः। तावद्भिः वर्णैः एकः स्फोटः अभिव्यक्तो भवति इति उच्यताम्। अनेके वर्णाः सन्ति तैः एकः शब्दः वाचकः स्फोटात्मकः अभिव्यज्यते।

**सिद्धान्ती वदति-** भवदीय स्फोटः अस्माकं संस्कारवत् अतीन्द्रियः। अर्थप्रत्यायकः प्रमाणशब्दश्चेत् तदा ज्ञातव्यो वर्तते। परन्तु सम्यक् अवधानेन दृश्यतां तत्र वर्णा एव श्रूयन्ते, तदतिरिक्ततया कोऽपि स्फोटो न श्रूयते। प्रथमं शब्दः श्रोतव्यः तदैवार्थं प्रत्याययेत्। अर्थज्ञानं न स्वरूपतो भवति।

---

14. शा.दी.(गजानन.पृ. 431)

स्वरूपश्चेत् सर्वेषां अर्थप्रत्यायः स्यात्। तस्मात् तत्र दृश्यादर्शनं, योग्यानुपलब्धिः वर्तते। संस्कारास्तु न ज्ञातव्याः, सत्तामात्रेण स्वरूपसन्तः कार्यं कुर्वन्ति। ततोऽपि अधिको दोष उच्यते। मया संस्काराः कल्पिताः खलु त्वयापि संस्काराः कल्पनीयाः। संस्कारानपि कल्पयित्वा पुनः स्फोटोऽपि उच्यते इति गौरवम्।

**शंकाः** - यदि वर्णाः प्रत्येकं अभिव्यञ्जन्ति, एकवर्णोच्चारणमात्रेण स्फोटाभिव्यक्तिः स्यात् तत् द्वितीयाद्युच्चारणवैयर्थ्यमिति समुदायेनैव अभिव्यक्तिः इति वक्तव्यं, अतः क्रमेण संस्काराः वक्तव्याः, समुदायः असम्भवात्। प्रत्येकमेव वर्णाः स्फोटं अभिव्यञ्जन्ति। द्वितीयादिवैयर्थ्यं तु नास्ति प्रथमवर्णेन अस्फुटतया स्फोटोऽभिव्यक्तः, द्वितीयवर्णेन पुनः स्फुटतरं अभिव्यक्तः इत्यनया रीत्या सर्वेषामपि वर्णानां सामर्थ्यम् अस्तीति चेत्?

**मीमांसको वदति**- यदि पश्चात् उच्चार्यमाणाः वर्णाः स्फुटं अभिव्यञ्जयन्ति तर्हि अन्तिमवर्ण एव उच्चार्यतां, येन उच्चारितेन स्फोटः स्फुटतरं अभिव्यक्तो भवेत्। पूर्ववर्णा नैवोच्चार्यन्ताम्। स्फुटतराभिव्यक्ति-सामर्थ्यम् अन्तिमवर्णस्य चेत् तर्हि किमर्थं क्रमः स्वीक्रियते?

**अस्मिन् विषये दृष्टान्त उच्यते**- दूरात् दृश्यमानं किञ्चित् वर्तते-हस्ती वा, पलालकूटो वा इति न ज्ञायते। ततः परं किञ्चित् समीपे आगते वृक्षः इति ज्ञायते। किञ्चित् कालानन्तरं ततोऽपि समीपे आगते अनेनैव चक्षुषा सहकारवृक्ष इति भासते। चक्षुषः सामर्थ्यं तदेव परन्तु दूरत्वसामीप्यवशात् एक एव पदार्थः पूर्वं संशयति, अस्फुटतया ज्ञातः, तदनन्तरं वृक्षात्मना ज्ञातः। तद्वदेव सर्वे वर्णा उच्चार्यन्ते चेत् स्पष्टतमं सम्यक् स्फोटः अभिव्यक्तो भवति। तथा शाब्दबोधः स्पष्टो भवति।

तदानीं मीमांसकः दूषयति। एकेन वर्णेन उच्चारितेन स्फोटस्य स्फुटतमाभिव्यक्तिर्न भवति इति बहुभिः उच्चरितैः कुतः स्फुटाभिव्यक्तिः? एकस्मिन् एव वर्णे पुनः पुनः स स स स इति उच्चरिते स्फोटस्य स्फुटाभिव्यक्तिर्न खलु भवति। अन्यस्मिन् अपि उदाहरणे तत्र सरः रसः इति क्रमभेदात् भेदो भवति। क्रमविशेषः अपेक्षणीयः। मीमांसकैः श्रूयमाणशब्दाः ध्वनय इत्युच्यन्ते, वैयाकरणैः नाद इति। नादाः युगपत्

भवितुं नार्हन्तीति कृत्वा पूर्वपूर्ववर्णानां संस्कारवशादेव तेषां समुदायो वक्तव्यः।

पूर्वपूर्वनादाहितसंस्कारसहितः अन्तिमनादेन अभिव्यज्यते स्फोटः इति वक्तव्यम्। अस्माभिः स्फोटः तिरस्क्रियते, वर्णा एव अङ्गीक्रियन्ते।[15]

**सिद्धान्ती वदति-**

वर्णश्रवणं वर्णसंस्कारं जनयति। संस्कारो नाम स्मृतिहेतुः अनुभूतार्थं स्मरणकारणम्। स्फोटपक्षे शब्दाभिव्यञ्जकं संस्कार इति विलक्षणसंस्कारः कल्पनीयः। मानसप्रत्यक्षविषयः स्फोटः इत्युच्यते वैयाकरणैः। स्मृतिहेतवः संस्काराः न स्फोटं जनयितुं प्रभवन्ति। अतः अयं संस्कारः विलक्षण एव।

संयोगविभागोऽपि नाद इत्युच्यते। नादाः ज्ञायमानतया न व्यञ्जयन्ति किन्तु सत्तया हि ते श्रोत्रसंस्कारं कुर्वन्तः वर्णान् अभिव्यञ्जयन्ति। तर्हि नादानां कथं समुदाय? संस्कारद्वारा अयं च संस्कारः यागजन्यापूर्वस्थानीयः वर्तते, न स्मृतिहेतुसंस्कारः। तत्र संयोगविभागात्मकत्वं यदा नादशब्दवाच्यं, क्रमेणैव क्रियते। गौः इति गकारस्य प्रयत्नोऽन्यः, औकारस्य प्रयत्नोऽन्यः। क्रमेणैव उच्चारणं कृतं गोशब्दस्य च अभिव्यक्तिर्जायते। अयमेकः पक्षः।

द्वितीयस्मिन् पक्षे ध्वनिः श्रोत्रग्राह्यः शब्द इति मन्यते। तत्र ध्वनेः श्रोत्रेन्द्रियस्य च संयोगो भवति। स तु स्थिरो नास्ति, स एव संस्कार इत्युच्यते। तादृशः संयोगस्तु न स्थिरो यतः ध्वनि आगत्य श्रोत्रदेशं किञ्चित् स्पृष्ट्वा अग्रे गच्छति। एवं गच्छन् ध्वनिः श्रोत्रेन्द्रियेण यदा संपर्कं प्राप्नोति तदा श्रोत्रेन्द्रियेण ज्ञायते। एवञ्च गत्वरत्वाद् ध्वनीनां तादृशसंबंधः न स्थिरो भवितुम् अर्हति। भङ्गुरत्वं क्षणिकत्वम्। गत्वरत्वात् गमनशीलत्वात्। वर्णेषु कालतो देशतो वा क्रमवर्तित्वं न संभवति। सर्वैः संस्कारैः यदा वर्णाः युगपत् स्मृताः, सर्ववर्णविषयकस्मृतिः जाता, तत्र सा एकैव प्रतीतिः जायते।

---

15. शा.पृ. 221 (पण्डित श्रीमणि.)

अतएव युगपत् स्मर्यमाणानां वर्णानां शब्दत्वे व्युत्क्रमेणोच्चारितानामपि बोधकत्वं स्यात् इति न शङ्कनीयम्। क्रमविशिष्टानामेव बोधकत्वाङ्गीकारात् कथं त्वन्मते क्रमः इति चेत्?

**सिद्धान्ती समाधानं वदति-**

ध्वनीनां संयोगविभागक्रम एव शब्दे आरोप्यते। स्मृतिकालेऽपि तादृशक्रमविशिष्टतया वर्णाः स्मर्यन्ते, तेन अर्थविशेषप्रतीतिर्जायते। तत्र क्रमो नास्ति परन्तु जायते, प्रमाणत्वेन च स्वीकृतोऽस्ति। ते एव वर्णाः वाचकाः। न तु अन्यः शब्दः अस्तीति सिद्धम्। वर्णा एव तु शब्दः इति भगवान् उपवर्षः।

**अभिहितं वार्त्तिककारः-**

**यद्वा प्रत्यक्षतः पूर्वं क्रमज्ञानेषु यत् परम्।**
**समस्तवर्णविज्ञानं तदर्थज्ञानकारणम्।।**[16]

**स्फोटविमर्शस्य प्रयोजनम्-**

प्र.- वर्णातिरिक्तः प्रतिषिध्यमानः पदेषु मन्दं फलमादधाति।

समाधानम्- 'कार्याणि वाक्यावयवाश्रयाणि सत्यानि कर्तुं कृत एष यत्नः' स्फोटपक्षे हि निरवयवं वाक्यं निरवयवस्य वाक्यार्थस्य वाचकम्। अवयवास्तु पदात्मका वर्णात्मकाश्च मृषाभूताः। ततश्च पदतदवयवाश्रितस्य ऊहादेः महावाक्यः अवयवावान्तरवाक्यार्थप्रयाजाद्याश्रितस्य प्रसङ्गतन्त्रादेः कार्यस्य मृषात्वं स्यात्। अतः तत् सत्यतासिद्ध्यर्थं स्फोटनिराकरणं न निष्फलमिति।

❐❐❐

16. श्लोक.वा.स्फोट. का.- 109

# वैशेषिकदर्शने गुणवादविमर्शः

**-गीताराणी महाण्णा** *

जन्मदातृत्वेन कणादेन पित्रा लालितं पालितं पुत्रवच्च परिवर्धितं वैशेषिकदर्शनमिदं सर्वेभ्यो दर्शनभ्योऽतीव श्रेष्ठं सर्वथा प्रशस्तं प्राचीनतमञ्चेति गीयते। अत एव- **'काणादं पाणिनीयञ्च सर्वशास्त्रोपकारकम्'**। अत्र घटकीभूतं 'काणादं' पदं सुस्पष्टतयैव वैशेषिकदर्शनमेव बोधयति। इदमेव काणाददर्शनं औलुक्यदर्शनम् अपि इत्युच्यते। औलुक्यदर्शने विशेषपदार्थग्रहणात् वैशेषिकदर्शनम् इत्युच्यते।

वैशेषिकदर्शनस्य भाष्यकारः प्रशस्तपादाचार्यः "प्रशस्तपादभाष्यम्" लिखितम्। तस्य मते षड् पदार्थाः सन्ति। ते च भावपदार्थाः। द्रव्यगुण-कर्मसामान्यविशेषसमवायाश्च षड्भावपदार्थाः। परवर्ती आचार्याः अभावनामकं पदार्थं स्वीकुर्वन्ति। अतः वैशेषिकानां मते सप्तपदार्थाः सन्ति। अतः उच्यते **'सप्तपदार्थवादी वैशेषिकाः'** यतः सर्वतः प्रागवैशेषिकाः पदार्थोल्लेखनमेव प्रकुर्वन्ति। उक्तञ्च सूत्रकारेण- **"धर्मविशेषप्रसूताद् द्रव्यगुणकर्मसामान्य विशेषसमवायानां पदार्थानां साधर्म्यवैधर्म्याभ्यां तत्वज्ञाननान्निःश्रेयसम्"**[1] अतः ज्ञायते यत् वैशेषिकसूत्रकर्तृणां महर्षिणां मुख्यं लक्ष्यं निःश्रेयसमेव।

### गुणस्य लक्षणम् -

अन्नंभट्टमतानुसारेण- "द्रव्यकर्मभिन्नत्वे सति सामान्यवत्त्वं गुणसामान्य-लक्षणम्"[2] **अत्र सामान्यं जातिः इति उच्यते। द्रव्यं गुणः कर्म जातौ विद्यते। अर्थात् द्रव्यकर्मभिन्नजातिः यत्र विद्यते तद् गुणः इति**

---

* शोधच्छात्रा, न्यायदर्शनविभागः, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्व-विद्यालयः, नवदेहली-110016

1. वैशेषिकसूत्रम् 1/1/4
2. तर्कसंग्रहः

**उच्यते।**

**किरणावल्याम्-**

द्रव्यकर्मभिन्ने समवायेन वर्तमाना या जातिस्तद्वत्त्वं गुणवत्त्वमिति।[3]

**महर्षिकणादानुसारेण-**

**"द्रव्याश्रयगुणवान् संयोगविभागेष्वकारणमनपेक्ष इति गुण-लक्षणम्"**[4] अर्थात् द्रव्याश्रितत्वं, निर्गुणत्वं, निष्क्रियत्वञ्च गुणस्य लक्षणम्।

**प्रशस्तपादाचार्यानुसारेण-**

**"रूपादीनां गुणानां सर्वेषां गुणत्वाभिसम्बन्धो द्रव्याश्रितत्वं निर्गुणत्वं निष्क्रियत्वम्"**[5] इति गुणस्य लक्षणम्।

**श्रीविश्वनाथपञ्चाननमतेन -**

**"अथ द्रव्याश्रिताः ज्ञेयाः निर्गुणाः निष्क्रियाः गुणाः"** इति भाषापरिच्छेदे गुणस्य लक्षणम्।

**गुणाश्च रूपरसगन्धस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभाग-परत्वापरत्वबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नाश्चेति कण्ठोक्ताः सप्तदश।**[7]

अत्र कण्ठोक्ताः अर्थात् वैशेषिकसूत्रकारमहर्षिकणादेन सप्तदश गुणाः इत्युक्तम्। ते च रूप-रस-गन्ध-स्पर्श-संख्या-परिमिति (परिमाण), पृथक्त्व-संयोग-विभाग-परत्वा-अपरत्व-बुद्धि-सुख-दुःख-इच्छा-द्वेषप्रयत्नाश्च गुणाः। अत्र च शब्देन सम्मुच्चिताः गुरुत्व-द्रवत्व-स्नेह-संस्कार-धर्म-अधर्म तथा शब्दः इति सप्तगुणाः भाष्यकारेण प्रशस्तपादाचार्येण तस्य भाष्ये उल्लिखितम्। अतः कण्ठोक्ताः सप्तदश गुणाः एवं च शब्देन सम्मुच्चिताः सप्तगुणाः मिलित्वा चतुर्विंशति इति गुणाः सन्ति।

---

3. किरणावली
4. वैशेषिकसूत्रम् 1/1/16
5. प्रशस्तपादभाष्यम्
6. भाषापरिच्छेदः
7. वैशेषिकसूत्रम् 1/1/6

आचार्य प्रशस्तपादाचार्येणोक्तम्-

**च शब्दसमुचिताश्च गुरुत्वद्रवत्वस्नेहसंस्कारदृष्टशब्दाः सप्तैवेत्येवं चतुर्विंशतिगुणाः।**[8]

चक्षुर्मात्रग्राह्यो गुणो रूपम्। अर्थात् चक्षुमात्रग्राह्यत्वे सति गुणत्वं रूपत्वम्। रूपत्वेऽतिव्याप्तिवारणाय गुणपदम्। यो गुणः यदिन्द्रियेण गृह्यते तन्निष्ठा जातिरपि तदिन्द्रियेण गृह्यते। रसादौऽतिव्याप्तिवारणाय चक्षुग्राह्य इति। चक्षुमात्रग्राह्यत्वं नाम- चक्षुर्भिन्नेन्द्रियाऽग्राह्यत्वे सति चक्षुग्राह्यत्वम्। मात्रपदानुपादेन संख्यादिसामान्यगुणेऽतिव्याप्तिः। अत्र अतिव्याप्तिवारणाय चक्षुर्ग्राह्यत्वविशिष्टगुणत्वस्य सत्वात् अत्र अग्राह्यत्वं नाम-तद्विषयम्। तच्च शुक्ल-नील-पीत-रक्त-हरित-कपिश-चित्रभेदात् सप्तविधम्। रूपस्य पृथिवी-जलतेजो वृत्तिः। तत्र पृथिव्यां सप्तविधम्। अभास्वरशुक्लं जले। भास्वरशुक्लं तेजसि। रसनो ग्राह्यो गुणो रसः। रसत्वादिवारणाय गुण इति। रूपादतिव्याप्ति-वारणाय रसनेति। स च मधुराऽम्ल-लवण-कटु-कषाय- तिक्तभेदात् षड्विधः। स पृथिवीजलवृत्तिः। तत्र पृथिव्यां षड्विधः। जले मधुर एव।

घ्राणग्राह्यो गुणो गन्धः। गन्धत्वादावतिव्याप्तिवारणाय गुण इति। रूपत्वादिव्याप्तिवारणाय घ्राणग्राह्य इति। स द्विविधः सुरभिः असुरभिश्च। गन्धः पृथिवीमात्रवृत्तिः।

त्वगिन्द्रियमात्रग्राह्यो गुणः स्पर्शः। स्पर्शत्वादावतिव्याप्तिवारणाय गुण इति। रूपत्वात् अतिव्याप्तिवारणाय त्वगिन्द्रियेति संख्याऽऽदिवारणाय मात्रपदम्। स्पर्शः त्रिविधः- शीतोष्णानुष्णाऽशीतभेदात्। पृथिव्यप्तेजोवायुवृत्तिः। तत्र शीतो जले, उष्णः तेजसि, अनुष्णाशीतः पृथ्वीवाय्वोः।

एकत्वादिव्यवहारहेतुः संख्या सा नवद्रव्यवृत्तिः, एकत्वादिपरार्थपर्यन्ता। एकत्वं नित्यमनित्यं च नित्यगतं नित्यम्। अनित्यगतमनित्यम्। द्वित्वादिकं तु सर्वत्राऽनित्यमेव। आचार्यविश्वनाथपञ्चाननमतेन संख्यागणना-

**एकं दश शतश्चैव सहस्त्रमयुतं तथा।**
**लक्षं च नियुतञ्चैव कोटिरर्बुदमेव च॥**

---

8. प्रशस्तपादभाष्यम्

**वृन्दं खर्वो निखर्वश्च शङ्खः पद्मश्च सागरः।**
**अयं मध्यं परार्द्धञ्च दशवृद्धया यथाक्रमम्।।**[9]

अत्र अयुतं दशसहस्रम्, नियुतं दशलक्षकम्, अर्बुदं दशकोटिः वृन्दं शतकोटिः। ततो दशगुणं खर्व इति। इति महदुक्तेः परार्धपर्यन्तैव संख्या इति भावः।

मानव्यवहारासाधारणं कारणं परिमाणम्। अत्र मानं नाम परिमिति। मानव्यवहार अर्थात् परिमितिस्तस्य यो व्यवहारः स परिमाणम्। स नवद्रव्यवृतिः। तच्चतुर्विधम् अणु, महत्, दीर्घ, ह्रस्वञ्चेति।

पृथग्व्यवहाराऽसाधारणकारणं पृथक्त्वम्, सर्वद्रव्यवृत्तिः। दण्डादि-वारणाय पृथगित्यादि। कालादिवारणाय असाधारणेति। पृथग्व्यवहारवारणाय कारणमिति।

संयुक्तव्यवहारहेतुः संयोगः। सर्वद्रव्यवृत्तिः। इमौ संयुक्त इति यो व्यवहारः, तस्य हेतुः संयोग इत्यर्थः।

संयोगनाशको गुणो विभागः। कालेऽतिप्रसक्तिवारणाय गुणपदम्। ईश्वरेच्छादिवारणाय 'असाधारणे' त्यपि बोध्यम्। सः सर्वद्रव्यवृत्तिः।

परव्यवहाराऽसाधारणकारणं परत्वम्। अपरव्यवहाराऽसाधारणकारणम् अपरत्वमित्यर्थः। ते द्विविधे- दिक्कृते कालकृते च। दूरस्थे दिक्कृतं परत्वम्। समीपस्थे दिक्कृतम् अपरत्वम्। ज्येष्ठे कालकृतं परत्वम्। कनिष्ठे कालकृतमपरत्वम्।

आद्यपतनासमवायिकारणं गुरुत्वम्। दण्डादिवारणाय असमवायीति। रूपादिवारणाय पतनेति। वेगेऽतिव्यातिवारणाय आद्येति, पृथिवीजलवृत्तिः।

आद्यस्यन्दनाऽसमवायिकारणं द्रवत्वम्। पृथिव्यप्तेजोवृत्तिः। तद् द्विविधं- सांसिद्धिकं नैमित्तिकं च। सांसिद्धिकं जले, नैमित्तिकं पृथिवीतेजसोः। पृथिव्यां घृतादावग्निसंयोगजं द्रवत्वं, तेजसि सुवर्णादौ।

चूर्णादिपिण्डीभावहेतुर्गुणः स्नेहः। जलमात्रवृत्तिः।

---

9. कारिकावली

श्रोत्रग्राह्यो गुणः शब्दः। आकाशमात्रवृत्तिः। स द्विविधो- ध्वन्यात्मको वर्णात्मकश्च। तत्र ध्वन्यात्मको भेर्यादौ। वर्णात्मकः संस्कृतभाषादिरूपः।

सर्वव्यवहारहेतुर्ज्ञानम् बुद्धि। सा द्विविधा- स्मृतिरनुभवश्च। संस्कारमात्रजन्यं ज्ञानं स्मृतिः। स्मृतिभिन्नज्ञानत्वम् अनुभवत्वम्। स द्विविधः- यथार्थोऽयथार्थश्चेति-तद्वति तत्प्रकारकोऽनुभवो यथार्थः। यथा- रजते **'इदं रजतम्'** इति ज्ञानम्। सैव प्रमेत्युच्यते। तदभाववति तत्प्रकारकोऽनुभवोऽयथार्थः। यथा- शुक्तौ **'इदं रजतम्'** इति ज्ञानम्, सैवाऽप्रमेत्युच्यते, पुनश्च यथार्थानुभवश्चतुर्विधः-प्रत्यक्षाऽनुमित्युपमितिशाब्दभेदात्।

सर्वेषामनुकूलवेदनीयं सुखम्। सर्वेषां प्रतिकूलवेदनीयं दुःखम्। इच्छा कामः। क्रोधो द्वेषः। कृतिः प्रयत्नः। इच्छा द्विधा- फलेच्छा उपायेच्छा च। फलं सुखादिकम् उपायो यागादिः। प्रयत्नत्वजातिमान्प्रयत्नः। स त्रिविधः- प्रवृत्तिनिवृत्ति-जीवन-योनिभेदात्। इच्छाजन्यगुणः प्रवृत्तिः द्वेषजन्यगुणः निवृत्तिः। जीवनाऽदृष्टजन्यो गुणोः जीवनयोनिः। स च प्राणसञ्चार- कारणम्।

**विहितकर्मजन्यो धर्मः निषिद्धकर्मजन्यस्त्वधर्मः।**

संस्कारस्त्रिविधो- वेगो, भावना स्थितिस्थापकश्चेति। वेगः पृथिव्यादि चतुष्टयमनोवृत्तिः। अनुभवजन्या स्मृति हेतुर्भावना, आत्ममात्रवृत्तिः। अन्यथाकृतस्य पुनस्तदवस्थाऽऽपादकः स्थितिस्थापकः, कटादि पृथिवीवृत्तिः।

## द्रव्ये गुणनिरूपणम्

वैशेषिकदर्शने नवद्रव्याणि सन्ति। ते च 'तत्र द्रव्याणि- पृथिव्यप्तेजो वाय्वाकाशकालदिगात्ममनांसि नवैव' प्रत्येकद्रव्ये किञ्चित्-किञ्चिद् गुणाः वर्तन्ते।

**'रूपरसगन्धस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्व द्रवत्वसंस्कारवती'- पृथिव्याम्।**[10] अर्थात् पृथिव्यां रूप-रस-गन्ध-स्पर्श-संख्या-परिमाण-पृथकत्व-संयोग-विभाग-परत्व-अपरत्व-गुरुत्व-द्रवत्व, संस्कारः च चतुर्दशगुणैः सह युक्तम्। न्यायकन्दल्याम् अपि **गन्धसहचरित-**

---

10. प्रशस्तपादभाष्यम् पृ. 71

**चतुर्दशगुणकत्वमपि पृथिव्या।**[11] पृथिव्यां सप्तरूपं, षड्रसो, सुरभिरसुरभिश्च गन्ध द्रव्यं पाकज अनुष्णाशीत अपि वर्तते।

**'रूपरसस्पर्शद्रवत्वस्नेहसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वा-परत्वगुरुत्वसंस्कारवत्य'**[12] इति जले अपि चतुर्दशगुणाः वर्तन्ते। जले शुक्लरूप-मधुररस-शीतस्पर्श-स्नेह-सांसिद्धिक-द्रवत्वञ्च सन्ति।

**'रूपस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभाग परत्वापरत्वद्रवत्व-संस्कारवत्'** इति[13] एकादशगुणाः तेजसि विद्यन्ते। तेजसि भास्वरशुक्लरूपं तथा स्पर्शे उष्णस्पर्शं वर्तते। यथा सूत्रकारवचनात् रूपादीनां पृथिव्या सिद्धिस्तथा तेजस्यपीत्यर्थः। तथा च सूत्रम्- **'तेजोऽपि रूपस्पर्शवत्'** अर्थात् भास्वरशुक्लं, उष्णस्पर्शे युक्तद्रव्यं तेजः अपि वैशेषिकसूत्रे दृश्यते।

**'स्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वसंस्कारवान्'**[14] इति नवगुणाः वायौ वर्तन्ते। अस्य तु अपाकजः अनुष्णाशीतस्पर्शः वर्तते। गुणविनिवेशाधिकारसूत्रेण सिद्धः अरूपिष्वच्चाक्षुषवचनात् सप्तसंख्यादयः 'तृणेकर्मवायोः संयोगात्' इति वचनात् वायौ संस्कारदर्शितः।

**आकाशस्य गुणाः शब्दसङ्ख्यापरिमाणपृथक्त्वसंयोगविभागाः।**[16]

अर्थात् शब्द-संख्या-परिमाण-पृथक्त्व-संयोग-विभागश्च षड् गुणाः आकाशे वर्तन्ते। **'विभाववान् महानाकाशस्तथा चात्मा'**[17] इति सूत्रेण आकाशम् वैभवयुक्तकारणेन अत्र परममहतपरिमाणं बोध्यते। **"संयोगादिभा-गात् शब्दाच्च शब्दनिष्पत्तिः"**[18] इति सूत्रेण महर्षिगौतमः संयोगस्य तथा विभागस्य कारणं शब्दः इति वदति। अत्र एकत्वसख्यां इति बोध्यते।

---

11. प्रशस्तपादभाष्यम् पृ. 91
12. प्रशस्तपादभाष्यम् पृ. 97
13. वैशेषिकसूत्रम् 2/1/3
14. प्रशस्तपादभाष्यम् पृ.111
15. वैशेषिकसूत्रम् 5/1/14
16. प्रशस्तपादभाष्यम् पृ. 143
17. वैशेषिकसूत्रम् 7/1/22
18. वै. सू. 2/2/31

**कालस्य गुणाः संख्यापरिमाणपृथक्त्वसंयोगविभागाः।**[19]

काले संख्या-परिमाण-पृथक्त्व-संयोगः तथा विभाग इति पञ्चगुणाः वर्तन्ते। अत्र एकत्वसंख्या विद्यते। **'कारणे कालाख्या'**[20] इति सूत्रेण महत्परिमाणम्। **'कारणपरत्वादितिवचनात् संयोगः'** अत्र **"कारण-परत्वात्कारणापरत्वाच्च परत्वापरत्वे"**[21] इति सूत्रेण संयोगस्य सिद्धिः। **"तस्यास्तु गुणाः संख्यापरिमाणपृथक्त्वसंयोगविभागाः कालवदेते सिद्धाः।"**[22]

तस्य इत्यत्र दिक् बोधव्यम्। दिक्-संख्या-परिमाण,-पृथक्त्वसंयोग-विभागा च इति पञ्चगुणाः वर्तन्ते।

**"तस्य गुणा बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्कारसंख्या-परिमाणपृथक्त्वसंयोगविभागाः"**[23]

अर्थात् बुद्धि-सुख-दुःख-इच्छा-द्वेष-प्रयत्न-धर्मः-अधर्म-संस्कार-संख्या-परिमाण-पृथक्त्व-संयोग-विभागः च चतुर्दशगुणाः आत्मनि वर्तन्ते। "आत्मलिङ्गाधिकारे" अर्थात् **प्राणापानादि**[24] सूत्रद्वारा बुद्ध्यादयः प्रयत्नान्ताः सिद्धाः। **"आत्मान्तरगुणानामात्मान्तरेऽकारणत्वात्"**[25] इति सूत्रेण एकस्य आत्मनः गुणं प्रति अपरस्य आत्मनः गुणम् अकारणम् इति उच्यते, अत्र धर्माधर्म इति आत्मनः गुणम् महर्षिकणादेन रचिते वैशेषिकसूत्रग्रन्थे **"आत्ममनसोः संयोगविशेषात्संस्काराच्च स्मृतिः"**[26] इति सूत्रेण संस्कारं स्मृतिः इत्यस्य करणम् इति उच्यते।

---

19. प्रशस्तपादभाष्यम् 159
20. वै.सू. 7/1/15
21. वै.सू. 7/2/22
22. प्र.पा. भाष्यम् पृ. 164
23. प्र.पा. भाष्यम् पृ. 208
24. वै.सू 3/2/4
25. वै.सू 6/1/15
26. वै.सू 9/2/6

**तस्य गुणाः संख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्व-संस्काराः।**[27] अर्थात् संख्या-परिमाण-पृथक्त्व-संयोग-विभाग-परत्वापरत्व इति अष्टगुणाः मनसि वर्तते। **"तद्भाववचनादणु मनः"**[28] इति सूत्रेण सूत्रकारस्य उक्तिमाध्यमेन मनसि अणुपरिमाणस्य सिद्धं करोति।

श्रीजगदीशतर्कालङ्कारेण कारिकामाध्यमेन तर्कामृते वर्णितं यथा -

**वायोर्न्नवैकादशतेजसो गुणा जलक्षितिप्राणभूतां चतुर्दश।**
**दिक्कालयोः पञ्च षडेव चाम्बरे महेश्वरेऽष्टौ मनस्तथैव च।।**[29]

उपसंहारे एवं वक्तुं शक्यते वैशेषिकदर्शनस्य मुख्यं लक्ष्यं भवति निःश्रेयसम्। अस्मिन् दर्शने बुद्धितत्त्वं गुणपदार्थो भवति। अतः मया गुणस्य लक्षणं, गुणभेदाः तथा नवद्रव्ये के के गुणाः सन्ति संक्षेपेण प्रतिपाद्यते। ज्ञानमेव मुक्तेः साधनं भवति। तत्रापि रूपादिगुणपदार्थानां ज्ञानमपि मुक्तेः साधनम्। गुणपदार्थतत्त्वज्ञानेन मुक्तिः एव भवति।

## सन्दर्भग्रन्थसूची


| **ग्रन्थनामः** | **लेखकः/व्याख्याकारः/ सम्पा. / प्रकाशकः वर्षम्** |
|---|---|
| 1. **किरणावली** | उदयनाचार्यः, सम्पा.- विन्ध्येश्वरीप्रसाद द्विवेदी, चौखम्बासंस्कृतसीरीज सं. 9, वाराणसी, 1897 |
| 2. **कारिकावली** (भाषापरिच्छेदः) | विश्वनाथपञ्चाननः, सं.- हरिरामशुक्लशास्त्री, काशीसंस्कृतसीरीज, वाराणसी, 1972 |
| 3. **तर्कामृतम्** | जगदीशतर्कालङ्कारः, सम्पा.- विष्णुपदमहापात्रः श्रीलालबहादुरशास्त्रीराष्ट्रीयसंस्कृतविद्यापीठम् (मानितविश्वविद्यालयः), नवदेहली, 2009 |


---

27. प्र.पा. भाष्यम् पृ. 229
28. वै.सू - 7/9/22
29. तर्कामृतम्

4. **तर्कसंग्रहः** अन्नंभट्टः, सं.– अथल्ये– बोडासः, बाम्बे संस्कृत–सीरीज, सं. 55, भण्डारकर ओरियण्टलरिसर्च इन्स्टीट्युट, पुना, 1968

5. **तर्कसंग्रहः 'दीपिका'** अन्नंभट्टः, स. अथल्ये– बोडासः, बाम्बे संस्कृत सीरीज, सं–55, भण्डारकर ओरियण्टलरिसर्च इन्स्टीट्यूट, पुना, 1968

6. **न्यायकन्दली** श्रीधराचार्यः, सं. दुर्गाधरझा, गंगानाथझा, ग्रन्थमाला सं. 1, वाराणसी 1968.

7. **न्यायलीलावती** श्रीवल्लभाचार्यः, सं. हरिहरशास्त्री, चौखम्बा संस्कृतसीरीज, सं. 355, वाराणसी, 1927

8. **न्यायसिद्धान्तमुक्तावली** विश्वनाथपञ्चाननः, सं. श्रीकृष्णवल्लभाचार्यः, काशीसंस्कृतग्रन्थमाला, सं. 212, वाराणसी, 1972.

9. **प्रशस्तपादभाष्यम्** (पदार्थधर्मसंग्रहः) प्रशस्तपादः सं. नारायणमिश्रः काशीसंस्कृत–ग्रन्थमाला सं. 173, वाराणसी, 1966

10. **वैशेषिकसूत्रम्** कणादः, सं. नारायणमिश्रः, चौखम्बासंस्कृत–सीरीज, वाराणसी, 1966.

❑❑❑

# अद्वैतवेदान्ते मायावादविमर्शः

- **अल्का***

**वेदान्तस्य परिचयः**

वेदान्तदर्शनं सर्वातिशायी दर्शनम् अस्ति। उपनिषद्ग्रन्थाः तु अस्य वेदान्तस्य उपजीव्यत्वेन सम्प्रतिष्ठिताः सन्ति। वेदान्तो नाम उपनिषद् प्रमाणमिति वेदान्तसारवचनात् प्रमाणत्वेनापि तस्य ग्रहणम्। औपनिषद-वचनानां विरोधेन अवभासमानानां सिद्धान्तानां विरोधपरिहाराय भगवान् बादरायणो व्यासो ब्रह्मसूत्राभिधेयं दर्शनमिदं प्राणैषीत्। एतत् ब्रह्मसूत्रनामकं दर्शनम् अखिल-वेदान्त-सिद्धान्तानाम् आकारग्रन्थः इत्युच्यते।

बादरायण-व्यास-प्रणीतवाद् अस्य दर्शनस्य रचना महाभारतात् प्रागेव बभूव इति निश्चीयते। अस्मिन् दर्शने सर्वास्तिवाद-विज्ञानवादयोरपि विद्यमानत्वात् केचन एतदीये रचनाकाले संशेरते परं नेदं विस्मरणीयं यत् तादृशाः सिद्धान्तास्तु बुद्धोदयप्रागेव जनुर्जगृहुः।

ब्रह्मसूत्रस्य भाष्यकर्तृषु सुविदिताः भाष्यकाराः तेषां भाष्याणि च-

1. शङ्करः- शारीरकभाष्यम् (अद्वैतमतम्)
2. भास्करः- भास्करभाष्यम् (भेदाभेदमतम्)
3. श्रीरामानुजः - श्रीभाष्यम् (विशिष्टाद्वैतमतम्)
4. मध्वः - पूर्णप्रज्ञभाष्यम् (द्वैतमतम्)
5. निम्बार्कः - वेदान्तपारिजातभाष्यम् (द्वैताद्वैतमतम्)
6. श्रीकण्ठः - शैवभाष्यम् (शैवविशिष्टाद्वैतमतम्)

---

* शोधच्छात्रा, सर्वदर्शनविभागः। श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्व-विद्यालयः, नवदेहली।

**अद्वैतवेदान्तः**

आचार्यशङ्करस्याद्वैतविषयकस्य सिद्धान्तस्य प्रभावः सर्वत्रैव सान्द्रतया घनीभूततया चात्यन्ताधिकतया विततो वर्तते यद् 'वेदान्त' इत्येतेन पदेन वस्तुतोऽद्वैतवेदान्तस्यैव बोधो भवति। अस्त्यपि 'अद्वैतवादः' सर्वेष्वपि वादेषु श्रेष्ठो गुरुतमश्च। वेदान्तदर्शनस्य मर्मः तत्रैव चरमसीमायां समुन्मीलितं भवति।

अद्वैतवेदान्तदर्शनस्य भारतीयदर्शने सर्वोच्चस्थानं वर्तते। अद्वैतवादः एकमेव तत्त्वं परमसत्यत्वेन स्वीकरोति विचारधाराणाम् अभिप्रेतवान्। शेषश्च तस्मादुत्पन्नान्येषां स्वीकुर्वति तस्य विकारं वा प्रादुर्भाव वा। भारतीयदर्शने अद्वैतवादसम्बन्धे द्वे वस्तुनि विशेषतया उल्लेखनीयानी सन्ति।

प्रथमा– परमतत्त्वम् आध्यात्मिक अस्ति। द्वितीया सः परमार्थिक अस्ति।

**माया**

**अव्यक्तनाम्नी परमेशशक्तिरनाद्यविद्या त्रिगुणात्मिका परा।**
**कार्यानुमेया सुधियैव माया यया जगत्सर्वमिदं प्रसूयते।**[1]

**सन्नाप्यसन्नाप्युभयात्मिका नो भिन्नाप्यभिन्नाप्युभयात्मिका नो।**
**साङ्गाप्यनङ्गाप्युभयात्मिका नो महाद्भुतानिर्वचनीयरूपा॥**[2]

शुद्धा ह्यब्रह्मविबोधनाश्या, सर्पभ्रमो रज्जुविवेकतो यथा। रजस्तमः सत्त्वमिति प्रसिद्धा, गुणास्तदीयाः प्रथितैः स्वकार्यैं, अज्ञानं तु सदसद्भ्याम् अनिर्वचनीयं त्रिगुणात्मकं ज्ञानविरोधिभावरूपं यत्किञ्चिदिति वदन्त्यहमज्ञ इत्याद्यनुभवात्मकं यथोक्तम्–

**सन्नाप्यसन्नाप्युभयात्मिका नो,**
**भिन्नाप्यभिन्नाऽप्युभयात्मिका नो।**

1. विवेकचूडामणिः– 110
2. विवेकचूडामणिः– 111

**साङ्गाप्यनङ्गाप्युभयात्मिका नो,**
**महाद्भुताऽनिर्वचनीयरूपा॥**[3]

तथ्यमिदं सुस्पष्टं यत् जाते ब्रह्मसाक्षात्कारे अज्ञानस्य बाधो भवत्येव। अतः अज्ञानं सद्रूपं कथमपि भवितुं न शक्यते। अपि च असत्पदार्थानां शशविषाणवत् कथमपि प्रतीतिः भवितुं न शक्नोति परन्तु सर्वे अनुभवन्त्येव यद् अज्ञानस्य प्रतीतिः भवति। अतः अज्ञानम् असद्रूपात्मकमपि भवितुं न शक्नोति। अर्थात् सदसद्रूपाभ्याम् अज्ञानं परिभाषयितुं न शक्यते इति–

**अजामेकां लोहित-शुक्ल-कृष्णां,**
**बह्वीः प्रजाः सृजमानां सरूपाः।**
**अजो ह्येको जुषमाणोऽनुशेते,**
**जहात्येना भुक्तभोगमजोऽन्यः॥**[4]

उपर्युक्तं श्रुत्यनुसारेणाज्ञानस्य त्रिगुणात्मकत्वं सिद्धं, सत्त्वरज-तमोगुणात्मकत्वप्रतिपादनात्। व्योमादिरूपेण विततम् अज्ञानमिदं सार्वकालिकं नास्त्येव, अपितु ब्रह्मज्ञानेन एतादृशमपि अज्ञानं निवर्तते। अत एव अज्ञानस्य निवृत्तिम् अभिलक्ष्याह– ज्ञानविरोधीनि। यथोक्तं भगवता श्रीकृष्णेन–

**देवी ह्येषा गुणमयी मम माया दुरत्यया।**
**मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते॥**[5]

अर्थात्, ईश्वरस्य माया अज्ञानं वा सर्वथा दुस्तरणीयम् एवास्ति। ये सर्वात्मना मां प्रपद्यन्ते, ब्रह्मसाक्षात्कारं कुर्वन्ति वा, केवलं ते एव ब्रह्मज्ञानेन सर्वभूतमोहिनीं मम मायाम् अज्ञानमविद्यां वा अतिक्रामन्ति, संसारानलसन्तापाद् मुच्यन्ते इत्यर्थः।

एवं भावरूपस्य तस्याज्ञानस्य मायायाः वा त्रिगुणात्मकत्वेऽपि 'इदमित्थं' इयद्वा' इति पिण्डीकृत्य दर्शयितुं न शक्यते, इत्याह यत्किञ्चिदिति। वेदान्तसिद्धान्तमुक्तावल्यनुसारेण अज्ञानस्य ज्ञानं तथैव असम्भवमस्ति यथा प्रकाशेन तमोदर्शनमसम्भवं भवति, यथोक्तम्–

3. विवेकचूडामणिः– 111
4. श्वेताश्वतरोपनिषद् 4.9
5. श्रीमद्भगवद्गीतायाम् 7.14

**अज्ञानं ज्ञातुमिच्छेद्यो, मानेनात्यन्तमूढधीः।**
**स तु नूनं तमः पश्येद् दीपेनोत्तमनेजसा॥**[6]

इदमज्ञानं समष्टि-व्यष्ट्यभिप्रायेणैकमनेकमिति च व्यवह्रियते। तथाहि यथा वृक्षाणां समष्ट्यभिप्रायेण वनमित्येकत्वव्यपदेशो, यथा वा जलानां समष्ट्यभिप्रायेण जलाशय इति व्यपदेशः भवति। अपि च वनस्य व्यष्ट्यभिप्रायेण वृक्षा इत्यनेकत्वव्यपदेशी अथवा जलाशयस्य व्यष्टयभि-प्रायेण जलान् इति व्यपदेशः।

अज्ञानस्यास्य आवरणविक्षेपनामकमस्ति शक्तिद्वयम्। अत्र आवरण-विक्षेपशक्तिद्वये प्रथमतः आवरणशक्तिः निरूप्यते। सच्चिदानन्दस्वरूपमावृणोति इति आवरणशक्तिः। अनेकयोजनविस्तीर्णमपि सूर्यमण्डलमवलोकयितृदृष्टि-मात्राच्छादकत्वेन आच्छादयति। तथैव अतितुच्छपरिच्छिन्नमप्यज्ञानं प्रमातृबुद्धि-मात्राच्छादकत्वेन आत्मानम् आच्छादयति इति उपचारादुच्यते। वस्तुतस्तु नित्योपलब्धिस्वरूपोऽयमात्मा केनापि कथमपि विधातुं न शक्यः। यथोक्तं हस्तामलके-

**घनच्छन्नदृष्टिर्घनच्छन्नमर्कं....।**

अर्थात् अतिमूढः घनच्छन्नदृष्टिः (सन्) अर्कं घनच्छन्नं निष्प्रभं च मन्यते। तथा मूढदृष्टेः यः आत्मा बद्धवद्भाति स नित्योपलब्धिस्वरूपः आत्मा (एव) अहम् इति। इत्थं भेदबुद्धिसमुत्पादिका इयमावरणशक्तिरेव संसारहेतुरस्ति। अनया एव आवरणशक्त्या समायुक्तः आत्मा सांसारिकविषयेषु कर्तृत्वभोक्तृत्वं सुख-दुःखत्वञ्च मन्यते, किन्तु सर्वमिदं रज्जु-सर्पभावनेव मिथ्या वर्तते। विक्षेपशक्तिस्तु अखिलब्रह्माण्डसमुत्पादिका अस्ति। आवरणशक्तिः यदा रज्जुस्वरूपम् आवृणोति तदा विक्षेपशक्तिः आवृत्ते रज्जौ सर्पमुत्पादयति, तथैव आत्मविषयकम् अज्ञानमपि बोध्यम्। अर्थात् यदा आवरणशक्तिः आत्मानम् आवृणोति तदा विक्षेपशक्तिः आत्मनि आकाशादिप्रपञ्चम् उत्पादयति। अस्मिन्नेवार्थे ग्रन्थान्तर-सम्मतिमप्युपस्थापयति-

6. बृहदारण्यकोपनिषद्

**शक्तिद्वयं हि मायायाः विक्षेपावृत्तिकारणम्।**
**विक्षेपशक्तिर्लिङ्गादिब्रह्माण्डान्तं जगत्सृजेत्॥**

वेदशास्त्रे समष्टिरूपज्ञानाय "माया" च व्यष्टिरूपज्ञानाय 'अविद्या' शब्दस्योपयोगं कृतमस्ति।

### समष्टिरूपज्ञानम्

यथानेकप्रकाराणां वृक्षाणां समूहं वनं कथयामः तथा च नदी तडाग- वापी-कूप-आदि जलराशिजलदं कथयामः तथा अनेकजीवेषु स्थितज्ञानस्यैकां समष्टिं स्वीकुर्मः चेत् तत् समष्टिरूपज्ञानं कथ्यते। जीवगतज्ञानानि समुदायदृष्ट्या 'एकं' कथ्यते। सदानन्दः स्व-समर्थाय अत्र अजामेकां श्रुतिं लिखति। समष्टिरूपज्ञानमुत्कृष्टोपाधिकारणेन विशुद्ध-सत्त्वगुणप्रधानमस्ति। समष्टिमुत्कृष्टोपाधिः कथिता। कोऽपि पदार्थे अन्यपदार्थेण सह सम्बन्ध- मागत्यान्यपदार्थेषु सम्बन्धमागत्यान्यपदार्थसीमितस्वरूपे वा भिन्नस्वरूपे प्रस्तूयते सा उपाधिरस्ति। तादृशमज्ञानब्रह्मणः स्वरूपं भिन्नरीत्या प्रस्तुयते अत सा ब्रह्मोपाधिरस्ति।

समष्टिरूपज्ञानं व्यष्टिरूपज्ञानस्य दृष्ट्या उत्कृष्टोपाधिः परिगण्यते। सुबोधिनी अनुसारेण समष्टिज्ञानरागादिदोषरहितास्ति अतः सा उत्कृष्टास्ति।

सुबोधिनीकर्ता शङ्काकर्ता यत् कारणत्वस्योपाधिरूपज्ञानं सुषुप्तित्वं कुतः? तस्य समाधानमस्ति यत् सर्वेषामुपरित्वमस्ति अतः सर्वस्थूलसूक्ष्मोपाधिनां कारणमुपाधौ लीनत्वमस्ति तेन सुषुप्ति अवस्था कथ्यते।

शङ्काकर्ता कथयति यत् स्थूलसूक्ष्मप्रपञ्चस्य लयस्थानं सुषुप्तित्वं कुतः? तस्योत्तरम् एतावत् अस्ति यत् संज्ञाभेदेन सर्वं दृश्यते च लयस्कारण-मस्ति, अतो सुषुप्तित्वं कथ्यते।

### व्यष्टिज्ञानम्

वने भिन्न-भिन्नवृक्षाणां यदा ज्ञानं कारयेत् तदा आम्र-जम्बू-अश्वत्थादी-नाम् आश्रयं स्वीकुर्वन् जलाशयानां भिन्न-भिन्नज्ञानकारणेन वापी-कूप-तडाग-नदी आदीनामाश्रयं स्वीकुर्म तादृशमेव प्रत्येकेषु जीवात्मसु स्थितज्ञानस्य

भिन्न-भिन्नव्यक्तिगतज्ञानं कारयेत् तदा अज्ञानं व्यष्टिरूपज्ञानं कथ्यते व्यष्टिरूपज्ञानं तत्तु आत्मोपाधिरस्ति तथा च प्रत्येकजीवात्मा स्व-जातिं प्रति भिन्न-भिन्नाहंकाराय व्यष्टिरूपज्ञानं कारभूतमस्ति। व्यष्टिरूपज्ञाने प्रतिपादनाय वेदान्तसारस्य कर्ता "इन्द्रो मायाभिः पुरुरूप ईयत" श्रुत्यावतरणं ददाति। एतदवतरणं तेन ऋग्वेदस्य चतुर्थमण्डलस्य 47 तमं सूक्तस्य 16 तम् मन्त्रात् दत्तमस्ति अत्र 'इन्द्रः' शब्दस्यार्थः परमेश्वरः स्वीकृतोऽस्ति तथा च मायार्थः 'अज्ञानं' स्वीकृतमथवा जगति परमेश्वरः मायया अनेकरूपयुक्तः प्रतीतं भवति।

व्यष्टिरूपज्ञानेनावृत्तचैतन्यं जीवात्मा कथ्यते। जीवात्माल्पज्ञैवमनीश्वरः भवति तदा जीवात्मानं प्राज्ञः कथ्यते प्राज्ञशब्दस्य भिन्न-भिन्नार्थाः प्राप्यन्ते यथा-

1. प्रकर्षेण जानातीति प्रज्ञः प्रज्ञ एव प्राज्ञः एवं व्युत्पत्त्यनुसारं प्राज्ञार्थः प्रकर्षरूपेण ज्ञायते हिरियन्नापि एतस्यार्थस्य निर्देशं कृत्वा प्रायेण असौ इति व्युपत्तिग्राह्यं कृत्वा कथितमस्ति यत् (it would be better to understand the term here as) प्रायेण अज्ञः।

2. शङ्कराचार्येण प्राज्ञशब्दस्य अर्थद्वयं कृतमस्ति एकार्थानुसारं "भूत-भविष्यज्ञाता" वा ''सर्वेषां विषयाणां ज्ञाता'' अन्यार्थानुसारं, यस्य समीपं केवलं सामान्यज्ञानमस्ति तत् शङ्कराचार्येण दत्तं द्वितीयोऽध्याय अत्र प्राज्ञशब्दं बोधयितुम् उपयोगी भासते।

3. विद्वन्मनोरञ्जनी अपि प्राज्ञं कथयति यथा- 'प्रायेणात्र प्राज्ञ इत्युक्तं भवति' अनुसारं प्राज्ञशब्दस्य अर्थः प्राज्ञ अज्ञानी अल्पज्ञानी इति अर्थे ज्ञापयति। अत्र अल्पज्ञ ईश्वरजीवसम्बन्धे स्वामीरामतीर्थस्य अर्थरेव प्रतीतो भवति।

## उपसंहारः

अद्वैतवेदान्तः मायाम् अनिर्वचनीयम् मन्यते। माया न सत्यं न असत्यम् अस्ति, अपितु सदसन्निर्वचनीयम् अस्ति। व्यावहारिकदृष्ट्या माया सत् इति उच्यते तस्मात् एव अस्य जगतः अनुभवः भवति।

पारमार्थिकदृष्ट्या माया असत्यम् उच्यते यतः अस्मिन् मते ब्रह्मातिरिक्तस्य अन्यस्य कस्याऽपि अस्तित्वं नास्ति। एकदृष्ट्या सद् तथा अन्य दृष्ट्या असत् कारणे माया सदसदर्निवचनीयम् मन्यते। अस्या न सत्य-असत्यं वा कोऽपि रूपेण निर्वचनम् सम्भवः न शक्यते। मायायाः शक्तिद्वयं स्वीकृतम्-आवरणं-विक्षेपः च। माया समष्टिरूपेण अज्ञानरूपं एव मन्यते तथैव व्यष्टिरूपे ब्रह्मतत्त्वरूपं गोपयति तथा व्यष्टिरूपेण अविद्यात्मस्वरूपं गोपयति। अस्य दर्शनस्य अन्तिमं प्रयोजनं मायावरणेन अनावृत्तं भवेत् ब्रह्मसाक्षात्कारात् मनुष्यस्य मुक्तिः भवति। अतः अद्वैतवेदान्तस्य 'माया' व्याख्याता।

## संदर्भग्रन्थसूची


1. आचार्यरामाद्वयः, वेदान्तकौमुदी, संपा-चतुर्वेदी, राधेश्यामः, काशी हिन्दूविश्वविद्यालयः, शोधप्रकाशनः, काशी, 1973
2. उपाध्यायबलदेवः, भारतीय दर्शन, चौखम्बा ओरिएंटलप्रकाशनम्, वाराणसी, 1979
3. शङ्कराचार्यः, विवेकचूडामणिः, गीताप्रेस, गोरखपुरम्, उत्तरप्रदेशः
4. श्रीमद्भगवतगीता, गीताप्रेस, गोरखपुरम्, उत्तरप्रदेशः।
5. श्वेताश्वतरोपनिषद्, गीताप्रेस, गोरखपुरम्, उत्तरप्रदेशः।
6. सिंहः, कालिप्रसादः, शांकरवेदान्ते तत्त्वमीमांसा, विश्वविद्यालय-प्रकाशनम्, वाराणसी, 1982।
7. अञ्जना, शंकर का अद्वैत दर्शन, परिमलपब्लिकेशन्स, दिल्ली, 2006।


❑❑❑

# न्यायमतानुसारं वादविवेचनम्

-यस्. अभिख्या*

**उपोद्घातः-**

मनुष्यः बुद्धिमान् जन्तुः इति तस्य इतरेभ्यः जन्तुभ्यः विशेषता। तस्य विशेषतया मानवेन यत् सर्वोच्चं जीवनस्य लक्ष्यम् आविष्कृतं तत् दर्शनशब्देन व्यपदिश्यते। दर्शनेषु एव तत् सर्वं सुनिबद्धमस्ति। दर्शनमेव मानवानां संस्कृतेः सभ्यतायाश्च व्यवस्थापनस्य मूलम् अस्ति। महात्मभिः सद्भिः तथा संस्कृतिः उपदिष्टाभिः आयोजिता व्यवस्थापिता च यया सर्वश्रेष्ठं जीवनलक्ष्यं सुसाध्यं स्यात्। सा एव सर्वश्रेष्ठा संस्कृतिः यया सर्वश्रेष्ठं लक्ष्यं सुलभं भवति। अतः दर्शनस्य मानजीवने अत्यधिकः प्रभावः अस्ति।

तर्हि दर्शनं नाम किम्- दृशिर् प्रेक्षणे इति धातोः ल्युट्-प्रत्यययोगेन दर्शनशब्दः निष्पद्यते। दृशिर् प्रेक्षणे इत्यत्र शिष्टैः दृशधातोः प्रेक्षणम् इत्यर्थः प्रदत्तः। तथापि धातूनां बह्वर्थता सुप्रसिद्धा एव। अतः प्रेक्षणम् इत्यस्य अत्र न केवलं चाक्षुषदर्शनम् इति अर्थः अपि तु ज्ञानसामान्यम्। पञ्चभिः षड्भिर्वा इन्द्रियैः साक्षात् परम्परया वा यदपि ज्ञानं बोधः बुद्धिः प्रमा प्रमितिः जायते तत् प्रेक्षणम् इति एकः पक्षः।

युक्तिसाहाय्येन तत्त्वज्ञानस्य प्राप्तये प्रयत्नः एव क्रमबद्धरूपेण आयोजितश्चेत् दर्शनरूपेण परिणतो भवति। बुद्ध्या युक्तिभिश्च लब्धेन ज्ञानेन मानवः जीवनशैलीं निर्धारयति आचरति च, यया इह परत्र च सुखं विन्देत्। इयं शैली एव धर्मः। तथाहि-

---

* अनुसन्धात्री, राष्ट्रीयसंस्कृतविश्वविद्यालयः, तिरुपतिः।

**आहारनिद्राभयमैथुनं च सामान्यमेतत् पशुभिर्नराणाम्।**
**धर्मो हि तेषामधिको विशेषो धर्मेण हीनाः पशुभिः समानाः।।**[1]

अर्थात्– अन्नपानादिरूप आहारः, निद्रा स्वापः, भयं मैथुनं च इति एतत् चतुष्टयं यथा मनुष्येषु तथा पशुषु अपि परिलक्ष्यते। एतद्दृष्ट्या पशुभ्यः मानवस्य न किमपि पार्थक्यम्। परन्तु मनुष्यस्य धर्मः एव स विशेषः यः पशूनां नास्ति। यदि कस्यचिद् मानवस्य धर्मः न स्यात् तर्हि स पशुसमान एव। तावान् महिमा दर्शनस्य यत् तद् विना मानवः पशुसमानः भवति। दर्शनशास्त्राध्ययनस्य का आवश्यकता चेत् उच्यते–

**शास्त्रं सुचिन्तितमहो परिचिन्तनीयं**
**आराधितोऽपि नृपतिः परिसेवनीयः।**
**अङ्के धृताऽपि तरुणी परिसेवनीयः**
**शास्त्रे नृपे च युवतौ च कुतो वशित्वम्।।**[2]

अर्थात्– शास्त्रं पठितमपि, नृपः आराधनया सन्तोषितोऽपि, तरुणी भार्या स्वस्य अस्ति चेदपि पुनः तेषां स्वायत्तीकरणाय प्रयत्नः विधेयो भवति। यतोहि मुहुर्मुहुः प्रयासः नास्ति चेद् एतत्त्रयं हस्तगतं न भवति।

तादृशदर्शनस्य भारते आस्तिकनास्तिकभेदेन द्विधा विभागः क्रियते। किमास्तिकत्वं किं वा नास्तिकत्वम्? वेदस्य प्रामाण्यं यानि दर्शनानि अङ्गीकुर्वन्ति तानि आस्तिकदर्शनानि। यानि च वेदस्य प्रामाण्यं नाङ्गीकुर्वन्ति तानि नास्तिदर्शनानि इति विभागः सुबोधः। तत्र षडास्तिकदर्शनानि हि– न्यायदर्शनम्, वैशेषिकदर्शनम्, सांख्यदर्शनम्, योगदर्शनम्, पूर्वमीमांसादर्शनम्, उत्तरमीमांसादर्शनम् इति। अत्र उत्तरमीमांसापदेन वेदान्तदर्शनं बोध्यते।

आस्तिकदर्शनेषु न्यायदर्शनं प्रामुख्यं भजति। वैदिकधर्मस्य स्वरूपबोधाय न्यायसिद्धान्तोऽस्ति परमोपयोगी। अत एव मनुस्मृतौ श्रुत्यनुगामिनस्तर्कस्य साहाय्येनैव धर्मरहस्यं ज्ञेयमित्युक्तम्। वात्स्यायनेन न्यायः सर्वासां विद्यानां प्रदीपः उक्तः।

---

1. हितोपदेशः
2. भारतीयदर्शनम्

**प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम्।**
**आश्रयः सर्वधर्माणां शश्वदान्वीक्षिकी मता॥**[3]

अस्ति न्यायस्य व्यापकोऽर्थः विभिन्नप्रमाणैर्वस्तुतत्त्वपरीक्षा। **प्रमाणैरर्थ-परीक्षणं न्यायः**[4] (वा.न्या. भाष्यम् 1/1/19 ) अस्ति न्यायस्य अपरं नाम **आन्वीक्षिकी**। अन्वीक्षया **अनुमित्या प्रवृत्ता न्यायविद्या एव आन्वीक्षिकी इति कथ्यते।**

भारतीयदर्शने ग्रन्थसम्पत्तिदृष्ट्या वेदान्तं विहाय न्यायस्य श्रेष्ठं स्थानं वर्तते। गौतममहर्षिविरचितानि न्यायसूत्राणि सन्ति पञ्चसु अध्यायेषु विभक्तानि, येषु प्रमाणादिषोडशपदार्था उद्देश-लक्षण-परीक्षणैः सम्यग् विवेचिता वर्तन्ते। न्यायसूत्रेषु आदिमं सूत्रं भवति-**"प्रमाणप्रमेयसंशयप्रयोजन-दृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासछलजाति-निग्रहस्थानानां** तत्त्वज्ञानात् निःश्रेयसाधिगमः"[5]। तेषु षोडशपदार्थेषु त्रयाणां पदार्थानां कथा इति प्रयोगः दृश्यते न्यायशास्त्रे।

न्यायनये तिस्रः कथा सन्ति- वादो जल्पो वितण्डेति। अत्र **नानाप्रवक्तृके विचारे वसति तद्विचारवस्तु विचारविषया वाक्यसंदृब्धिः कथेति यावत्, तस्यां कथायाम् एष नियमस्तिस्त्र एव**[6] इति उक्तम्। अर्थात् अत्र विचारवस्तुनियमः यत् वस्तु विचार्यते तत् त्रिधा विचार्यते। तत्र विचारश्च वादो जल्पो वितण्डा चेति। तासां वादजल्पवितण्डानां मध्ये आदौ वादस्य लक्षणमाह- **पक्षप्रतिपक्षपरिग्रहो वादः**[7] इति। तर्हि कौ एतौ पक्षप्रतिपक्षौ? एकाधिकरणस्थौ एकविषयकौ यौ विरुद्धौ धर्मौ तौ पक्षप्रतिपक्षौ इत्युच्यते। तस्यायमाशयः- परस्परविरुद्धत्वात् पक्षस्य प्रत्यनीकः (विरुद्धः) प्रतिपक्षः इत्यर्थः। यथा- "आत्मा अस्ति" "आत्मा नास्ति"

---

3. न्या.भा.- पृ.सं-6
4. वा. न्या. भाष्यम् 1.1.18
5. न्या.भा.- सू. 1.1.11
6. ता.टी.
7. न्या.भा.- पृ.सं.- 70

इत्यत्र एकस्यैव आत्मनः परस्परविरुद्धयोः भावाभावयोः एतादृशपक्षप्रतिपक्षयोः परिग्रहो वादः इत्यर्थः। नानाधिकरणस्थले तु भिन्नविषयकौ विरुद्धावपि पक्षप्रतिपक्षौ न भवतः यथा– "नित्या आत्मा" "अनित्या बुद्धिः" इति। अनेन प्रकारेण वादिप्रतिवादिनोर्मध्ये परस्परविरुद्धधर्मविषयस्वीकार्ये एव वादः सम्भवति इति पक्षप्रतिपक्षपरिग्रहो वादः इति लक्षणम् उपन्यस्तम्।

तत्र कथामार्गत्रयेऽपि समानत्वात् विशेषणानि उच्यन्ते– **"प्रमाणतर्क-साधनोपालम्भः सिद्धान्ताविरुद्धः पञ्चावयवोपपन्नश्चेति"**[8]। तत्र प्रमाणतर्कसाधनोपालम्भः नाम– **"प्रमाणैस्तर्केन च साधनमुपालम्भश्चास्मिन् क्रियते"** इति। अर्थात्– प्रमाणैः तर्केण च स्वपक्षस्थापना परपक्षखण्डनम् अस्मिन् भवतीत्यर्थः। तच्च कथं चेत्– साधनोपालम्भौ उभयोरपि वादिप्रति-वादिनोः सम्बद्धौ भवतः, तदा वादिना स्वपक्षस्थापनं प्रतिवादिपक्षखण्डनं च कर्तव्यं, एवं प्रतिवादिनापि स्वपक्षस्थापनं वादिपक्षखण्डनं च कर्तव्यम् इत्यर्थः। तर्हि कदा तस्य वादस्य परिच्छेदः चेत्– यावत् वादिप्रतिवादिनोः मध्ये एकः परास्तः न भवति, एकः सिद्धः न भवति, तावत् साधनोपालम्भौ प्रवर्तेते इत्यर्थः। तदा निवृत्तस्य उपालम्भः, व्यवस्थितस्य साधनं जयः इति विज्ञेयः।

द्वितीयं विशेषणम् अस्ति सिद्धान्ताविरुद्धः इति। अर्थात् वादे परपक्षप्रतिकूलपक्षस्वीकारं विना परपक्षप्रतिषेधः असम्भवः, अतः कश्चित् सिद्धान्तं स्वीकृत्य तद्विरोधी हेतुः विरुद्धः इति वक्तुं शक्यते। तथा च सिद्धान्ताविरुद्धः इत्यनेन वादे सिद्धान्तविरुद्धस्य प्रत्याख्यानं प्राप्तं, तच्च प्रतिवादिना विरुद्धस्य प्रयोगे कृते एव सम्भवतीति वादे विरुद्धस्य अभ्यनुज्ञा लब्धा। विरुद्धसादृश्यात् हेत्वाभासानामपि अनुमतिः प्राप्ता। किन्तु तत्र हेत्वाभासानां निग्रहस्थानेषु एव गणनात्, निग्रहस्थानानां च वादे प्रतिषेधात्, हेत्वाभासातिरिक्तानामेव निग्रहस्थानानां वादे प्रतिषेधः ज्ञेयः इति भावः।

तृतीयं विशेषणं भवति– पञ्चावयवोपपन्नः इति। अर्थात् प्रतिज्ञादि-पञ्चावयवयुक्तो वादः भवति। अस्य विशेषणस्य प्रयोजनमस्ति–

---

8. तत्रैव– पृ.सं.–70

**"हीनमन्यतमेनाप्यवयवेन न्यूनम्"**[9] **"हेतूदाहरणाधकमधिकम्"**[10] इति अवयवानां न्यूनत्वे न्यूनस्य आधिक्ये च अधिकस्याभ्यनुज्ञानार्थम् इत्यर्थः। तत्र पञ्चावयवोपपन्नः इति वाक्ये ये अवयवाः सन्ति, तेषु एव प्रमाणतर्कयोः अन्तर्भावः प्राप्तः- अनुमानेन तदापेक्षिततर्कस्यापि प्राप्तेः, वादे प्रमाणतर्कयोः सिद्धेऽपि पृथक् प्रमाणतर्कग्रहणं किमर्थम् इति शङ्कायां समाधत्ते यत्- प्रमाणतर्कयोः पृथक् स्वीकारे त्रीणि प्रयोजनानि उच्यन्ते।

तद्यथा- **"पृथक् प्रमाणतर्कग्रहणं साधनोपालम्भव्यतिषङ्गज्ञापनार्थम्"** इत्यर्थः। अत्र पञ्चावयवोपपन्न इत्यनेनैव प्रमाणतर्कसाधनोपालम्भत्व-लाभे सिद्धे पुनरुपादानानां प्रमाणैः साधनमेव कार्यं तर्केणोपालम्भ एव कार्यं इति बोधनार्थम् इति श्रीगुरुचरणाः। यदि तथा नोच्यते चेत्-वादिप्रतिवादपक्षौ स्वपक्षस्थापनामात्रेण प्रवृत्तौ सन्तौ वादसंज्ञां लभेतां। उक्तं च- **"अन्यथैकः स्वस्थानास्थित एव शब्दस्य नित्यत्वं प्रति पञ्चावयवोपपन्नं वाक्यं प्रयुङ्क्ते इति सोऽपि वादः प्रसज्येत, साधनोपालम्भविशेषणाय प्रमाणतर्कग्रहणं कर्तव्यम् इति भावः"**[11]। तथा च स्वपक्षसाधनं परपक्षखण्डनं च इत्युभयात्मकस्यैव वादत्वं सिद्धं न तु स्वपक्षसाधनमात्रस्य वा परपक्षखण्डनमात्रस्य वा इति।

द्वितीयं प्रयोजनं भवति- गुरुशिष्ययोः मध्ये पञ्चावयवप्रयोगं विनापि प्रमाणैः अर्थसिद्धिः भवत्येव, इति अवयवप्रयोगाभावेऽपि प्रमाणैः साधनोपालम्भौ वादे भवतः। यदि प्रमाणतर्कयोः पृथक् ग्रहणं न भवति केवलं पञ्चावयवोपपन्नः इत्येव कथयामश्चेत् एतादृशः प्रमाणतर्कविचारः बहिर्भूतः भवति। अतः प्रमाणतर्कयोः पृथक्ग्रहणं कृतमिति सूत्रकारः विज्ञापयति।

तृतीयं प्रयोजनं भवति- **"छलजातिनिग्रहस्थानसाधनोपालम्भो जल्पः"**[12] इति आग्रिमं सूत्रम्। अर्थात् छलजातिनिग्रहस्थानानां वादे प्रमाणतर्कयोश्च जल्पे प्रयोगः न भवतीति न विज्ञेयं किन्तु उभयत्र इत्यर्थः, तच्च पृथक् प्रमाणतर्कग्रहणेन लभ्यते इति प्रयोजनम्। तर्हि

9. तत्रैव- 5.2.12
10. तत्रैव- 5.2.13
11. ता.टी.
12. न्या.भा. 1.2.2

उभयोर्मध्ये को वा भेदः चेत्- जल्पे उभयप्रकारेण साधनोपालम्भः भवति, किन्तु वादे केवलं प्रमाणतर्केणैव भवतीति भावः।

द्वितीयकथा भवति- जल्पः- **"यथोक्तोपपन्नश्छलजातिनिग्रहस्थान-साधनोपालम्भो जल्पः"**[13]। अत्र यथोक्तोपपन्नः इत्यनेन वादविशेषणैः युक्तः, तथा च प्रमाणतर्कसाधनोपालम्भः सिद्धान्ताविरुद्धः पञ्चावयवोपपन्नः छलजातिनिग्रहस्थानोपालम्भश्च पक्षप्रतिपक्षपरिग्रहो जल्पः इत्यन्वयः। एवं छलजातिनिग्रहस्थानैः साधनमुपालम्भश्चास्मिन् क्रियते इत्येवं विशेषणं जल्पे इत्यर्थः। तथा च छलजातिनिग्रहस्थानानां सामान्यलक्षणम्- **वचनविघातोऽर्थ-विकल्पोपपत्या छलम्**[14], **साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानं जातिः**[15], **विप्रतिपत्तिरप्रतिपत्तिश्च निग्रहस्थानम्**[16] भवतु विशेषलक्षणं वा भवतु तेन खण्डनमेव सम्भवति न तु साधनम् इति, सूत्रे कथं छलजातिनिग्रहस्थानैः साधनमुक्तम् इति शङ्कायां समाधत्ते यत्- छलजातिनिग्रहस्थानानि स्वपक्षं परपक्षप्रतिषेधमुखेनैव साधयन्तीति भावः। सूत्रे छलजातिनिग्रहस्थानोपालम्भः इत्यत्र छलजातिनिग्रहस्थानसाधनोपालम्भः इत्येवं पाठो युक्तः इति सूत्रानुसारेण अभिप्रायः प्रोक्तः। तथा कथने सति विज्ञायते यत्- तानि छलजातिनिग्रहस्थानानि परपक्षखण्डनं हि स्वपक्षरक्षणार्थमेव भवतीति परपक्षखण्डनद्वारा स्वपक्षरक्षक-त्वमपि सिद्धम्। अर्थात्- प्रमाणैः साधने उपालम्भे च क्रियमाणे छलजातिनिग्रह-स्थानानां स्वपक्षरक्षणे सहकारित्वं भवति। तथा च छलजातिनिग्रहस्थानानां प्रमाणाङ्गत्वेन स्वपक्षरक्षकत्वं प्राप्तं, तेन प्रतिषेधमुखेनैव अर्थसाधकत्वम् इति नियमः नोपपद्यते इत्यर्थः।

उक्तं च न्यायभाष्ये-**"तत्त्वाध्यवसायसंरक्षणार्थं जल्पवितण्डे बीजप्ररोहरक्षणार्थं कण्टकशाखावरणवत्"**[17] इति प्रमाणमपि दर्शयति। अस्यार्थः भवति- यथा शस्यस्थानपरितः कण्टकशाखाभिरावरणं बीजाङ्कुरस्य रक्षणार्थं भवति, तथा जल्पवितण्डे अपि स्वसिद्धान्तस्य रक्षणार्थं भवत इति

13. तत्रैव, 1.2.2
14. तत्रैव, 1.2.10
15. तत्रैव, 1.2.18
16. तत्रैव, 1.2.19
17. न्या.भा. 4.2.50

अस्य सूत्रार्थः। उक्तप्रकारेण जल्पे छलादीनां प्रयोगः प्रमाणाङ्गत्वेनैव भवति, प्रमाणनिरपेक्षाणां तु स्वपक्षसाधकत्वं न भवति, उपालम्भे तु छलादीनां प्रमाणनिरपेक्षाणामपि परपक्षविघातकत्वम् उपपद्यते इति भावः।

अन्तिमा कथा भवति वितण्डा- यदा पूर्वोक्तः जल्पः प्रतिपक्षस्थापनया हीनः भवति, तदा वितण्डा भवति इत्युक्तं सूत्रकारैः- **स प्रतिपक्षस्थापनाहीनो वितण्डा**[18] इति। अर्थात्- सः जल्पः प्रमाणतर्काभ्यां पञ्चभिरवयवैः छलजातिनिग्रहस्थानैश्च यत् परपक्षखण्डनमात्रं क्रियते, स्वपक्षश्च न स्थाप्यते सा वितण्डा इत्युच्यते।

**उपसंहारः-**

अनया विधया तिसृणां कथानाम्- वादजल्पवितण्डा इति, तेषां न्यायमतानुसारं वादविवादे योगदानं कीदृशं भवति? तेषां लक्षणानि कानि इत्यपि अस्मिन् प्रबन्धे चर्चा कृता वर्तते।

## संदर्भग्रन्थसूची

1. न्यायभाष्यम्, वात्स्यायनमुनिप्रणीतं, सुधी-ग्रन्थमाला, वाराणसी।
2. न्यायभाष्य का भाषानुवाद, राजाराम प्रोफेसर।
3. भारद्वाजोद्योतकरकृतं न्यायभाष्यवार्तिकम् , श्रीमता अनन्तलालठक्कुरेण संस्कृतम्, Indian Council of Philosophical Research, New Delhi.
4. भारतीयदर्शन, उमेश मिश्र, हिन्दीसमितिसूचनाविभागः, उत्तरप्रदेशः लखनऊ।

## सांकेतिकशब्दसूची

1. न्या.भा.- न्यायभाष्यम्
2. वा.न्या.भा.- वात्स्यायनन्यायभाष्यम्
3. ता.टी.- तात्पर्यटीका

❒❒❒

---

18. तत्रैव, 1.2.3

# भामतीप्रस्थानानुसारं ख्यातिवादविमर्शः

**-विश्वजित् तरफदारः***

भ्रमवशात् जगत् पृथग्रूपेण अनुभूयते, तत्कारणं हि अज्ञानम् अविद्या वा। भ्रमविषये भारतीयाः तथा पाश्चात्याः विद्वांसः सूक्ष्मरूपेण विचार्यन्ते। भारतीयदर्शनेषु भिन्नेषु भिन्नेषु क्षेत्रेषु भ्रमविषयकं सिद्धान्तमेव 'ख्यातिवादः' इति नाम्ना अभिधीयते। अध्यासस्य अर्थात् भ्रमस्य विश्लेषणार्थं ख्यातिपञ्चकं प्रथितं वर्तते तद्यथा- आत्मख्यातिः, असत्ख्यातिः, अख्यातिः, अन्यथाख्यातिः, अनिर्वचानीयख्यातिश्चेतिख्यातिपञ्चकम्।

**आत्मख्यातिरसत्ख्यातिरख्यातिः ख्यातिरन्यथा।**
**तथानिर्वचनीयख्यातिरित्येतत्ख्यातिपञ्चकम्।।**[1]

ख्यातिर्नाम प्रतीतिः प्रत्ययो वा। ख्यातिशब्दस्य प्रत्ययपरत्वे वेदान्तिनामभ्युपगमः। एताभ्यः ख्यातिभ्यः अन्याः काश्चन ख्यातयो गणिताः दृश्यन्ते। ताः सत्ख्यातिः, सदसत्ख्यातिः सदसद्विलक्षणख्यातिश्चेति। अलौकिकख्यातिरिति अपरापि ख्यातिः शैवसिद्धान्तानुसारं स्वीक्रियते। क्षणिकविज्ञानवादिनः बौद्धाः आत्मख्यातिं स्वीकुर्वन्ति। माध्यमिकास्तु असत्ख्यातिम्। विज्ञानभिक्षुणा सदसत्ख्यातिः स्वीक्रियते। शून्यवादिभिर-सत्ख्यातिः। अख्यातिवादः प्राभाकरमीमांसकैः। नैयायिकाः भाट्टमीमांसकाश्चा-न्यथाख्यातिवादं स्वीकुर्वन्ति। सदसद्विलक्षणख्यातिस्तु अद्वैतिनां मतम्। स चानिर्वचनीयख्यातिनाम्नाभिधीयते। सत्ख्यातिवादं कतिचन मीमांसकाः तथा निम्बार्कसम्प्रदायिनोऽपि स्वीकुर्वन्ति। माध्वमते अख्यातिवादोऽभीष्टः। बल्लभाचार्यमतानुसारमख्यातिवादः सत्ख्यातौ अन्तर्भवतीति। तद्यथा वेदान्तसिद्धान्तादर्शेऽपि-

---

* शोधच्छात्रः, अद्वैतवेदान्तविभागः, श्रीलालबहादुरशास्त्रीराष्ट्रीयसंस्कृतविश्व-विद्यालयः, नवदेहली।

1. ब्र.सू. (अ.भा.)

**आत्मख्यातिरसत्ख्यातिरख्यातिः ख्यातिरेव च।**
**तथा ख्यातिरनिर्वाच्या ह्यन्यथाख्यातिरप्यथ॥**[2]

एताः च ख्यातयः वाचस्पतिनाऽपि भामतीग्रन्थे सविस्तारेण विश्लेषिताः।

**आत्मख्यातिः-**

विज्ञानवादिनो बौद्धा बाह्यार्थस्य अविद्याविलासं मन्यमानाः बाह्यार्थवादिनो भवन्ति। आत्मख्यातिवादिभिः क्षणिकविज्ञानादतिरिक्तं कस्यापि वस्तुनः सत्ता नांगीक्रियते। नीलज्ञाने नीलज्ञानं विना नीलस्य उपलब्धिः न जायते। स्वतन्त्ररूपेण नीलस्य स अंगीकर्तुं न शक्यते। अतः विज्ञानवादे विज्ञानादतिरिक्तं बाह्यपदार्थस्य सत्ता अंगीकर्तुं न शक्यते।

**सहोपलम्भनियमादभेदो नीलस्तद्धियोः।**
**भेदश्च भ्रान्तिविज्ञानैर्दृश्येतेन्दाविवाद्वये॥**

वाचस्पति आत्मख्यातिमधिकृत्य एवं वदति। अन्यधर्मस्य = ज्ञानधर्मस्य रजतस्य, ज्ञानाकारस्य इति यावत्। अध्यासो अन्यत्र बाह्ये सौत्रान्तिकनये तावद् बाह्यमस्ति वस्तु सत्, तत्र ज्ञानाकारस्यारोपः। विज्ञानवादिनामपि यद्यपि न बाह्यवस्तु सत्, तथाप्यनाद्यविद्यावासनारोपितमलीकं बाह्यं तत्र ज्ञानकारस्यारोपः।[3] योगाचारबौद्धैः ज्ञानमात्रस्य सतता अंगीक्रियते।

रजतस्य विज्ञानाकारता नेदं रजतमिति बाधकप्रत्ययात् सिद्धयति इति चेत् किमयं बाधकप्रत्ययः पुरोवर्तिद्रव्यं रजतात् विवेचयति आहोस्वित् ज्ञानाकारतामपि अस्य दर्शनीयानि। प्रथमपक्षः सर्वैः अंगीकर्तव्यः, इदमपि रजतनिषेधस्य अनुभवसिद्धत्वात्। द्वितीये किं बाधकप्रत्ययः साक्षात्ज्ञानाकाराणां दर्शयति, अर्थाद्वा? नाद्यः। अनुभवविरोधात्। न च पुरोवर्तित्वप्रतिषेधात् अर्थात् अस्य ज्ञानाकारणतां विज्ञेया इति द्वितीयः ग्रहणीयः। रजतस्य सलिलहितत्वे निषेधे सति असन्निहिते देशान्तरे अपि स्याताम्, न तु आन्तरे इति निश्चितम् तदुक्तं भामत्याम्- असन्निधानाग्रहनिषेधात् असिद्धहितः भवति प्रतिपत्तुः, अत्यन्तसन्निधानं त्वस्य कुतस्त्यम् इति। ननु माभूत्

2. वे.सि. मु. पृ.158
3. भामती-1.1.1

अनुभवात् विज्ञानाकारता रजतस्य अनुमानात् नु भविष्यति इति योगाचारः। तथाहि सर्वेषां वस्तूनां ज्ञानाकारत्वे अनुमानं यस्य येन सह नियमसहोपलम्भनं ततो न भिद्यते। यथैकस्मात् चन्द्रमसौ द्वितीयश्च चन्द्रमाः इति। भ्रान्तिज्ञाने भासमानं चन्द्रद्वयं यथा परस्परं न भिद्यते तथा यत्र यत्र सहोपलम्भनियमः तत्र तत्र अभिहत्वम् इति बौद्धव्यम्। तस्मात् नीलताविज्ञाने अपि परस्परं न भिद्यते। तयोः नियतसहोपलम्भत्वात् इति स्थितिः। तदुक्तं– धर्मकीर्तिना– सहोपलम्भनियमादभेदो नीलताद्धियोः। एवं सर्वेषां वस्तूनां ज्ञानाकारत्वात् तत्सामान्यात् रजतस्यापि ज्ञानाकारत्वं सिद्धम्।

तत्र– सर्वेषां वस्तूनां ज्ञानाकारत्वम् असिद्धम्। तथाहि– यत्र भ्रान्ति चन्द्रद्वयं द्वयोरपि विज्ञेयत्वं तत्रेदं भवतु नाम। नोल्लतद्धिज्ञानयोः शुक्तिरजतमविज्ञानयोश्च विज्ञानविज्ञेययोः तु इदं कुतस्त्यम्? तथाहि उक्तानुमाने द्वयोर्विज्ञेयत्वस्य उपाधेः सत्त्वात् नेदम् अनुमानम् उपपद्यते।

तथा च सर्वथा घटादीनाम् अपि ज्ञानाकारतायाः असम्भवाद् अयं घटः इत्यादौ इव शुक्तिः रजतस्यापि ज्ञानाकारता इति वादः न युक्तः। तस्मात् अनुभवेन अनुमानेन वा बाह्ये आन्तरस्य ज्ञानस्य आरोपः अध्यासः इति नोपपद्यते।

एवं माध्यमिकानाम् असत्ख्यातिवाद अपि निरस्तः असद्रूपत्वे भावसम्भवात्, अन्यथा शशश्रृंगादिः अपि भानापत्तेः। स्वतःप्रामाण्यवादे, परतःप्रामाण्यवादे परतश्च प्रामाण्यसिद्धसरप्रमाणप्रमेयाभेदेन पदार्थः विभागः अपि उपपन्नः इति तदुपपत्या अपि न सर्वस्य असद्रूपत्वम्। नहि असतः पदार्थस्य सत्ताज्ञानेन सम्बन्धः भवति।

**असत्ख्यातिः–**

शून्यवादिबौद्धानां मते समस्तं पदार्थजातं शून्यमेव। असद्रूपसंवादे शुक्तिरजतादिभ्रमस्थले असतः प्रतीति अर्थात् असदधिष्ठाने शुक्तिकादौ असद्रूपरजतादेः भानं भवति। इति अत्र असत्ख्यातिः कथं संभवति? इति वाचस्पतिः तर्कयति। शुक्तिरजतादिस्थले विषयस्तु असदेव। असत् न कदापि प्रकाशते इति वाचस्पतेः मतम्।

रजतवद् शुक्ति अपि असद्रूपेण अंगीक्रियते चेत् शुक्तिः रजतस्य अधिष्ठानं कथं भवितुं शक्नोति? भ्रमज्ञानाय अधिष्ठानम् आवश्यकमेव। अथ बौद्धानां कथनमेतदस्ति यत् शून्यं प्रथमतः शुक्तिरूपेण विद्यते। पुनश्च शुक्तिः रजतरूपेण भासते। एवं शुक्तिरजतौ उभावेव शून्यरूपा असत्। अतः भ्रमे रजतस्य वास्तविकसत्ता नास्त्येव। रजतं सद्रूपेण वर्तते चेत्, तस्य बाधो न सम्भवेत्। असद्रूपेण वर्त्तते चेत् अस्य भानं न स्यात् अतः शून्यवादिबौद्धानां मतं न समीचीनम् इति भामतीकाराणामभिप्रायः पंच-पादिकाकारः अपि एवं कथयति यत् निरधिष्ठानो भ्रमः न दृष्टपूर्वः न च सम्भवः।[4]

**अख्यातिः-**

आत्मख्यातिपक्षं अख्यातिवादिना प्रभाकरेण आचार्यवाचस्पतिमिश्रः विशदयति। न्यायवार्तिकतात्पर्यटीकायां अख्यातिवादो येन शस्त्रेण अन्यथाख्यातिं प्रति प्रहारो विहितः तेनैव शस्त्रेण अत्रापि प्रहारं कुर्वन् उक्तं च रजतस्य विज्ञानाकारता न तु रजतानुभवेन साधयितुं शक्यते न च बाधकज्ञानेनैव।

रजतानुभवेन रजतस्य विज्ञानाकारता अत एव न सिद्धयति। यतो हि इदं रजतमित्याकारकरजतानुभवः इदंकारास्पदां साधयति न तु ज्ञानाकारताम्। ज्ञानाकारतायाः ज्ञानं तु अहं रजतं इति अनुभवकारो भवेत् नेदं रजतमिति बाधकज्ञानं रजतज्ञानाकारता भवति। यतो हि नेदं रजतं इति बाधकज्ञानं पुरोवर्तिनं वस्तु रजतात् भिन्नं साधयति न तु तदीयां ज्ञानाकारतां साधयति। अनेन प्रकारेण आत्मख्यातिवादी वैनाशिकः विनष्टः संतिष्ठति तस्मिन् स्थाने अख्यातिवादी स्वकीयं मन्तव्यम् उपस्थापयति।

अख्यातिवादी प्रभाकरानुसारं किमपि ज्ञानं मिथ्या नास्ति। ज्ञानस्य मिथ्यात्वे स्वीक्रियमाणे मानवानां सर्वाणि ज्ञानानि अनास्थिकानि स्युः। दोषवशात् अपि शुक्तिज्ञाने रजतस्य प्रतीतिः नानुपपन्नः। यतो हि इन्द्रियाणि समीचीनं ज्ञानं उत्पादयन्ति। दोषसहितानि इन्द्रियाणि मिथ्याज्ञानम् उत्पादयन्ति इति स्वीकरणमपि संगतं न भवति।

---

4. पं.पा. पृ. 63

कस्यापि ज्ञानस्य मिथ्यात्वाभावेन इदं रजतम् इत्यादि स्थले मिथ्याज्ञानम् अनंगीकृत्य भिन्नं भिन्नं समीचीनज्ञानद्वयं अख्यातिवादी अंगीकरोति। (1) इदमाकारम् अनुभवज्ञानम्। (2) रजतम् इत्याकारकं स्मृतिज्ञानम्। इदमाकारक-मनुभवज्ञानं सम्मुखनिहितशक्त्या चक्षुषु सम्बन्धे सति जायते। किन्तु दोषकारणां तस्याः शुक्तेः शुक्तित्वेन रूपेण ज्ञानम् अभूत्वा सामान्यरूपेण इदंतया ज्ञानं जायते। शुक्तौ रजते च चाकचिक्यादिधर्माणां समानकारणात् शुक्त्यवलोकनेनैव सादृश्यज्ञानेन रजतस्य संस्कारः उद्‌बुद्धः सन् रजतं स्यापयति।

इत्थं च रजतस्य स्मृतिरन्यं ज्ञानं भवति। किन्तु अत्रापि दोषवशात् तत्तमांशस्य स्मरणम् अभूत्वा केवलं स्मरणस्य ज्ञानं जायते। इत्थं च इदं तथा रजतं एतद्वयमपि भिन्नं भिन्नं ज्ञानं वर्तते। एकम् अनुभवात्मकं द्वितीयं स्मरणात्मकं ज्ञानं च। प्रथमस्य विषयः इदंतया ज्ञाता शुक्तिः, द्वितीयस्य विषयः तत्तमांशयिनं रजतम्। किन्तु पुरोवर्तिनि शुक्तौ इदं रजतम् इति ज्ञानस्य समानमिव एते द्वे ज्ञाने भवतः। अतः सारूप्यकारणात् एतत्ज्ञानद्वयं भेदव्यवहारं सामानाधिकरण्ये व्यपदेशं च उत्पादयति। अर्थात् स्वरूपतो विषयश्च भिन्नेषु भिन्नेषु एतेषु ज्ञानेषु वर्तमानग्रहणस्य भेदाभावेन अत्र एतत् व्यवहारः उपपद्यते।

अस्मिन् भेदव्यवहारे एव भ्रमव्यवहारोऽपि जायते। नेदं रजतमिति बाधकज्ञानमपि तस्य व्यवहारस्यैव बाधः करोति। न च अन्यस्य वस्तुनः। एतदेव भगवान् आदिशंकराचार्येण 'यत्र यदध्यासः तद्विवेकाग्रहनिबन्धनो भ्रमः' इति उक्तम्।

**अन्यथाख्यातिः-**

प्रभाकरस्य अख्यातिवादोऽपि भ्रमज्ञानस्य समाधानं कर्तुं न शक्यते। यतो हि चेतनप्रवृत्तिः अज्ञानपूर्विका न भवति अपितु ज्ञानपूर्विकैव जायते। प्रभाकराः उभयो ज्ञानयोः भेदाग्रहं रजतार्थिनः प्रवृत्तौ कारणम् आम्नाति। अतः एतदंगीकर्तव्यं भविष्यति यत् पूर्ववर्तिनो शुक्तौ रजतार्थिनः प्रवृत्तिः रजतस्य आरोपितुं ज्ञानं विना नोपपद्यते। यतो हि तदीया प्रवृत्तिः इदंकारास्पदाभिमुखो वर्तते। इदंकारास्पदं च वस्तु रजतं नास्ति। यतः

तस्मिन् आरोपितं रजतज्ञानं यावत्पर्यन्तं न भवेत् तावत्पर्यन्तं रजतार्थिनः प्रवृत्तिः न भवति।

एतस्याः समाधानं कर्तुं नैयायिकाः भ्रमस्थले अन्यथाख्यातिं प्रस्तूतवन्तः। तदनुसारं पुरोवर्तिनि शुक्तिवस्तुनि इन्द्रियसन्निकर्षसत्वे दोषवशात् शुक्तित्वधर्मस्य ज्ञानम् अभूत्वा रजत्वधर्मस्य ज्ञानं जायते। इत्थं च शुक्तेः शुक्तित्वरूपेण प्रतीतिः अभूत्वा शुक्तिभिन्नरजतत्वस्य धर्मपूर्विकाः प्रतीतिः जायते। इयम् अन्यथाख्यातिर्भवति। अन्यथाख्यातिवादशब्दस्यार्थः कस्यापि वस्तुनः अन्यरूपेण प्रतीतिः। अन्यरूपशब्दे रूपशब्दार्थः धर्मोस्ति। अतः अन्यरूपेण अर्थात् अन्यधर्मेण प्रतीयते। एतदेव नैयायिकाः तदभाववती तत्प्रकारकं ज्ञानं अप्रमा इति रूपेण कथयन्ति। अर्थात् रजतत्वाभाववता शुक्तौ रजतत्वप्रकारकं ज्ञानं भ्रमात्मकं भवति। इत्थम् अंगीक्रियमाणे पूर्ववर्ति वस्तुनि रजतत्वज्ञाने जाते रजतार्थिनः प्रवृत्तिरपि जायते। रजतत्वधर्मस्य आरोपेण धर्मिणोः आरोपो नांगीकर्तव्यः। अयं लाघवते अपि भवति। नेदं रजतमिति बाधकज्ञानमपि पुरोवर्तिनः रजतत्वधर्मस्येव बाधः करोति नतु रजतस्य। यतो हि तत्र रजतस्य सत्तैव नास्ति।

भामतीग्रन्थे श्रीमान् वाचस्पतिमिश्रमहोदयः अन्यथाख्यातिमतस्य आलोचनां विशेषरूपेण न विहितः किन्तु असत्ख्यातिं निराकुर्वन् अनिर्वचनीय-ख्यातेः स्थापनां कृतवान्। अतः अन्यथाख्यातिः आलोचना अनावश्यको इतिज्ञात्वा परित्यक्ता। किन्तु केचन जनाः अवश्यं सन्दिह्यमाना आसन् यत्. वाचस्पतिमिश्रस्य अन्यथाख्यातिवादः अभीष्टः वर्तते।

**अनिर्वचनीयख्यातिः-**

अद्वैतवेदान्तिनः अनिर्वनीयख्यातिः स्वीकुर्वन्ति। तेषां मते 'इदं रजतम्' इत्यत्र शुक्तौ सामान्येन 'इदम्' इति ज्ञानोदयानन्तरं चाकचिक्यादि-सादृश्यात् यस्मिन् चैतन्ये शुक्तिः अधिष्ठिता तस्मिन् चैतन्ये आश्रितायाः अविद्यायाः तमोभागात् अनिर्वनीयं रजतं तत्कालमेव उत्पद्यते।

शुक्तौ इदम् रूपेण भासमानत्वात् आकाशकुसुमवत् अलीकम्, किन्तु शुक्तिकाज्ञानोदये तत् बाधितं भवतीति न तस्य सत्त्वम्। सदसतोश्च

परस्परविरोधात् तस्य रजतस्य न सदसत्त्वं, न तु सदसद्भिन्नत्वम्। एवं च शुक्तौ भासमानस्य रजतस्य चतुष्कोटिविनिर्मुक्तत्वात् अनिर्वचनीयत्वम्। अनिर्वचनीयत्वं नाम सदसद्भिन्नत्वम्। अस्य 'मिथ्यात्वम्' इति पर्यायपदमपि युक्तम्।

भाष्यकारः शंकराचार्यः ख्यातिमाश्रित्य जगतः मिथ्यात्वं निरूपयति।

आचार्यः वाचस्पतिमिश्रः अध्यासस्य सन्दर्भे पञ्चख्यातयः समग्ररूपेण प्रतिपादयित्वा अनिर्वचनीख्यातिं स्वीकृत्य अन्यानां ख्यातीनां खण्डनं करोति। अन्यथाख्यातिविषये वाचस्पतेः मतम् अमलानन्दः एवं प्रतिपादयति

**स्वरूपेण मरीच्यम्भो मृषा वाचस्पतेर्मतम्।**
**अन्यथाख्यातिरिष्टास्येत्यन्यथा जगृहुर्जनाः॥**[5]

केचित् व्याख्याकाराः वाचस्पतिः अन्यथाख्यात्याः समर्थकः आसीदिति कथयन्ति। तद्यथा– 'तेन सर्वेषामेव परीक्षकाणां मतेऽन्यस्यान्यधर्मकल्पना अनिर्वचनीयताऽवश्यंभाविनोत्यनिर्वचनीयता सर्वतन्त्राविरुद्धोऽर्थः इत्यर्थः।[6] शून्यवादो बौद्धाः शून्यस्यानिर्वचनीयत्वं कल्पयन्ति। यद्यपि बौद्धानाम् अनिवर्चनीयत्वं येनापि प्रकारेण निर्वचनं कर्तुं न शक्यते। किन्तु अद्वैतिनां अनिर्वचनीयत्वं सदसद्विलक्षणत्वेन वक्तुं शक्यन्ते। वाचस्पतिना भामत्याः मंगलश्लोके 'अनिर्वाच्यविधाद्वितयसचिवस्य' इत्यादि पंक्त्या अविद्या एव अनिर्वाच्यः इत्युक्तम्। अतः वेदान्ताभिमतख्यातिः अनिर्वचनीख्यातिः इत्युच्यते।

विवरणकारस्य प्रकाशात्मयतेः मते भ्रमस्थले प्रतीयमानं रजतं मिथ्याः तथा अविद्योत्पादकं न भवति। इदं शुक्तिरिति ज्ञानोदयपर्यन्तं मिथ्यारजतमेव शुक्तौ भासते। अतः एतत् स्पष्टयति यत् प्रातिभासिकरजतस्य उपादानकारणं तु अविद्या एव। अतः तं मायामयः इत्युच्यते। एवं ख्यातिसम्बन्धविषये भामतीकारः तथा विवरणकारः अनिर्वचनीयख्यातिं समर्थयतः।

ब्रह्मसूत्रशांकरभाष्ये शंकराचार्यः कथयति यत्– "सर्वथापि त्वन्य-स्यान्यधर्मावभासतां न व्यभिचरति" इति। अस्यार्थः अयमस्ति यत् अन्यस्य

---

5. कल्पतरु, पृ.24
6. भामती, पृ.34

अन्यधर्मावभासता अनृतता सा च अनिर्वचनीया। सर्वतन्त्रसिद्धान्तः इति। अर्थात् अन्ये अन्यधर्मस्य प्रतीतिः असत् भवति इति सर्वसम्मतमेव। एवं अद्वैतमते सर्वेषां ख्यातीनां पर्यवसानम् अनिर्वचनीयख्यात्याम् एव भवति। अनिर्वचनीयताख्यातिवादः एव समीचीनः। तथाहि तेन सर्वेषामेव परीक्षकाणां मते अन्यस्यान्धर्मकल्पना अनिर्वचनीयताऽवश्यम्भाविनः अनिर्वचनीयता सर्वतन्त्रविरुद्धार्थः।

संक्षिप्तेनः इदं कथयितुं शक्यते यत् 'इदं रजतम्' इति स्थले यत् भ्रमज्ञानमुदेति तत्र मनः कल्पितस्य आन्तररजतस्य बहिरस्तित्वस्य बोधः भ्रमरूपः। अतः विज्ञानवादिनां मतानुसारम् एषः भ्रमः आत्मख्यातिरूपः भामतीपन्थिनस्य आत्मख्यातिवादं निरस्य एतादृशेषु स्थलेषु अनिर्वचनीय-ख्यातिवादम् एव उपपादयन्ति।

## सन्दर्भग्रन्थसूची


- अद्वैतसम्मतं वाक्यार्थज्ञानम् : डॉ. मुक्तारामबानर्जी : संस्कृतपुस्तक-भण्डार, विधानसरणि, कलकत्ता, 1983
- अद्वैतवेदान्त में तत्त्व और ज्ञान; ऊर्मिलाशर्मा, छन्दस्वतिप्रतिष्ठानम्, वाराणसी- 1978
- ब्रह्मसूत्रशांकरभाष्यम् (भामती-कल्पतरु-परिमलव्याख्योपेतम्); श्रीमदनन्तकृष्णशास्त्री; चौखम्बा सीरीज, वाराणसी, वि.सं. 2039
- ब्रह्मसूत्रशांकरभाष्यम् (हिन्दीव्याख्यासहितभामतीसंवलितम्), स्वामी योगीन्द्रानन्दनिर्मिता, भामतीव्याख्या, षड्दर्शनप्रतिष्ठानम्, वाराणसी, 1972
- भामती एक अध्ययन, डॉ. ईश्वरसिंह, मथन पब्लिकेशन्स रोहतक, 1933
- श्रीशंकरात्प्रागद्वैतवादः, डॉ. मुरलीधरपाण्डेयः, मोतिलाल बनारसीदास, दिल्ली, 1971

- वेदान्तसिद्धान्तमुक्तावली, (भाषानुवादसहिता) प्रकाशानन्दः, अच्युत-ग्रन्थमाला, काशी, सं. 1993
- शांकरवेदान्ते ज्ञानमीमांसा, डॉ. कालिप्रसादसिंहः, विश्वविद्यालय-संस्थानम्, वाराणसी, 1982
- पंचपदिका (टीकाद्वयोपेता) पद्मपादः, मद्रास् गवर्नमेण्ट ओरि.सी. भारतीविजयम्, प्रेस् मद्रास, 1958
- पंचपादिकाविवरणम्, प्रकाशात्मयतिः, ई.जे. लाजरस् कम्पनी, काशी, 1891


❑❑❑

# जैनदर्शने स्याद्वादः

**-पारसजैनः** *

जैनदर्शनस्य चतुःस्तम्भेषु एकः स्तम्भः स्याद्वाद् अस्ति। जैनदर्शने वचनव्यवहारः स्याद्वाद्शैल्यां जायते। जैनदर्शने स्विकृतवस्तुस्वभावस्य यत् अनेकान्तत्वम् जायते, तस्य कथनं स्याद्वाद्माध्यमेन भवितुम् अर्हति। वस्तुनि अनेकानि विपरीतानि धर्माणि वर्तन्ते, तेभ्यः विपरीतेभ्यः धर्मेभ्यो यत् मुख्यगौणपूर्वकं यत् कथनं जायते, तत् अपेक्षाकथनं स्याद्वाद् कथ्यते। स्याद्वाद् अपेक्षापूर्वककथनं कथयति।

कथयति आचार्यः नयचक्रे यत्-

**णियमणिसेहणसीलो णिपादणादो य जोहु खलु सिद्धो।**
**सो सियसद्दो भणियो जो सावेक्खं पसाहेदि॥**[1]

अर्थात्, यत् नियमस्य निषेधकर्ता अस्ति, निपातात् यस्य सिद्धिः भवति, यत् सापेक्षतायाः सिद्धिकर्ता अस्ति, तत् स्यात् शब्दः कथयति।

जैनदर्शने प्रत्येकानि वचनानि कथनानि व सापेक्षतायाः हि कथ्यते, किमपि वचनानि कथनानि व सर्वथानियमात् न उच्यते।

कथयति यत् स्वयम्भुस्तोत्रे-

**"सर्वथा नियमत्यागी यथादृष्टमपेक्षकः।**
**स्याच्छब्दस्तावके न्याये नान्येषामात्मविद्विषाम्॥**

**अनेकान्तोप्यनेकान्तः प्रमाणनयसाधनः।**
**अनेकान्तः प्रमाणात्ते तदेकान्तो-अर्पित्तानयात्॥**[2]

---

* शोधच्छात्रः, जैनदर्शनविभागः, श्रीलालबहादुरशास्त्रीराष्ट्रीयसंस्कृतविश्वविद्यालयः नवदेहली।

1. नयचक्रः बृहद् 251
2. आचार्यः समन्तभद्रः, स्वयम्भूस्तोत्रम्, श्लोकः 102-103

अर्थात्, सर्वथारूपेण सत् एव, असत् एव इत्यादिरूपात् प्रतिपादनस्य नियमस्य त्यागी यथादृष्टवस्तुप्रमाणप्रतिपन्नः शब्दः स्यात् इति जिनमते। स्यात् शब्दः केवलं जिनमते वर्तते अन्यत्र कोपि नास्ति। जिनमते अनेकान्तोऽपि प्रमाणनयाभ्यां स्वरूपात् अनेकान्तः। प्रमाणेन अनेकान्तस्वरूपम् दृष्टिगतं भवति, विवक्षितनयात् च अनेकान्ते एकान्तस्वरूपम् दृष्टिगतं भवति।

समयसारे तात्पर्यवृत्तिटीकायाम् अपि कथयति यत्,

**"स्यात्कथञ्चित् विवक्षितप्रकारेणानेकान्तरूपेण वदनं वादो जल्पः कथनं प्रतिपादनमिति स्याद्वादः।"**[3]

अर्थात्, स्यात् कथञ्चित् विवक्षितप्रकारेण अनेकान्तरूपेण वा कस्य वचनस्य वदनं, वादः, जल्पः, कथनं, प्रतिपादनमिति स्याद्वादः कथयति।

स्वयम्भूस्तोत्रस्य टीकायां अपि स्याद्वादस्य परिभाषा कथयति यत्–

**"उत्पाद्येत उत्पाद्यते येनासौ वादः, स्यादिति वादो वाचकः शब्दो यस्यानेकान्तवादस्यादौ स्याद्वादः।"**[4]

'उत्पाद्यते 'अर्थात् येन माध्यमेन प्रतिपादनं भवति सः वादः कथयति। स्याद्वादस्य अर्थः अर्थात् सः वादः यस्य वाचकः शब्दः 'स्यात्' भवति अर्थात् अनेकान्त्वादः अस्ति।

स्याद्वादे विवक्षायाः सुष्ठु प्रयोगः एव स्याद्वादस्य सत्यता अस्ति।

स्याद्वादस्य किं प्रामाण्यं भवति? अतः कथयति न्यायविनिश्चयग्रन्थे यत्–

**स्याद्वादः श्रवणज्ञानहेतुत्वाच्चक्षुरादिवत्।**
**प्रमा प्रमितिहेतुत्वात्प्रामाण्यम् उपगम्यते।।**[5]

अर्थात्, शब्दस्य श्रवणकार्यं वाच्यपदार्थस्य ज्ञानम् अस्ति, तस्य कारणेव हि स्याद्वादस्य स्थितिः अस्ति। तस्मात् भग्वत्प्रवचनरूपशाब्दिकस्याद्वादः

---

3. आचार्यः जयसेनः, समयसारः, तात्पर्ययवृत्तिटीका, स्याद्वादाधिकारः
4. स्वयम्भूस्तोत्रस्य टीका, श्लोकः 134/264
5. वादिराजसूरिः, न्यायविनिश्चय, श्लोकः 3/89/364

उपचारात् प्रमाणम् अस्ति परन्तु तज्जनितः ज्ञानरूपस्याद्वादः चक्ष्वादिज्ञानवतत्वात् निश्चयात् प्रमाणम् अस्ति, यतो हि तस्य हेतुः प्रमायाः प्रमितिः अस्ति।

जैनदर्शने वस्तु तु सापेक्षत्वरूपेण स्विकृतं क्रियते। तत् सापेक्षवस्तुकथनं स्याद्वादमाध्यमेन क्रियते, यतो सापेक्षकथनं स्याद्वादमाध्यमेन हि निरूप्यते।

आचार्यः नयचक्रे अपेक्षानिर्देशं कथयति यत्-

**अवरोप्परसावेक्खं णयविसयं अह पमाण विषयं वा।**
**तं सावेक्खं तत्तं णिर्वेक्खंताण विवरीयं।**[6]

अर्थात्, प्रमाणनयाभ्यां विषयः परस्परापेक्षा क्रियते। एकस्य नयस्य विषयः परनयस्य विषयस्य अपेक्षा क्रियते, एतत् हि सापेक्षतत्वं अस्ति। निरपेक्षतत्वं सापेक्षतत्वात् विपरीतं भवति।

स्याद्वादे विवक्षा एकस्मिन्नेव अंशे प्रयुक्तं भवति, अनेकेषु नास्ति। वस्तुनः प्रत्येकान्शः भिन्ना भिन्नविवक्षां स्विक्रियते। यथा कथ्यते पञ्चाध्यायीग्रन्थे-

**नहि किञ्चिद्विधिरूपं किञ्चित्तच्छेषतो निषेधांशम्।**
**आस्तां साधनमस्मिन्नामद्वैतम् न निर्विशेषत्वात।।**[7]

राजवार्तिकग्रन्थे आचार्यः विवक्षायाः प्रयोगविधिं कथयते यत्-

**"स्पर्शनादीनां करणसाधनत्वं पारतन्त्र्यात् कर्तृसाधनत्वं च स्वातन्त्र्याद् बहुलवचनात्। ...कुतः पारतन्त्र्यात्। इन्द्रियाणां हि लोके पारतन्त्र्येण विवक्षा विद्यते, आत्मनः स्वातन्त्र्यविवक्षायां यथा 'अनेन चक्षुषा सुष्ठु पश्यामि, अनेन कर्णेन सुष्ठु शृणोमि' इति। ...कर्तृ साधनं च भवति स्वातन्त्र्यविवक्षायाम्। ...यथा इदं मेक्षि सुष्ठु पश्यति, अयं मे कर्णः सुष्ठु शृणोति।"**[8]

---

6. नयचक्रः बृहद् गाथा 250
7. पाण्डेराजमलः, पञ्चाध्यायी, पूर्वार्धः, 300
8. आचार्यः अकलङ्कः, तत्वार्थराजवार्तिकः, 2/19/1/131/8

अर्थात्, स्पर्शनेद्रियानां परतन्त्रविवक्षायाः करणसाधनत्वं स्वतन्त्र-विवक्षायाः च कर्तृसाधनत्वं निष्पन्नं जायते। कथम्? उक्तं तु, इन्द्रियाणां लोकपरतन्त्रतायाः विवक्षा जायते स्वस्मिन् च स्वतन्त्रतायाः विवक्षा जायते यथा 'अनेन चक्षुषाऽहं सुष्ठु पश्यामि अनेन कारणेन च अहं सुष्ठु शृणोमि।' स्वतन्त्रविवक्षायां कर्तृसाधनत्वं अपि भवति। यथा इदं मम चक्षु सुष्ठु पश्यति, अयं मम कर्णः सुष्ठु शृणोति इति।

एतत् एव आचार्याः पञ्चास्तिकायग्रन्थे नयमाध्यमेन उवाच-

**"जैनमते पुनरनेकस्वभावम् वस्तु तेन कारणेन द्रव्यार्थिकनयेन द्रव्यरूपेण नित्यत्वं घटते पर्यायार्थिकनयेन पर्यायरूपेणानित्यत्वं च घटते। तौ च द्रव्यपर्यायौ परस्परं सापेक्षौ।"**[9]

जैनमते स्याद्वादे नयविवक्षायाः वस्तु अनेक स्वभावि वर्तते, तस्मात् द्रव्यार्थिकनयात् द्रव्यरूपेण नित्यत्वं घटेत, पर्यायार्थिकनयेन पर्यायरूपेण अनित्यत्वं घटेत। द्रव्यार्थिकः पर्यायार्थिकः च तौ नयौ परस्परं सापेक्षौ वर्तते। धर्मादिकद्रव्याणि व्यञ्जनपर्यायस्य अभावात् अपरिणामि नित्यं वा कथयति। परन्तु अर्थपर्यायस्य भावात् परिणामि कथ्यते।

विवक्षायाः अर्थात् स्याद्वादस्य भेदाः कथयन्ते अत्र[10]-

**1. स्यात् अस्ति स्यात् नास्ति-**

स्वरूपेण अस्तित्वमस्ति, अनेकस्वभावाराधत्वात् इति। पररूपेण नास्तित्वम् अस्ति, संस्कारादिदोषरहितत्वात्।

**2. स्यान्नित्यत्वं स्यात् अनित्यत्वं-**

द्रव्यरूपेण नित्यम् इति, चिरकालस्थायित्वात् इति। पर्यायरूपेण अनित्यत्वं, निजहेतुभ्योऽनित्यस्वभावीकर्मस्य ग्रहणत्यागत्वात्।

**3. स्यात् एकत्वं स्यात् अनेकत्वं-**

सामान्यरूपेण एकत्वं, सामान्यत्वे समर्थत्वात्। विशेषरूपेण अनेक-स्वभावदर्शकत्वात्।

---

9. आचार्यः जयसेनः, पञ्चास्तिकायः, तात्पर्ययवृत्तिटीका, 18/38/17
10. नयचक्रः गद्यश्रुतः; पृष्ठ 65-67

**4. स्याद्भेदत्वं स्यात् अभेदत्वम्-**

सद्भूतव्यवहाररूपेण भेदत्वं, व्यवहारस्य सिद्धित्वात्। निश्चयरूपेण अभेदत्वं, परमार्थस्य सिद्धित्वात्।

**5. स्यात् भव्यत्वं स्यात् अभव्यत्वं-**

स्वकीयरूपेण भवनादि कुर्यात् भव्यत्वं, स्वपर्यायस्य परिणामित्वात्। पररूपेणैव कुर्यात् अभव्यत्वं, परपर्यायत्यागित्वात्।

**6. स्यात् चेतनः स्यात् अचेतनः-**

चेतनस्वभावप्रधानत्वेन चेतनः, कर्मणां हानित्वात्। व्यवहारेणैव अचेतनः, कर्मणां ग्रहणत्वात्।

**7. स्यात् मूर्तः स्यात् अमूर्तः-**

असद्भूतव्यवहाररूपेण मूर्तः, कर्मबन्धनत्वात्। परमभावनिश्चयनयेन अमूर्तः, स्वभावे अपरित्यागत्वात्।

**8. स्यात् परम स्यात् अपरम-**

पारिणामिकस्वभावत्वेन परम, स्वभावे अचलवृत्तित्वात्। विभाव-कर्मजरूपेण अपरम, स्वभावे विकृतित्वात्।

**9. स्यात् एकप्रदेशत्वम् स्यात् अनेकप्रदेशत्वं-**

भेदकल्पना निर्पेक्षत्वेन एकप्रदेशत्वं, निश्चयात् एकत्वात्। व्यवहार-रूपेण अनेकप्रदेशत्वं, अनेककार्यकारित्वात्।

**10. स्यात् शुद्धत्वं स्यात् अशुद्धत्वम्-**

केवलस्वभावप्रधानत्वेन शुद्धत्वं, स्वभावप्राप्तित्वात्। मिश्रभावेन अशुद्धत्वं, तत् विपरीतत्वात्।

**11. स्यात् उपचरितत्वं स्यात् अनुपचरितत्वं-**

स्वभावस्य अपि अन्योत्रोपचारेन उपचरितत्वं, परभावज्ञेयत्वात्। निश्चयनयेन अनुपचरितत्वं, तत् विपरीतत्वात्।

राजवार्तिकग्रन्थे अपि कथयते आचार्यः स्याद्वादस्य प्रभेदान् सप्तभङ्गिरूपेण। तेषां लक्षणम् कथयति अत्र–

**"एकस्मिन् वस्तुनि प्रश्नवशाद् दृष्टेनेष्टेन च प्रमाणेनाविरुद्धा विधिप्रतिषेधविकल्पना सप्तभङ्गी विज्ञेया।"**[11]

अर्थात्, प्रश्नानुसारेण एकस्मिन् वस्तुनि प्रमाणात् अविरुद्धानां विधिप्रतिषेधानां धर्माणां कल्पना सप्तभङ्गी अस्ति।

पञ्चास्तिकायग्रन्थे अपि कथयति यत्–

**"पर उद्धृतएकस्मिन्नविरोधेन प्रमाणनयवाक्यतः। सदादिकल्पना या च सप्तभङ्गी इति सा मता।"**[12]

अर्थात्, प्रमाणवाक्यात् नयवाक्यात् वा एकस्मिन् एव वस्तुनि अविरोधरूपेण यत् सत्–असतादिधर्माणां कल्पना सा सप्तभङ्गी इति उच्यते।

अभिनवधर्मभूषणयतिः न्यायदीपिकायां अपि कथयति–

**"सप्तानां भङ्गानां समाहारः सप्तभङ्गी इति।"**[13]

सप्तभङ्गीतरङ्गिणीग्रन्थे अपि कथयति यत्–

**"प्राश्निकप्रश्नज्ञानप्रयोज्यत्वे सति, एकवस्तुविशेष्यकाविरुद्ध-विधिप्रतिषेधात्मकधर्मप्रकारकबोधजनकसप्तवाक्यपर्याप्तसमुदा-यत्वम्।"**[14]

अर्थात्, या प्रश्नकर्तुः प्रश्नज्ञानस्य प्रयोज्यत्वम् भूत्वा, एकस्मिन् पदार्थे अविरुद्धविधिप्रतिषेधानां नानाधर्माणां बोधजनकत्वम् सप्तवाक्यपर्याप्ता समुदायता सप्तभङ्गी इति।

अत्र पञ्चास्तिकायग्रन्थे सप्तभङ्गीनां भेदाः कथयन्ति यत्–

---

11. आचार्यः अकलङ्कः, तत्वार्थराजवार्तिकं, 1/6/5/33/15
12. आचार्यः जयसेनः, पञ्चास्तिकायः, तात्पर्ययवृत्तिटीका, 14/30/15
13. अभिनवधर्मभूषणयतिः, न्यायदीपिका, तृतीयप्रकाशः
14. पण्डितविमलदासः, सप्तभङ्गीतरङ्गिणी, 3/1

**सिय अत्थि णत्थि उहय अव्वत्तव्वं पुणो य तत्तिदयं।**
**दव्वं खु सत्तभङ्गं आदेशवसेण संभवदि।**[15]

अर्थात्, आदेशानुसरेण द्रव्यं निश्चयतः स्यात् अस्ति, स्यात् नास्ति, स्यात् अस्ति नास्ति, स्यात् अवक्तव्यम्, स्यात् अस्ति अवक्तव्यं, स्यात् नास्ति अवक्तव्यं, स्यात् अस्तिनास्ति अवक्तव्यं च इति सप्तभङ्गी।

प्रमाणनयविवक्षायाः अपि सप्तभङ्गीनां भेदाः उच्यन्ते नयचक्रे यत्–

**सत्तैव हुन्ति भङ्गा पमाणणयदुणयभेदजुत्तावि।**[16]

अर्थात्, प्रमाणसप्तभङ्ग्यां नयसप्तभङ्ग्यां दुर्नयसप्तभङ्ग्यां च सर्वत्र भङ्गाः सप्त एव भवति, सप्त प्रश्नभूतत्वात्।

सप्तभङ्गीतरङ्गिणीग्रन्थे सप्त भङ्ग्याः द्वि द्वौदौ कथयति–

**स च सप्तभङ्गी द्विविधाप्रमाण-**
**सप्तभङ्गी नयसप्तभङ्गी चेति।**[17]

अर्थात्, प्रमाणसप्तभङ्गी नयसप्तभङ्गी च इति सप्तभङ्ग्याः द्वौ भेदौ स्तः।

सप्तभङ्गीतरङ्गिणीग्रन्थे एव सप्तानां भङ्गानां कथनं कथ्यते अत्र–

"तत्र धर्मान्तराप्रतिषेधकत्वे सति विधिविषयकबोधजनकवाक्यं प्रथमो भङ्गः। स च स्याद् अस्ति एव घट इति वचनरूपः।

धर्मान्तराप्रतिषेधकत्वे सति प्रतिषेधविषयकबोधजनकवाक्यं द्वितीयो भङ्गः। स च स्याद् नास्ति एव घट इति आकारः।[18]

घटः स्यादस्ति च नास्ति चेति तृतीयः।

घटादिरूपैकधर्मिविशेष्यकक्रमार्पितविधिप्रतिषेधप्रकारकजनकवाक्यत्वं तल्लक्षणम्। क्रमार्पितस्वरूपपररूपाद्यपेक्षयास्तिनास्त्यात्मको घट इति

---

15. आचार्यः कुन्दकुन्दः, पञ्चास्तिकायः, गाथा 14
16. नयचक्रः बृहद् 252
17. पण्डितविमलदासः, सप्तभङ्गीतरङ्गिणी, 16/1
18. पण्डितविमलदासः, सप्त्भङ्गीतरङ्गिणी, 20/3

निरूपितप्रायम्। सहार्पितस्वरूपपररूपादिविवक्षायां स्यादवाच्यो घट इति चतुर्थः।

घटादिविशेष्यकावक्तव्यत्वप्रकारकबोधजनकवाक्यत्वं तल्लक्षणं।[19] व्यस्तं द्रव्यं समस्तौ सहार्पितौ द्रव्यपर्यायावाश्रित्य स्यादस्ति चावक्तव्य एव घट इति पञ्चमभङ्गः। घटादिरूपैकधर्मिविशेष्यकसत्वविशिष्टावक्तव्यत्व-प्रकारकबोधजनकवाक्यत्वं तल्लक्षणं।

तत्र द्रव्यार्पणादस्तित्वस्ययुगपद्द्रव्यपर्यायार्पणादवक्तव्यत्वस्य च विवक्षितत्वात्।[20] तथा व्यस्तं पर्यायं समस्तौ द्रव्यपर्यायौ चाश्रित्य स्यान्नास्ति चावक्तव्यो घट इति षष्ठः। तल्लक्षणं च घटादिरूपैकधर्मिविशेष्यकनास्तित्व-विशिष्टावक्तव्यत्वप्रकारकबोधजनकवाक्यत्वम्।

एवं व्यस्तौ कर्मापितौ समस्तौ सहार्पितौ च द्रव्यपर्यायावाश्रित्य स्यादस्ति नास्ति चावक्तव्य एव घट इति सप्तमभङ्गः। घटादिरूपैकवस्तु-विशेष्यकसत्त्वासत्त्वविशिष्टावक्तव्यत्वप्रकारकबोधजनकवाक्यत्वं तल्लक्षणम्।"[21]

एते साप्त भङ्गाः सन्ति, अथ कथयति यत् भङ्गाः सप्त एव भवन्ति न तु हीनाधिकं राजवार्तिकग्रन्थे-

**पर उद्धृत-पुच्छावसेण भङ्गा सत्तेव दु संभवदि जस्स जथा।**
**वत्थुत्ति तं पउच्चदि सामणणविसेसदो नियदं।**[22]

अर्थात्, प्रश्नानुसारेण एव भङ्गाः सन्ति। यतो हि वस्तु सामान्यविशेषेभ्यो धर्मेभ्योः युक्तं भवति। प्रश्नं सप्तरूपेण प्रयुक्तं भवति तर्हि तस्य उत्तरस्वरूपेण वचनं सप्तरूपेण युक्तं एव। वस्तुनि च एके पर्याये कथित्वा अन्यानां प्रतिषेधानाम् अवक्तव्यपर्यायानाम् आक्षेपनं सिद्धयति।

---

19. तदेव, 60/1
20. तदेव, 71/7
21. तदेव, 72/1
22. आचार्यः अकलङ्कः, राजवार्तिकः, 4/42/15/253/7

स्याद्वादः अनेकान्तात्मकवस्तुनः प्रतिपादकः अस्ति। अनेकान्तस्य स्याद्वादस्य च विषये रामधारीसिहंः अपि कथयते यत् "नास्त्यत्र कश्चिद् संदेहः यत् अनेकान्तस्यानुसंधानं भारतस्य अहिंसा साधनस्य चर्मोत्कर्ष विद्यते। तथा समस्तसंसारः यथाशीघ्रं स्वीकरिष्यति चेत् विश्वे शान्तिरपि तथा शीघ्रं स्थापिताभविष्यति।"

## सहायकग्रन्थसूची

1. अकलङ्काचार्यः, *तत्त्वार्थराजवार्तिकम्* (तत्त्वार्थसूत्रस्य वार्तिकम्), महेन्द्रकुमारन्यायाचार्यः (सं), भारतीयज्ञानपीठम्, दिल्ली, 1982।
2. अभिनव-धर्मभूषणयतिः, *न्यायदीपिका*, दरबारीलाल कोठीया (सं.), वीर-सेवा-मन्दिरम्, सहारनपुरम्, 1945।
3. उमास्वामी-आचार्यः, *तत्त्वार्थसूत्रम्*, (सर्वार्थसिद्धि-वृत्ति-समन्वितम्), सिद्धान्ताचार्यः फूलचन्दः (सं), भारतीयज्ञानपीठम्, दिल्ली, 2013।
4. कुन्दकुन्दाचार्यः, *पञ्चास्तिकायः* (समयव्याख्या-तात्पर्यवृति-व्याख्या-द्वयसमन्वितम्), अमृतचन्द्राचार्यः (व्या.)- जयसेनाचार्यः (व्या.) (क्रमानुरूपम्), मनोहरलालः (सं), पन्नालाल-बाकलीवालः (अनु.), श्री-परमश्रुत-प्रभावक-मण्डल-श्रिमद्राजचन्द्रजैन-शास्त्रमाला, 1968।
5. कुन्दकुन्दाचार्यः, *समयसारः* (आत्मख्याति- तात्त्पर्यवृतिव्याख्याद्वय-समन्वितम्), अमृतचन्द्राचार्यः (व्या.)- जयसेनाचार्यः (व्या.) (क्रमानुरूपम्), हेमचन्दजैनः (सं), पारस-मूलचन्द-चतर-चौरिटेबल-ट्रस्टः, कोटा, 2010।
6. मल्लिषेणाचार्यः, *स्याद्वादमञ्जरी*, जगदीशचन्द्रजैनः (अनु.), परम-श्रुत-प्रभावक-मण्डलम्, आगासः, 1970।
7. वादिदेवसूरिः, *स्याद्वादरत्नाकरः*, मोतीलाल-लाधा (सं), भारतीय-बुककारपोरेशनम्, दिल्ली, 1988।

---

23. रामधारीसिंहदिनकरः, (संस्कृति के चार अध्याय), पृ.137

8. वादिराजससूरिः *न्यायविनिश्चयविवरणम्*, महेन्द्रकुमारजैनः (सं), भारतीयज्ञानपीठम्, दिल्ली, 2000।

9. विद्यानन्दाचार्यः, *तत्त्वार्थश्लोकवार्तिकालङ्कारः* (तत्त्वार्थसूत्रस्य वार्त्तिकम्), माणिकचन्द-कौन्देय-न्यायाचार्यः (सं.), वर्धमान-पार्श्वनाथशास्त्री (प्र.), सोलापुरम्, 1951।

10. समन्तभद्राचार्यः, *आप्तमीमान्सा*, जुगलकिशोर-मुख्तारः (अनु.), वीरसेवामन्दिरप्रकाशनम्, दरियागन्जः, 1978।

11. वर्णी-जिनेन्द्रः, *जैनेन्द्र-सिद्धान्त-कोशः* (पञ्चभागाः), भारतीय-ज्ञानपीठम्, दिल्ली, 2010।

❑❑❑

# न्यायशास्त्रे वितण्डावादः

-**कमलाकान्तमिस्त्री** *

**"न हि ज्ञानेन सदृशं पवित्रमिह विद्यते"**[1] अर्थात् अस्मिन् विश्वे ज्ञानवत् पवित्रं किमपि वस्त्वन्तरं नास्ति। कारणं यथार्थेन सत्यज्ञानेन एव जीवानां परमपदस्य मुक्तेः प्राप्तिः सम्भवति। प्राप्यते च सुभाषिते- **"ज्ञानेन मुक्तिः न तु मुण्डनेन"** इति। मुक्त्यर्थं मोक्षार्थं वा प्रयत्नशीलाः मानवाः आप्राचीनकालात् पदार्थानां यथार्थतत्त्वबोधाय उत्सुकाः सन्ति। तदर्थं भारतीयगुरुशिष्यपरम्परया शास्त्रपरम्परया वा पक्षप्रतिपक्षरूपैः संवादैः मानवानां तत्त्वस्य बोधः जायते। अतः उच्यते-**"वादे वादे जायते तत्त्वबोधः"**[2] इति। अस्मात् तत्त्वबोधाद् भवति मुक्तिः। न्यायशास्त्रानुसारं मोक्षलाभाय निःश्रेयसलाभाय वा प्रमाणादिषोडशपदार्थानां यथार्थं ज्ञान-मत्यावश्यकमिति। उक्तञ्च भगवता गौतमेन न्यायसूत्रे- **"प्रमाण-प्रमेय-संशय-प्रयोजन-दृष्टान्त-सिद्धान्तावयव-तर्क-निर्णय-वाद-जल्प-वितण्डा-हेत्वाभासच्छल-जाति-निग्रहस्थानानां तत्त्वज्ञानान्निःश्रेय-साधिगमः"**[3] इति। सूत्रे उल्लिखितस्य द्वादशसंख्याकस्य वितण्डानामकस्य पदार्थस्य किं स्वरूपं विविधदार्शनिकमतानुसारं प्रबन्धेऽस्मिन् साधु उपस्थाप्यते।

वितण्डा अस्ति तिसृषु कथासु एका कथा। उक्तञ्च भाष्यकारेण- आचार्येण वात्स्यायनेन **"तिस्त्रः कथा भवन्ति वादो जल्पो वितण्डा**

---

* शोधच्छात्रः, न्यायविभागः, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः, नवदेहली- 110016

1. श्रीमद्भगवद्गीता 4/38
2. रम्भाशुकसंवादः
3. न्यायसूत्रम् 1/1/1

**चेति**"।[4] अर्थात् वादजल्पवितण्डाभेदेन कथा त्रिविधा। वितण्डायाः स्वरूपज्ञानार्थसम्यक्तया कथायाः स्वरूपं ज्ञातव्यम्। आचार्येण वाचस्पतिमिश्रेण उक्तं- **"नानाप्रवक्तृकविचारविषया वाक्यसन्दिग्धः कथेति सामान्य-लक्षणम्।"**[5] तार्किकरक्षाकारेण वरदराजेनापि कथायाः लक्षणं कृतम्- **"विचारविषयो नानावक्तृको वाक्यविस्तरः"**[6] इति।

अर्थाद् विचार्यविषये अनेकानां वक्तृणां यथानियमं कथितः वाक्यसमूहः एव कथा। एकस्यैव वक्तुः उत ग्रन्थकारस्य पूर्वपक्षोत्तरपक्षादिप्रतिपादकः तादृशः वाक्यसमूहः कथा न भवति। वस्तुतः तत्त्वनिर्णयार्थं जयलाभार्थं वा वादिप्रतिवादिनोः कथा भवति। एतयोः द्वयोः कस्यापि एकस्य उद्देश्यस्य स्वरूपयोग्याभावे कथा न भवति। अतः वृत्तिकारेण विश्वनाथेन उक्तम्-

**"तत्त्वनिर्णय-विजयान्यतर-स्वरूपयोग्या न्यायानुगतवचन-सन्दर्भः कथा"**[7] इति।

सूत्रकारेण महर्षिणा गौतमेन वितण्डायाः लक्षणं कृतम्- **"स प्रतिपक्षस्थापनाहीनो वितण्डा"**[8] इति। अर्थात् जल्पः प्रतिपक्षस्य स्थापनाहीनः सन् वितण्डा भवति। तर्हि किं वा लक्षणम् अस्ति जल्पस्य? इति ज्ञातव्यं वितण्डायाः सम्यक् ज्ञानार्थम्। भगवता गौतमेन जल्पस्य लक्षणं कृतम्- **"यथोक्तोपपन्नश्छल-जाति-निग्रहस्थानसाधनोपालम्भो जल्पः"**[9] इति। अतः वितण्डायाः लक्षणं भवति- **"यथोक्तोपपन्नश्छल-जातिनिग्रहस्थानसाधनोपालम्भः प्रतिपक्षस्थापनाहीनो वितण्डा"** इति। जल्पलक्षणे उल्लिखितस्य यथोक्तोपपन्नशब्दस्य व्याख्यायां भाष्यकारेण-वात्स्यायनेन उक्तं- **"यथोक्तोपपन्न इति प्रमाण-तर्क-साधनोपालम्भः**

4. न्यायभाष्यम् (सूत्रम् 1/2/1)
5. न्यायवार्तिकतात्पर्यटीका
6. तार्किकरक्षा
7. न्यायसूत्रवृत्तिः
8. न्यायसूत्रम् 1/2/3
9. न्यायसूत्रम् 1/2/2

**सिद्धान्ताविरुद्धः पञ्चावयवोपन्नः पक्षप्रतिपक्षपरिग्रहः"**[10] इति। एतद्दृष्ट्या वितण्डायाः सम्पूर्णं लक्षणं भवति "प्रमाण-तर्क-साधनोपालम्भः सिद्धान्तविरुद्धः पञ्चावयवोपन्नः पक्षप्रतिपक्षपरिग्रहश्छल-जाति-निग्रह-स्थानसाधनोपालम्भः प्रतिपक्षस्थापनाहीनो विचारः" इति।

वादिनः पक्षस्य अपेक्षया प्रतिवादिनः स्वपक्षः एव प्रतिपक्षशब्देन बोद्धव्यः। कारणं यद्यपि प्रतिवादिनः पक्षस्य अपेक्षया वादिनः पक्षः प्रतिपक्षशब्देन ज्ञातव्यो भवति तथापि वादी प्रारम्भे स्वपक्षं यदि न स्थापयति तर्हि प्रतिवादी तद् खण्डयितुं न शक्नोति।

अतः वितण्डासूत्रोक्तस्य प्रतिपक्षशब्देन प्रतिवादिनः पक्षः एव बोद्धव्यः। चरकसंहितायाः विमानस्थानेऽपि कथितं भगवता चरकेण- **"जल्पविपर्ययो वितण्डा, वितण्डा नाम परपक्षदोषवचनमात्रमेव"**[11] इति।

पूर्वपक्षरूपेण परं भाष्यकारेण आचार्येण वात्स्यायनेन उक्तं-**"स प्रतिपक्षहीनो वितण्डा"**[12] इति। तात्पर्यमेतदस्ति यद् 'वैतण्डिकः प्रतिवादी स्वपक्षं न स्थापयति' इति कथनेन प्रतिवादिनः स्वपक्षरूपः प्रतिपक्षः एवनास्ति इति स्वीकार्यम्। यतः यस्य स्थापना नास्ति स पक्षः न भवति। अतः वितण्डायां प्रतिपक्षरूपः पक्षाभावे प्रतिपक्षहीनो जल्पः एव वितण्डा इत्येवं वक्तव्यम्। अतः भगवता गौतमेन कृते वितण्डालक्षणसूत्रे स्थापनाशब्दः व्यर्थो भवति। प्रसङ्गेऽस्मिन् उक्तस्य पूर्वपक्षस्य व्याख्यायाम् आचार्येण उद्योतकरेण कथितं- **"अपरे तु ब्रुवते, दूषणमात्रं वितण्डेति। दूषणमात्रेति मात्रशब्दप्रयोगाद्वितण्डिकस्य पक्षोऽपि नास्तीति।"**[13] वस्तुतो वैतण्डिकस्य प्रतिवादिनः स्वसिद्धान्तः एव तस्य स्वपक्षः, तदेव वादिनः प्रतिपक्षः। न्यायवार्तिकतात्पर्यटीकाकारेण आचार्येण वाचस्पतिमिश्रेण सूचितं- **"पक्षत्वन्तु**

---

10. न्यायसूत्रम् 1/2/1
11. चरकसंहिता (अष्टमोऽध्यायः)
12. न्यायभाष्यम् सूत्रम् 1/2/3
13. न्यायवार्त्तिकम्

**तद्योग्यतामात्रेण, न तु स्थाप्यमानतयेति"**।[14] अतः वितण्डा प्रतिपक्षहीनः इति वक्तुं न शक्यते। अतः महर्षिणा गौतमेन यादृशं सूत्रं कृतं तदेव वक्तव्यं स्वीकर्तव्यञ्च।

**"वितण्ड्यते व्याहन्यते परपक्षोऽनया"** इति व्युत्पत्यनुसारेण यया कथया जिगीषुः प्रतिवादी यथानियमं केवलं परपक्षखण्डनमेव करोति, स्वपक्षरूपस्य प्रतिपक्षस्य स्थापनां न करोति, सैव कथा वितण्डाशब्दस्य प्रकृतार्थः। न तु कलहाद्यर्थे प्रयुक्तः वितण्डाशब्दः, यथा वादवितण्डा, वाग्वितण्डा चेति। वृत्तिकारेण आचार्येण विश्वनाथेन प्रोक्तं- **"प्रतिपक्ष-स्थापनाहीनो विजिगीषुकथा वितण्डेति। न च स्वस्य स्थापनीयाभावात् कथमियं कथा प्रवर्ततामिति वाच्यम्। परपक्षखण्डनेन जयस्यैवोद्देश्य-त्वात्"**[15] इति। भारतीयदार्शनिकेषु चार्वाकाः माध्यमिकाः अद्वैतवेदान्तिनश्च भवन्ति वैतण्डिकाः।

मनसि प्रश्नो जायते अध्यात्मविद्यारूपे न्यायशास्त्रे पूर्वोक्तरूपयोः जल्पवितण्डयोः पदार्थयोः उल्लेखः महर्षिणा भगवता गौतमेन कथं कृतः? मुमुक्षुः जनः किमर्थं परं जेतुं जल्पं वितण्डां वा करोति? तत्रोत्तरं यद् मुमुक्षुः जनोऽपि प्रथमायाम् अवस्थायां तस्य अपक्वस्य तत्त्वनिश्चयस्य रक्षार्थं समयविशेषे जल्पं वितण्डां वा करोति। अतः महर्षिणा गौतमेन स्वयमेव उक्तं-

**"तत्त्वाध्यवसाय-संरक्षणार्थं जल्पवितण्डे बीजप्रोहसंरक्षणार्थं कण्टकशाखावरणवत्।"**[16]

**"ताभ्यां विगृह्य कथनम्"**।।[17]

भाष्यकारेण आचार्येण वात्स्यायनेन प्रसङ्गेऽस्मिन् कथितं- **"तदेत-द्विद्यापरिपालनार्थं न तु लाभ-पूजा-ख्यात्यर्थम्"**[18] इति। अर्थात्

14. न्यायवार्तिकतात्पर्यटीका
15. न्यायसूत्रवृत्तिः
16. न्यायसूत्रम् 4/2/50
17. न्यायसूत्रम् 4/2/51
18. न्यायभाष्यम्

आत्मविद्यायाः रक्षार्थं समयविशेषे जल्पवितण्डे कर्तव्ये इति। किन्तु किमपि लाभार्थं पूजार्थं ख्यात्यर्थं वा न कर्तव्यमिति। परमकारुणिकेन महर्षिणा गौतमेन अस्मिन् अध्यात्मशास्त्रे पूर्वोक्तोद्देश्यार्थं परपराभवार्थं वा जल्पवितण्डे कर्त्तव्ये इति नोक्तम्। तार्किकरक्षाकारेण वरदराजेनापि प्रोक्तं यद्- **"धर्मशास्त्रे न विगृह्य कथां कुर्यात्"**[19] इति। उक्तेन वचनेन जल्पवितण्डयोः निषेधे सत्यपि महर्षिणा गौतमेन स्थलविशेषे तयोः विधानं कृतम्। अतः अयं निषेधः भिन्नार्थे प्रयुक्तः इति बोद्धव्यम्। न्यायपरिशुद्धिग्रन्थे आचार्येण वेङ्कटनाथेनापि एतस्य मतस्य समर्थनाय रामानुजमतानुसारं कथितम्- **"आगमसिद्धा चेयं व्यवस्था, वाद-जल्प-वितण्डाभिरित्यादिवचनात्। भगवद्गीताभाष्येऽपि...."**[20] इति शम्।

## सन्दर्भग्रन्थसूची


1. अन्नम्भट्टः। तर्कसंग्रहः, सम्पा. सत्करिशर्मा, वाराणसी, चौखम्बा-विद्याभवनम्, 1969 मुद्रणम्।
2. जयन्तभट्टः, न्यायमञ्जरी, सम्पा. अमितभट्टाचार्यः, कलकाता, संस्कृतबुकडिपो, 2006 (प्रथमसंस्करणम्) मुद्रणम्।
3. तर्कवागीशः, फणिभूषणः, न्यायपरिचयः, कलकाता, बङ्गीयसाहित्य-परिषद, 1413 (बङ्गाब्दः) मुद्रणम्।
4. प्रशस्तपादाचार्यः, प्रशस्तपादभाष्यम्, सम्पा. दुर्गाधरशर्मा, वाराणसी, विद्यामन्दिरप्रेसप्राइवेटलिमिटेड, 1885 मुद्रणम्।
5. महर्षिः गौतमः, न्यायदर्शनम् (प्रथमखण्डम्), सम्प. फणिभूषणतर्क-वागीशः, कलकाता, पश्चिमबङ्गराज्यपुस्तकपर्षत्, 2011 (चतुर्थ-संस्करणम्) मुद्रणम्।


---

19. तार्किकरक्षा
20. न्यायपरिशुद्धिः

6. वाचस्पतिमिश्रः, न्यायवार्तिकतात्पर्यटीका, सम्पा. राजेश्वरशास्त्री, वाराणसी, चौखम्बासंस्कृतसिरिज, 1925 मुद्रणम्।

7. विश्वनाथन्यायपञ्चाननभट्टाचार्यः, भाषापरिच्छेदः, सम्पा. अनामिका-रायचौधरी, कलकाता, संस्कृतपुस्तकभाण्डारम्, 2013 (चतुर्थ प्रकाशनम्) मुद्रणम्।

8. शिवादित्यः, सप्तपदार्थी, सम्पा. तपनशङ्करभट्टाचार्यः, कलकाता, संस्कृतबुकडिपो, 2012 मुद्रणम्।


❒❒❒

# न्यायवैशेषिकदर्शने पदार्थवादविमर्शः

- **लिपिपात्रः** *

भारतीयदर्शनानि द्वेधा विभक्तानि आस्तिकनास्तिकभेदेन। तत्र आस्तिक-दर्शनेषु महर्षिगौतमप्रणीतं न्यायशास्त्रमन्यतमम्। इदं शास्त्रं सर्वविद्यानां मूलस्तम्भभूतं वेदप्रामाण्यरक्षाहेतुत्वादिति, निर्विवादं तथ्यम्।

**अङ्गानि वेदाश्चत्वारो मीमांसान्यायविस्तरः।**
**पुराणं धर्मशास्त्रञ्च विद्या ह्येताश्चतुर्दश।।**[1]

चतुर्दशविद्यास्थानेषु अत्र न्यायविस्तरपदेन सर्वशास्त्रोपकारकं न्यायशास्त्रं इति बोध्यम्।

न्यायशब्दार्थस्तु प्रमाणानि उपयुज्य पदार्थपरीक्षणमेव भवति। प्रकारान्तरेण समस्तानां प्रमाणानां व्यापारमाध्यमेन अर्थज्ञानमेव न्यायः प्रोच्यते।

**प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम्।**
**आश्रयः सर्वधर्माणां विद्योदेशे प्रकीर्तिता।।**[2]

वैशेषिकदर्शनस्य कर्ता महर्षिकणादः अस्ति। एतस्मिन् दर्शने विशेष इत्याख्यः पदार्थः भगवता कणादेन भिन्नतया स्वीकृतः। एतस्मात् कारणाद् दर्शनमिदं वैशेषिकदर्शनमित्येतया संज्ञया अभिधीयते विपश्चितैः दार्शनिकैः। अयं महर्षिः भगवान् कणादः साधर्म्यवैधर्म्याभ्यां पदार्थतत्त्वप्रकाशात् निःश्रेयससिद्धिं मनुते। दर्शनमिदं मुख्यतया पदार्थविद्याप्रतिपादकमस्ति। एतदर्थमत्रत दीयानि चत्वारि सूत्राणि अवलोकनीयानि भवन्ति।

---

* शोधच्छात्रा, न्यायदर्शनविभागः, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्व-विद्यालयः, नवदेहली।

1. न्या. म. 2/2
2. सेयमान्वीक्षिकी मता इति पाठभेदः न्या.मः 22/2

**1. अथातो धर्मं व्याख्यास्यामः।**[3]

**2. यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः।**[4]

**3. तद्वचनादाम्नायस्य प्रामाण्यम्।**[5]

**4. धर्मविशेषप्रसूताद्द्रव्यगुणकर्मसामान्यविशेषसमवायानां पदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानान्निःश्रेयसम्।**[6]

न्यायवैशेषिकयोः द्वयोः दर्शनयोः उद्देश्यमेकमेवास्ति, यथा- सांख्य-योगयोः मीमांसावेदान्तयोश्च। यद्यपि न्याय-वैशेषिकौ अपि साम्यं विभ्रतः परन्तु द्वयोः मध्ये मतभेदोऽपि दृश्यते।

न्यायदर्शने षोडशपदार्थाः स्वीकृताः सन्ति परमत्र वैशेषिकदर्शने केवलं सप्तपदार्थाः अङ्गीकृताः। यथा- द्रव्यम्, गुणः, कर्म, सामान्यं, विशेषः, समवायः, अभावश्च।[7] एतेषु आदिमाः षडपदार्थाः भावात्मकाः सन्ति। अन्त्यः अभावात्मकः पदार्थस्तु अभाव एवास्ति।

पदार्थः इति एतस्य अर्थोऽस्ति, तद् वस्तु यस्य बोधः केनापि पदेन जायते। अतः यावन्त्यपि वस्तूनि सन्ति, अथवा यानि केनापि नाम्ना व्यपदिश्यन्ते, तानि सर्वाणि पदार्थः इत्युच्यन्ते। अत्र पदार्थो द्विविधः भावात्मकः अभावात्मकश्च।

सत्तावान् पदार्थस्तु, भावपदार्थः, किञ्च असत्तावान पदार्थः अभावपदार्थः इति कथ्यते। घट-पट-आत्मप्रभृतयः पदार्थः सन्ति भावात्मकाः। वैशेषिकसूत्रे केवलं द्रव्यगुणकर्मसामान्यविशेषसमवायाः षड्भावपदार्थाः मन्यन्ते। अर्वाचीने वैशेषिकदर्शने अभावः इत्याख्य सप्तमपदार्थः परिवर्द्धितः।

**'पदजन्यप्रतीतिविषयत्वं पदार्थत्वम्'** इति पदार्थलक्षणम् अन्नंभट्टेन तर्कसंग्रहग्रन्थे प्रतिपादितम्- **'पदस्य अर्थ-पदार्थः'** इति व्युत्पत्या 'अभिधेयत्वं

3. वै.सू. 1/2
4. वै.सू. 1/2
5. वै.सू. 1/3
6. वै.सू. 1/4
7. तर्कसंग्रहः

पदार्थसामान्यलक्षणम्'[8] श्री अन्नंभट्टेनः तर्कदीपिकायां प्रतिपादितम्। प्रशस्त-पादाचार्यमतेन पदार्थस्य लक्षणम् **'षण्णामपि पदार्थानामस्तित्वाभिधे-यत्वज्ञेयत्वानि'**[9] इति **"प्रमितिविषयाः पदार्थाः"**[10] इति शिवादित्येन **'सप्तपदार्थी'** ग्रन्थे पदार्थलक्षणं वर्णितम्।

सिद्धान्तचन्द्रोदयमतेन- **'पदार्थत्वं ज्ञेयत्वम्'** इति। **'अभिधेयाः पदार्थाः'**[11] इति- लक्षणावल्याम्।

न्यायसूत्रकारमहर्षिगौतमेन उक्तम्- **'व्यक्त्याकृतिजातयस्तु पदार्थाः'**[12] इति।

**'प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्प-वितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्वज्ञानान्निःश्रेयसाधिगमः'**[13] इति न्यायसूत्रकारेण महर्षिगौतमेन न्यायसूत्रस्य प्रथमसूत्रे प्रतिपादितम्।

**प्रमाणम्-**

**'प्रमायाः करणं प्रमाणम्'** 'प्र'-पूर्वक ज्ञानार्थक 'मा' धातोः करणे ल्युट्- प्रत्ययेन प्रमाणं सिद्धति। **'प्रमाणतोऽर्थप्रतिपत्तौ प्रवृत्ति-सामर्थ्यादर्थवत्प्रमाणम्'**[14] इति न्यायसूत्रकारेण महर्षिगौतमेन उक्तम्। 'अर्थपरिच्छित्तिसाधनानि प्रत्यक्षादीनि प्रमाणानि'[15] इति न्यायमञ्जरीकारेण जयन्तभट्टेन उक्तम्।

यथार्थानुभवः प्रमा इति उच्यते। तद्वति तात्प्रकारकानुभवत्वं यथार्थत्वम्। अतएव तर्कसंग्रहे तद्वति तत्प्रकारकोऽनुभवो यथार्थ इति यथार्थानुभवस्य परिभाषा विद्यते।

---

8. तर्कदीपिका पृ. 2
9. प्रशस्तपादभाष्यम्
10. सप्तपदार्थी
11. लक्षणावली पृ. 2
12. न्या.सू. 2/2/75
13. न्या.सू. 2/2/2
14. न्या.सू. 2/2/2
15. न्यायमञ्जरी

न्यायदर्शने प्रमा चतुर्विधा विद्यते। अस्मात् कारणात् प्रमाणानि अपि चतुर्विधं भवन्ति। तानि सन्ति- **'प्रत्यक्षानुमानोपमानशब्दाः'** इति।

**प्रमेयम्-**

**'तत्परिच्छेद्यमात्मादि प्रमेयम्'**[16] इति जयन्तभट्टेन उक्तम्।

न्यायदर्शने द्वादशविधानि प्रमेयाणि स्वीकृतानि सन्ति। तानि च सन्ति आत्मा-शरीर-इन्द्रिय-अर्थ-बुद्धि-मन-प्रवृत्ति-दोष-प्रेत्यभाव-फलः-दुःख-अपवर्गश्चैतान्येव प्रमेयाणि सन्ति। तत्र कारणमिदमेव विद्यते यत् इमानि प्रमाणानि साक्षादेव बन्धकारणानि भवन्ति। साक्षादेव मोक्षकारणान्यपि भवन्ति। एतेषामज्ञानाद्बन्धे ज्ञानञ्च मोक्षो जायते। अस्मात् कारणादेव न्यायसूत्रकारेण गौतमेन केवलमेतान्येव प्रमेयाणि न्यायसूत्रे परिगणितानि। तथा हि विद्यते न्यायसूत्रम्-

'आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयम्'[17] इति।

**संशयः -**

अप्रमाज्ञानस्य त्रयः भेदाः सति- संशयः, विपर्ययः, तर्कभेदेन। एतल्लक्षणं न्यायसूत्रकारेण उक्तम्-

**'समानानेकधर्मोपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्धव्यवस्थातश्च विशेषापेक्षे विमर्शः संशयः'।**[18]

तथा च एकधर्मिविरुद्धः भावप्रकारकं ज्ञानं संशयः। उभयसाधारण-धर्मज्ञानं, असाधारणधर्मज्ञानं, विप्रत्तिपत्तिवाक्यजन्यकोटिद्वयज्ञानं संशयस्य कारणं भवति। एकवृत्तिभावाभावविषयकज्ञानत्वस्य वृक्षे कपिसंयोगतदभाव-योरविरुद्धत्वात् तद्धारणम्। भूतलं घटवत् पृथिवीघटाभाववतीत्यत्र ज्ञानेऽति-व्याप्तिवारणाय एकधर्मितावच्छेदक-विशिष्टविशेष्यकत्वावच्छिन्नेति उक्तम्।

16. न्यायमञ्जरी
17. न्यायसूत्रम् 2/1/9
18. न्यायसूत्रम् 1/1/22

भूतलं घट-तदभाववत् इति ज्ञानवारणाय विरुद्धभावाभावेति ज्ञानमिति पदम्।

**प्रयोजनम्-**

**'यमर्थमधिकृत्यप्रवर्तते तत्प्रयोजनम्'**[19] इति न्यायसूत्रकाराभिमतम् प्रयोजनलक्षणम्। पदार्थमधिकृत्यः पुरुषः प्रवर्तते तत् प्रयोजनम्। यथा- ज्ञानमुद्दिश्याध्ययने प्रवृत्तस्य ज्ञानं प्रयोजनं समदमाद्यनुष्ठाने प्रवृत्तस्य अपवर्गः प्रयोजनम्। तार्किकरक्षायां प्रयोजनस्य लक्षणं प्रोवाच वरदराजः **'यदुद्दिश्य प्रवर्तन्ते पुरुषास्तत्प्रयोजनम्'**[20] इति।

अस्य प्रयोजनस्य साध्यतया इच्छाविषयस्य यथायथं द्रव्यादिष्वन्तर्भाव इति दिनकरीकाराणामाशयः। सुखजनकपदार्थमाप्स्यामि दुःखजनकपदार्थं हास्यामीति व्यवसायः। अत्र 'सुखदुःखयोरवाप्तिहानाभ्यामयं लोकः प्रयुज्यते इति सुखदुःखाप्तिहानो प्रयोजनमिति' वार्तिककारः।

**दृष्टान्तः-**

न्यायसूत्रकारः गौतमः दृष्टान्तस्य लक्षणं प्रस्तौति **'लौकिकपरीक्षकाणां यस्मिन्नर्थे बुद्धिसाम्यं सः दृष्टान्तः'**[21] यदि पदार्थे शास्त्रीयज्ञानरहितानां शास्त्रीयज्ञानवतां च साध्यसाधनयोः समानाधिकरण्यविषयकबुद्धेः साम्यं भवति स दृष्टान्तः।

**सिद्धान्तः -**

न्यायसूत्रकारेणापि उक्तम्-**'तन्त्राधिकरणाभ्युपगमसंस्थितिः सिद्धान्तः'**[22] इति प्रमाणेन सिद्धत्वत् तादृशस्य सिद्धस्य व्यवस्थैवान्तः सिद्धान्तः। तच्छास्त्रसिद्धयर्थरूपस्य सिद्धान्तस्य द्रव्यादिष्वन्तर्भावः इति दिनकरीकारः, तार्किकरक्षायां सिद्धान्तस्य लक्षणं भेदाश्च इत्थं निरूपयति वरदराजः-

---

19. न्यायसूत्रम् 1/1/20
20. न्यायसूत्रम् 1/1/24
21. न्यायसूत्रम् 1/1/25
22. न्यायसूत्रम् 1/1/26

**सिद्धान्तः सर्वतन्त्रादिभेदात् सोऽपि चतुर्विधः।**
**सर्वतन्त्राविरुद्धोऽर्थः स्वतन्त्रेऽधिकृतश्च यः॥**[23]

सिद्धान्तः चतुर्विधः भवति यथा– सर्वतन्त्र, प्रतितन्त्र, अधिकरणम्, अभ्युपगम् इति भेदेन।

**अवयवः –**

न्यायदर्शने स्वार्थानुमानपरार्थानुमानभेदेन अनुमानस्य द्वैविध्यं प्रतिपादितम्।[24] तत्र स्वार्थानुमाने पञ्चावयवस्य उपयोगः नैव भवति किन्तु परार्थानुमाने पञ्चावयववाक्यस्य प्रयोगो अपेक्षितो भवति। ते च पञ्चावयवाः प्रतिज्ञाहेतूदाहरणोपनयनिगमनभेदेन पञ्चविधः। न्यायसूत्रकारेणापि उक्तम्–

**'प्रतिज्ञाहेतूदाहरणोपनयनिगमनान्यवयवाः'**[25] इति।

**तर्कः –**

**'व्याप्यारोपेण व्यापकारोपस्तर्कः'**[26] इति अनंभट्टपादाः। न्याय–सूत्रकारः गौतमस्तु **'अविज्ञाततत्वेऽर्थे कारणोपपत्तितस्तत्त्वज्ञानार्थ–मूहस्तर्कः'**[27] इति तर्कलक्षणं प्रोक्तम्, अविज्ञातस्वरूपे अर्थे यथार्थस्वरूपज्ञानार्थं या हि सम्भावना स तर्कः।

**निर्णयः –**

परिगणितेषु पदार्थेषु मध्ये निर्णयोऽपि पदार्थः अन्यतमः। महर्षिणा गौतमेन निर्णयस्य लक्षणमुक्तम् **"विमृश्य पक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णयः"**[28] इति। इदमेव संशयं कृत्वा संदिग्धविषयकखण्डनमण्डनाभ्यां सिद्धार्थविषयकं यदवधारणं सः निर्णयः।

---

23. तर्कसंग्रहः
24. तर्कसंग्रहः
25. न्यायसूत्रम् 1/1/32
26. तर्कसंग्रहः
27. न्यायसूत्रम् 1/1/40
28. न्यायसूत्रम् 1/1/41

**वादः -**

परिगणितेषु पदार्थेषु वादः अपि अन्यतमः पदार्थः तत्र वादो नाम तत्त्वबुभुत्सोः कथा वादः। न्यायभाष्ये भगवता वास्यायनेन प्रोक्तं तिस्रः कथाः चेति।[29] तत्र वादस्य लक्षणं प्रतिपादितं न्यायसूत्रे–

**'प्रमाणतर्कसाधनोपालम्भः सिद्धान्तविरुद्धः पञ्चावयोपपन्नः पक्षप्रतिपक्षपरिग्रहो वादः।'**[30]

**जल्पः -**

त्रिविधासु कथासु मध्ये जल्पः अन्यतमः। परपक्षखण्डनपूर्वकं स्वमतस्थापनं जल्पः, जल्पस्य लक्षणं कुर्वता गौतमेन प्रोक्तं यत्– **"यथोक्तोपपन्नश्छलजातिनिग्रहस्थानसाधनोपालम्भो जल्पः"**[31] अत्र यथोक्तोपपन्नः इति पदेन पूर्वस्थितसूत्रात् वादलक्षणः सर्वविधनां विशेषणानां ग्रहण कांक्षितम् सूत्रकारैः, परन्तु वृत्तिकारैः केवलमेव प्रमाणतर्कसाधनोपालम्भः पक्षप्रतिपक्षपरिग्रहः च अनयोः द्वयोः पदार्थाः ग्रहणं कृतम्। वादिप्रतिवादिभ्यां जायमानेन एकस्य जयः अपरस्य च पराजयो भवति। तत्र पराजयनिमित्तः जल्पः भवति।

**वितण्डा -**

परिगणितेषु षोडशपदार्थेषु मध्ये वितण्डापि अन्यतमत्वेन पदार्थेत्वेन गण्यते। वितण्डायाः लक्षणं सूत्रकारेण कथितम् **'स प्रतिपक्षस्थापन हीनो वितण्डा'**[32] अत्र सूत्रस्थितेन स इति पदेन जल्पे स्थितसर्वविधविशेषणानां ग्रहणं कृतवान्। यद्यपि छलमुभयपक्षस्थापनत्वेन सम्भवति। वितण्डायां तु केवलमेव परपक्षखण्डनेन जयः प्राप्नोति। अतः अत्र प्रतिपक्षः आत्मपक्ष–स्थापनम् अकृत्वेऽपि पक्षस्य स्थापितपक्षं दोषोद्भावनेन तस्य पराजय–मुद्घोषयति।

---

29. वात्स्यायनभाष्यम्
30. न्यायसूत्रम् 1/2/1
31. न्यायसूत्रम् 1/2/3
32. न्यायसूत्रम् 1/2/4

**हेत्वाभासाः -**

आभासते इति आभासाः 'हेतोराभासा हेत्वाभासाः' इति व्युत्पत्यनुसारेण हेत्वाभासस्यार्थः हेतुगतः दोषः। अपि च 'हेतुवदाभासन्ते इति हेत्वाभासः' इति व्युत्पत्त्यनुसारेण दुष्टहेतुपरतया हेत्वाभासशब्दस्यार्थः भवति। अतः न्यायदर्शनकारेण गौतमेन हेत्वाभासस्य विभागः दृष्टहेतुपरतया कृतम्, परन्तु चिन्तामणिकारेण हेत्वाभास्य लक्षणं दृष्टहेतुपरतया नाङ्गीकृतेऽपि दोषपरतया लक्षणं प्रदत्तम्।

**'सव्यभिचारविरुद्धप्रकरणसमसाध्यसमकालातीता हेत्वाभासाः'**[33] इति सूत्रकारेण विभागः कृतः। अस्य लक्षणम्- **'यद्विषयकं ज्ञानं अनुमितिप्रतिबन्धकत्वं हेत्वाभासत्वम्'** इति। हेवाभासस्य प्रयोजनं वादीनां प्रयुक्ते हेतौ दोषाद्भावनद्वारा अनुमितिप्रतिबन्धः। वादे हेत्वाभासानां प्रयोगोद्भावनं प्रदर्शनार्थं निग्रहस्थानमध्ये स्वीकृतेऽपि पृथक्पदार्थतया तस्य वर्णनम् कृतम्।

**छलम् -**

वितण्डालक्षणानन्तरं छलस्य लक्षणं कथ्यते। अलक्षितानि छलादीनि प्रयोक्तुं वक्तुं वा न शक्यते इति।

**वचनविघातोऽर्थविकल्पोपपत्त्या छलम्।**[34]

अर्थात् छल्यते परोऽनेनेति छलम्। किं तदित्याह वचनविघतात् परप्रयुक्तवचः खण्डनम्। कस्यार्थस्य वाच्यस्य विरुद्धत्वेन विकल्पमर्था- विकल्पस्तङ्घटनया उत्कण्ठतया। अयमर्थः वचनविघातो न मुखपिधानमपि- त्वर्थविकल्पोपपत्त्या वक्तुरनभिप्रेतमर्थं तदुक्ते वचनस्यारोपप्यच्छलवदी यत्तन्निषेधं करोति तच्छलं भवति।

छलपदार्थस्य विभागप्रसङ्गे उक्तम्-

तत् त्रिविधं वाक्च्छलं सामान्यच्छलमुपचारच्छलं चेति। अतः वाक्छलस्य लक्षणं ग्रन्थकारेण प्रोक्तम्-

---

33. न्यायसूत्रम् 1/2/5

34. न्यायसूत्रम् 1/2/5

'अविशेषाभिहितेऽर्थे वक्तुरभिप्रायादर्थान्तरकल्पना वाक्छलम्'- इति।

**'सम्भवतोऽर्थस्यातिसामान्ययोगादसम्भूतार्थकल्पना सामान्यछलम्'** इति ग्रन्थकाराभिमतं सामान्यच्छललक्षणम्।

**'धर्मविकल्पनिर्देशोऽर्थसद्भावप्रतिषेध उपचारच्छलम्'** इति तु उपचारच्छलस्य लक्षणम् दर्शितम्।

**जातिः-**

**'साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानं जातिः'**[35] इति जाति लक्षयति सूत्रकारेण।

वृत्तिकारेणापि उक्तम्- **'साधर्म्यवैधर्म्याभ्यामिति सावधारणो निर्देशः। तेन व्याप्तिनिरपेक्षाभ्यां साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानं दूषणाभिधानं जातिरित्यर्थः'** इति।

**निग्रहस्थानम्-**

निग्रहस्थानप्रसङ्गे न्यायसूत्रकारेणोक्तम्-

**'विप्रतिपत्तिरप्रतिपत्तिश्च निग्रस्थानम्'**[36] इति। निग्रहस्थानविषये वरदराजः इत्थमाह- **'पराजयनिमितं निग्रहस्थानम्'** अर्थात् पराजयो हारिस्तस्य पदार्थाद्विप्रतिपत्तिरप्रतिपत्तिर्वा निग्रस्थानं भवति।

द्वाविंशतिसंख्यकानां निग्रहास्थानानां मध्ये न्यूनाधिकनामकैः निग्रह-स्थानयोः उद्भावनं वादे करणीयम्।

न्यायसम्मतषोडशविधपदार्थस्य वैशेषिकसम्प्रदायस्वीकृतसप्तपदार्थे अन्तर्भावेन अत्र पदार्थस्वीकारविषये नास्ति वैमत्यम्।

न्यायसिद्धान्तमुक्तावल्यामस्ति- **'एते च पदार्थाः वैशेषिकनये प्रसिद्धाः, नैयायिकानामप्यविरुद्धाः।'** इदमेव कारणवशात्।

न्यायवैशेषिकसमानतन्त्रतया गण्यते। अतः वैशद्यभयात् वैशेषिक-सम्प्रदायस्वीकृतानां पदार्थानां वर्णनं न कृतम्।

---

35. न्यायसूत्रम् 5/2/1
36. न्यायभाष्यम् 1/2/9

**उपसंहारम्-**

प्राचीननैयायिकत्वेन परिगण्यते महर्षिगौतमः। अतः न्यायसूत्रकारेण दर्शितानां षोडशविधपदार्थानां उल्लेखपूर्वकवर्णनम् अत्रैव संक्षेपेण उपस्थापितम्। अपि च वैशेषिकदर्शने स्वीकृतपदार्थानां वर्णनमपि न्यूनतया कृतम्। यद्यपि इत्यत्र न्याय वैशेषिकस्वीकृतपदार्थेषु विभागप्रदर्शनं पुरःसरं, तेषां वर्णनं न प्रदर्शितम्। तथापि केवलमेव तेषां लक्षणं दर्शितम्।

## सन्दर्भग्रन्थसूची

1. न्यायमञ्जरी (भागद्वयम्) जयन्तभट्टः, सम्पा. सूर्यनारायणशुक्लः, चौखम्बा संस्कृतसीरीज, वाराणसी, 1971.
2. वैशेषिकसूत्रम् सम्पा. अनन्तलालठक्कुरः, मिथिला विद्यापीठग्रथमाला, सं- 13, दरभंगा, 1969
3. वैशेषिकसूत्रम् कणादः, सम्पा. नारायणमिश्रः, चौखम्बा संस्कृतसीरीज, वाराणसी, 1996.
4. वैशेषिकसूत्रो उपस्कारः शंकरमिश्रः, सम्पा. ढुण्ढिराजशास्त्री, काशी संस्कृतग्रन्थमाला, वाराणसी, 1969.
6. तर्कसंग्रहः दीपिका सहितः अन्नंभट्टः, सम्पा. अथल्ये बोडासः, बाम्बे संस्कृतसीरीज, सं. 55, भण्डारकर-ओरियण्टलरिसर्च इन्स्टिटयूट, पूना- 1968.
7. त.सं. न्यायबोधिनी गोवर्धनभट्टः, सम्पा. अथल्ये बोडासः, बाम्बे संस्कृतसीरीज, सं. 55, भण्डारकर-ओरियण्टलरिसर्च इन्स्टिटयूट, पूना- 1968.
8. न्यायभाष्यम् वात्स्यायनः, सम्पा. नारायणमिश्रः, काशी संस्कृत ग्रन्थमाला, 48, वाराणसी, 1970.

9. न्यायसूत्रम् — महर्षिगौतमः, सम्पा. नारायणमित्रः, काशी संस्कृतग्रन्थमाला, वाराणसी 1970

10. पदार्थतत्त्वनिरूपणम् — रघुनाथशिरोमणिः, सम्पा. कार्लपोर्टरः हार्वर्ड–पेन्टिंगइन्स्टिट्यूट, सं. 17, कोलकाता, 1957.

❑❑❑

# प्रमाणचतुष्टयवादः

-केशवकिशोरः*

न्यायदर्शने प्रमाणस्य अतिमहत्त्वमस्ति। प्रमाणमन्तरेण वस्तुसिद्धिः नैव भवितुमर्हति। लक्षणप्रमाणभ्यां वस्तुसिद्धिः इत्यधारिकृत्य न्यायदर्शने चतुर्विधप्रमाणानि स्वीक्रियन्ते। प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि[1] इति। तत्र किं नाम प्रमाणम्? उच्यते प्रमाणतोऽर्थप्रतिपत्तौ प्रवृत्तिसामथ्यदिर्थवत्प्रमाण-मिति[2]। प्रमाणतः अर्थस्योत्पतिः। अर्थस्योत्पत्तितः प्रवृतिः सफलाप्रवृत्तेः प्रमाणं प्रति कारणं विद्यते। यथार्थज्ञानकारणेन प्रमाण्यनिश्चयः सम्भवति। प्रमायाः करणं प्रमाणम्[3] इति। चतुर्विधप्रमाणेषु आद्यं प्रत्यक्षम् अक्षस्याऽक्षस्य प्रतिविषयं वृत्तिः प्रत्यक्षम्[4]। इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षम् इन्द्रियपदेन बहिरिन्द्रियस्य, आभ्यन्तरिन्द्रियस्य च ग्रहण उभौ ग्राह्यौ भवति। तत्तप्रत्यक्षं द्विविधम अव्यपदेश्यं व्यवसायात्मकञ्चेति, अव्यपदेश्यं निर्विकल्पकं व्यवसायात्मकं सविकल्पकं भवति। प्रकारतादिशून्यं ज्ञानं निर्विकल्पकं, प्रकारतादिनिरूपितज्ञानं सविकल्पकं भवति। पुनः लौकिकालौकिकभेदेन प्रत्यक्षं द्विविधं घ्राणजादिप्रभेदेन प्रत्यक्षं षड्विधं मतम्[5] इति। घ्राणजं रासनं चाक्षुषं स्पार्शनं श्रौत्रं मानसमिति षड्विधं प्रत्यक्षम्[6] जन्यप्रत्यक्षमिन्द्रियं

---

* शोधच्छात्रः, न्यायविभागः, श्री ला.ब.शा.रा.सं. विश्वविद्यालयः, नई दिल्ली-16

1. न्यायसूत्रम्- 1.1.3
2. न्यायभाष्यम्- पृ.सं. 1
3. तर्कभाषा- पृ. सं. 13
4. न्यायभाष्यम् पृ.सं. 23
5. कारिकावली- 52
6. न्यायसिद्धान्तमुक्तावली- पृ.सं. 290

पञ्च, जन्यप्रत्यक्षविषयोऽपि पञ्च–रूपरसगन्धस्पर्शशब्दविषयाः भवन्ति। इन्द्रियार्थसन्निकर्षः षड्विधः– संयोगः, संयुक्तसमवेतसमवायः, समवायः, समवेतसमवायः, विशेषणविशेष्यभावश्चेति। इन्द्रियविषयोः अत्यन्तसंयोगः अस्ति, यतोहि पदार्थस्य इन्द्रियेण सह सम्बन्धः भवति, सैव सन्निकर्षः कथ्यते। न्यायवैशेषिकमते इन्द्रियं वस्तुभिः साक्षात्वा परम्परां यावत् ज्ञानोत्पादनक्षमता नैव सम्भवति। वस्तुप्राप्यप्रकाशकारित्वं सम्बन्धेन ज्ञानं भवति। इन्द्रियं प्रत्येकं वस्तुं प्रथमं प्राप्यते, तदन्तरं प्रकाशितः क्रियते। सर्वेषु इन्द्रियेषु प्राप्यकारिता विद्यते। विषयनिष्ठः साक्षात्कारं प्रति आलोकसंयोगः महत्त्वम् उद्भूतरूपं कारणं भवति जन्यप्रत्यक्षे।

**संयोगः**– चक्षुषा घटप्रत्यक्षे संयोगः सन्निकर्षः।[7] 'चक्षुरिन्द्रियं द्रव्यं, घटद्रव्यं द्रव्यद्रव्ययोः संयोगः जगत्प्रसिद्धं विद्यते। अतः घटप्रत्यक्षे संयोगः सन्निकर्षः भवति। द्रव्यप्रत्यक्षे महत्परिमाणं समवायसम्बन्धेन कारणम् अस्ति। महत्परिमाणं यावत् द्रव्यस्य प्रत्यक्षं नैव सम्भवति। यस्मिन् द्रव्ये परिमाणं समवायेन तिष्ठति, तस्यैव द्रव्यस्य प्रत्यक्षं भवति द्रव्यचाक्षुषं प्रति चक्षुस्संयोगः कारणं विद्यते। संयोगसन्निकर्षः द्रव्यद्रव्ययोः मध्ये भवति।

**संयुक्तसमवायः**– घटगतरूपप्रत्यक्षे संयुक्तसमवायसन्निकर्षः। घटप्रत्यक्षे संयोगः घटे रूपं समवायसम्बन्धेन भवति घटं द्रव्यं, रूपं गुणः, गुणगुणिनोः समवायेन तिष्ठति गुणः अस्ति अस्य असौ गुणिः द्रव्यः, द्रव्यगुणयोः सम्बन्धः समवायः भवति। द्रव्ये गुणकर्मजातयः समवायेन तिष्ठति। पञ्चज्ञानेन्द्रियेषु श्रोत्रेन्द्रियं त्यक्त्वा अन्येन्द्रियस्य संयुक्तसमवायसन्निकर्षेण गुणकर्मजातयः प्रत्यक्षः भवति। येनेन्द्रियेण पदार्थस्य ग्रहणं भवति, तेनेन्द्रियेण पदार्थस्य जातिः अभावश्च ग्रहणं भवति।

**संयुक्तसमवेतसमवायः**– घटगतरूपत्वप्रत्यक्षे संयुक्तसमवतसमवाय–सन्निकर्षः। रूपे रूपत्वं समवायेन तिष्ठति। जातिव्यक्तयोः सम्बन्धः समवायः। रूपं व्यक्तिः रूपत्वं जातिः रूपे रूपत्वं समवायेन विद्यते द्रव्यरूपगतरूप–त्वजातिः प्रत्यक्षे संयुक्तसमवेतसमवायसन्निकर्षः।

---

7. तर्कसंग्रहः

**समवायः**- शब्दप्रत्यक्षे समवायसन्निकर्षः, शब्दः श्रोत्रेण ग्राह्या, श्रोतुं तु कर्णविवरवर्त्याकाशस्य नभः प्रदेशः। शब्दः आकाशे समवायेन तिष्ठति। गुणगुणिनश्च समवायः।

**समवेत्समवायः**- शब्दत्वप्रत्यक्षे समवेतसमवायसन्निकर्षः। शब्दे शब्दत्वं समवायसम्बन्धेन भवति। श्रोत्रसमवेते शब्दे शब्दत्वस्य समवायात्।[8]

**विशेषणविशेष्यभावः**- अभावप्रत्यक्षे विशेषणविशेष्यभावः सन्निकर्षः, घटाभावाद् भूतलमित्यत्र चक्षुसंयुक्ते भूतले घटाभावं विद्यते।[9] अभावं प्रति योग्यानुपलब्धिः कारणमस्ति। घटाभाववद् विशेषणं भूतलं विशेष्यं अतः अभावप्रत्यक्षे विशेषणविशेष्यसन्निकर्षः विद्यते।

**घट-तन्नील-नीलत्व-शब्द-शब्दत्व-जातयः।**
**अभाव-समवायौ च ग्राह्याः सम्बन्धषट्कतः॥**[10]

अलौकिकसन्निकर्षः त्रिविधः सामान्यलक्षणाः, ज्ञानलक्षणाः, योगजलक्षणाश्चेति। प्रत्यक्षं प्रति इन्द्रियं करणं इन्द्रियार्थसन्निकर्षः व्यापार प्रत्यक्षं फलमिति। किमपि ज्ञानं प्रति आत्मा मनसा संयुज्यते, मन इन्द्रियेण इन्द्रियमर्थेनसन्निकृष्यते तदनन्तरं ज्ञानं भवति। प्रत्यक्षं प्रति उद्भूतरूपं महत्वं, वाङ्मनसंयोगः, कारणं विद्यते। ज्ञानसामान्यं प्रति आत्ममनसंयोगः कारणमस्ति। विशेषज्ञाने तत्तदिन्द्रियमनसंयोगः कारणं विद्यते। आलोकसंयोगोऽपि प्रत्यक्षं प्रति कारणमस्ति। तत्तदिन्द्रियं तत्तत्विषयसन्निकर्षजन्यज्ञानं रसविषयकं, रूपविषयकं, गन्धविषयकमादिज्ञानवानहं प्रतीतिः जायते। एकदा समये एकं ज्ञानमुत्पद्यते। "युगपद्ज्ञानानुत्पत्तिर्मनसो लिङ्गम्"[11] प्रथमक्षणे ज्ञानमुत्पद्यते द्वितीयक्षणे तिष्ठति, तृतीयक्षणे सजातीयमुत्पन्नकृत्वा विनष्टः जातः। प्रायः सर्वे दार्शनिकाः प्रत्यक्षप्रमाणं स्वीक्रियन्ते।

---

8. तर्कसंग्रहः
9. तर्कसंग्रहः
10. तर्कभाषा पृ.सं. 78
11. न्यायसूत्रम् 1.1.16

न्यायदर्शने द्वितीयं प्रमाणम् अनुमानम्, अनुमितिकरणमनुमानम्[12] अनुमितिः परामर्शजन्या भवति। व्याप्तिविशिष्टपक्षधर्मताज्ञानं परामर्शः[13], साध्यव्याप्यहेतुमान् पक्षः परामर्शः कथ्यते। हेतुनियतसाध्यसामानाधिकरण्यं व्याप्तिः व्याप्यस्य पक्षत्वादिवृत्तित्वं पक्षधर्मता इति। अनुमानं द्विविधं स्वार्थं परार्थञ्च।[14] स्वार्थं स्वप्रतिपत्तिहेतुजन्या भवति, परार्थञ्च स्वयं हेतुसाध्यमनुमाय परं प्रति बोधयितुं पञ्चाक्यवाक्यं प्रयुज्यते तत्परार्थानुमानम्।[15] पञ्चावयवास्तु प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि तत्राद्यं प्रतिज्ञास्ति। साध्यनिर्देशः प्रतिज्ञा[16]– यत्र साध्यस्य निर्देशः विशिष्टस्य परिग्रहवचनं प्रतिज्ञा साध्यधर्मविशिष्टपक्ष–प्रतिपादकं वचनं प्रतिज्ञा[17] यथा– पर्वतो वह्निमान् धूमात् इत्यत्र पर्वतः पक्षः, साध्यः वह्नि हेतुश्च धूमेति।

**हेतुः**– साध्यधर्मस्य साधनं हेतुरिति साधनवचनं हेतुः, तृतीयान्तं पञ्चम्यान्तं लिङ्गप्रतिपादकं वचनं हेतुः धूमहेतुभिः वह्न्यनुमानं जायते।

**उदाहरणम्**– साध्यसाधर्म्यात्कारणान्तधर्मभावी दृष्टान्त[18] इति। उदाहरणे साध्यसाधनसमानधर्मभावी विद्यते। तन्त्रे जगत्प्रसिद्धोदाहरणं स्वीक्रियते। उदाहरणं द्विविधं साधर्म्यवैधर्म्यभेदात्।

**उपनयः**– पक्षे लिङ्गोपसंहारवचनमुपनयः। साध्यव्याप्यहेतुमान् अयम् (पक्षः) उपनयः।

**निगमनम्**– पक्षे साध्योपसंहारवचनं निगमनम्[19] इति। तस्मात्तथेति। यथा महानसं वह्निमान् भवति। तथैव पर्वतोऽपि वह्निमान् अस्ति। एभिः अवयवाभिः परार्थानुमानं सम्यक्तया प्रचलिष्यति। परार्थानुमानं परमो न्यायः।

---

12. तर्कसंग्रहः
13. तर्कसंग्रहः
14. तर्कसंग्रहः
15. तर्कसंग्रहः
16. न्यायसूत्रम्– 1.1.33
17. तर्कभाषा पृ.सं. 340
18. न्यायभाष्यम्– 1.1.35
19. तर्कभाषा पृ.सं. 34

अनुमितिं प्रति व्याप्तिज्ञानं करणं, परामर्शो व्यापारः अनुमितिः फलमिति। न्यायदर्शने तुरीयं प्रमाणमुपमितिः विद्यते। उपमितिकरणमुपमानम्।[20] सादृष्य-ज्ञानमुपमितिः संज्ञासंज्ञिसम्बन्धज्ञानमुपमितिः यथा- गोसदृशो गवयः इत्यत्र संज्ञा गो संज्ञि गलकम्बलवान्, गवेतरगलकम्बलत्वं नीलगौ विद्यते। सादृश्य-निरूपितजन्यज्ञानमुपमितिः अस्ति। उपमितौ सादृश्यानं करणं, अतिदेश-वाक्यार्थस्मरणं व्यापारः, उपमितिफलमिति।

न्यायतन्त्रे अन्तिमं प्रमाणं शब्दः अस्ति। आप्तोक्तः शब्दः प्रमाणम्[21] आप्तस्तु रागद्वेषेर्ष्याराहित्वे सति यथार्थवक्ता, शाब्दबोधे पदज्ञानं करणं, पदार्थज्ञानं व्यापारः आकांक्षायोग्यतासत्तितात्पर्यज्ञानानि सहकारिणी शाब्दबोधः फलमिति।

**आकांक्षा**- येन पदेन विना यत्पदस्यान्वयाननुभावकत्वं तेन पदेन सह तस्याकाक्षेत्यर्थः- घटः, रामाः, मोहनः, अश्वः, श्वेतः इत्यादि वाक्यं न प्रमाणं भवति। यतोहि क्रियापदं विना कारकपदं नान्वयबोधः। अतः वाक्ये क्रियाकारकपदयोः सम्मेलन शाब्दबोधोत्पद्यते।

**योग्यता**- 'अर्थाबाधो योग्यता' "वह्निना सिञ्चति" इति वाक्यं न प्रमाणं सेञ्चनक्रिया जलेन सम्भवति, वह्नौ दाहकक्रिया विद्यते। वह्निना सिञ्चति सम्बन्धाभावः, अर्थस्य बाधवसात् शाब्दबोधजनकता नास्ति। अतः शाब्दबोधोऽपि नैव सम्भवति।

**आसत्तिः**- पदानामविलम्बेनोच्चारणं सन्निधिः- "गिरिर्भुक्तमग्निमान् देवदत्तेन" इत्यत्र गिरिः अग्निमान् शाब्दबोधः भविष्यति, परञ्च भुक्तं पदं व्यवधानं क्रियते, भुक्तं देवदत्तेन शब्दबोधोत्पद्यते परञ्च अत्रापि अग्निमान् इति पदेन व्यवधानः जायते, अतः पदद्वयस्य मध्ये सन्निकटता आवश्यकं विद्यते।

**तात्पर्यम्**- वक्तुः इच्छा तात्पर्यमिति। तात्पर्यज्ञानजन्यस्य उदाहरणं एतत् "सैन्धवमानय" इत्यत्र सैन्धवपदे लवणम् अश्वः उभयार्थनिष्ठता

---

20. तर्कसंग्रहः
21. तर्कामृतम्, शब्दखण्डः

विद्यते। गमनप्रकरणे सैन्धवपदस्यार्थः अश्वः भवति, भोजनप्रकरणे सैन्धवपदस्यार्थः लवणमिति। शाब्दबोधे वृतिज्ञानं कारणं स्वीक्रियते, अन्यथा एकसम्बन्धिज्ञानमपरसम्बन्धिस्मारकम् इति न्यायेन "घटम् आनय" इत्यत्र घटपदेन आकाशस्य स्मरणं जायते, घटशब्दः अस्ति, शब्दसमवायसम्बन्धेन आकाशे विद्यते। वृतिशक्तिलक्षणान्यतरसम्बन्धः अस्ति। घटपदेन वृत्तिसम्बन्धे घटे शक्तम्, अतः शाब्दबोधे वृत्तिज्ञानमावश्यकं विद्यते। शक्तं पदम् चतुर्विधम्- यौगिकं, रूढं, योगरूढं, यौगिकरूढञ्चेति। वैदिकलौकिकभेदेन शब्दद्विविधं विद्यते। किञ्चिदेव लौकिकं वाक्यं प्रमाणं, यदाप्तवक्तृकम्[22]- वैदिकवाक्यं प्रमाणमेव तिष्ठति। चतुर्विधप्रमाणातिरिक्तं यत् प्रमाणमस्ति तत् सर्वं चतुर्विधप्रमाणेष्वन्तरभावः क्रियते। न्यायतन्त्रे प्रमाणाप्रमाणयोः उभयोः परतः ग्राह्या भवति। प्रमात्वं न स्वतो ग्राह्यं संशयानुपपत्तितः[23] इति। ज्ञानग्राहकं तथा च प्रमाणग्राहकसामग्रीं भिन्ना- भिन्ना विद्यते। अतः न्यायप्रमाग्राह्यत्वं परतस्त्वं स्वीक्रियते। प्रमाणं प्राणभूततत्त्वं विद्यते प्रमाणं प्राणनिलयः[24] इति।

## सन्दर्भग्रन्थसूची


1. **तर्कभाषा,** माधुरीटीका, गजाननशास्त्री मुसलगॉवकरः, चौखम्बा सुरभारतीप्रकाशनम्, वाराणसी, 221001, संस्करणम् 2009
2. **न्यायसिद्धान्तमुक्तावली,** बालप्रियटीका, गजाननशास्त्री मुसल-गॉवकरः, चौखम्बा सुरभारतीप्रकाशनम्, वाराणसी, 221001, संस्करणम् 2011
3. **न्यायदर्शनम्** (वात्स्यायनभाष्यम्) प्रकाशिका टीका, ढुण्ढिराजशास्त्री, चौखम्बासंस्कृतभवनम्, वाराणसी, संस्करणम् 2010


22. तर्कभाषा-पृ. 111
23. कारिकावली- 126
24. विष्णुसहस्त्रनामस्त्रोतम्- 116

4. **न्यायभाष्यम्,** श्रीसुदर्शनाचार्यकृतं प्रसन्नपदव्याख्या, सम्पादकः द्वारिकादासशास्त्री, साधनाप्रेस, वाराणसी, संस्करणम् 1998

5. **भारतीयदर्शनम्,** जगदीशचन्द्रमिश्रः, चौखम्बासुरभारतीप्रकाशनम्, वाराणसी, संस्करणम् 2010

6. **भारतीयदर्शनम्,** डॉ. नन्दकिशोरदेवराजः, उत्तरप्रदेशहिन्दीसंस्थानम्, लखनऊ, रोहिताश्वप्रिण्टर्स, ऐशवागरोड, लखनऊ, संस्करणम् 2002

7. **नित्यकर्मपूजाप्रकाशः,** पं. लालबिहारीमिश्रः, गीताप्रेसः, गोरखपुरम्, उत्तरप्रदेशः, संस्करणम् 2019

❒❒❒

# न्यायदर्शने आत्मवादविमर्शः

-मञ्जुलताजेना *

भारतीयदर्शनानाम् अध्येतृषु विदित एव आत्मवादस्य महत्त्वातिशयं कीदृशं वर्तते। दार्शनिकात्मवादस्य गभीरतमो विचारः यथा न्यायबौद्धदर्शनयोः सुस्पष्टं विवेचितम् अस्ति। तथा किञ्चिद् विचार्यते।

तत्र नैयायिकानां मते जीवात्मपरमात्मभेदेन आत्मा द्वैविध्यं वर्णितमस्ति। न्यायदर्शनं परमात्मनि जगतः निमित्तकारणत्वमेकत्वं च मत्वा जीवानां चैतन्याश्रयत्वं नानात्वं नित्यत्वं च प्रतिपादयति। तत्र जीवेषु चतुर्दश आगन्तुकाः गुणाः निवसन्ति। स्वशास्त्रप्रसिद्धानां षोडशपदार्थानां वा तत्त्वज्ञानेन जीवोऽपवर्गो लभते।

न्यायशास्त्रे आत्मचिन्तनस्य क्रमविकाशयोः वैशिष्ट्यं समाकर्षकम् इत्येवं विदुषां मतम् अस्ति। अक्षपादगौतमकृतं न्यायसूत्रमेव प्राचीनतमो निधिरस्य न्यायदर्शनस्य। यतस्तत एवास्य न्यायशास्त्रस्य क्रमबद्धा शृङ्खला प्रचलति। यद्यपि न्यायसूत्राणां पर्यालोचनया स्फुटं प्रतीयते ततोऽपि प्राचीनतमत्वं शास्त्रस्यैतस्य।

प्रमाणादिषोडशपदार्थानां विवेचनावसरे न्यायदर्शनस्य प्रयोजनं निःश्रेयसाधिगतिः प्रतिपादितमिति। अत एव अक्षपादः प्रथमसूत्र एव स्वशास्त्रप्रसिद्धान् प्रमाणादिषोडशपदार्थान् उद्दिश्य तेषां यथार्थज्ञानतो निःश्रेयसलाभम् अभिदधाति। तथा च प्रमाणादिषोडशपदार्थानां तत्त्वज्ञानं दृष्टस्य लौकिकाभ्युदयलक्षणस्य निःश्रेयसस्य लाभः आत्मादिद्वादशविधानां प्रमेयाणां तत्त्वसाक्षात्कारात् तत्रापि मुख्यतयात्मसाक्षात्कारात् अपवर्गस्य लाभ

* शोधच्छात्रा, न्यायविभागः, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः, नवदेहली-110016

इति। तथा हि न्यायभाष्यकारः कथयति– "इह तु अध्यात्मविद्यायामात्मादिज्ञानं तत्त्वज्ञानं निःश्रेयसाधिगमोऽपवर्गप्राप्तिरिति"। श्रुतिरपि आत्मज्ञानस्य मुक्तिसाधनत्वं समुपवर्णयति– "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यो मैत्रेय्यात्मनो वा अरे दर्शनेन श्रवणेन मत्या वा विज्ञानेन इदं सर्वं विदितम्" इति। "तमेव विदित्वातिमृत्युमेति नान्यः पन्थाः विद्यन्ते अयनाय" इति च।

न्यायदर्शने तावत् जीवात्मा परमात्मा च आत्मशब्देन व्यपदिश्यते। आत्मा तु परमात्मा क्षेत्रज्ञश्चेति द्विविधः। परमात्मा ईश्वरः एकः एव। सुखदुःखादीनाम् आश्रयो जन्ममरणाद् अधीनश्च जीवात्मनः। नित्यज्ञानवान् सृष्टिस्थितिप्रलयकर्ता सर्वज्ञः सर्वशक्तिमान् ईश्वरः। आत्मलक्षणं तावत् ज्ञानाधिकरणम् आत्मा। जीवात्मपरमात्मनोः साधारणलक्षणम् इदम् उभयोर्विधिस्यापि आत्मनो ज्ञानतत्त्वात्। तत्र जीवस्य ज्ञानं तु नित्यम्, एकम्, प्रत्यक्षारूपं च। एवम् इच्छाधिकरणत्वम्, प्रयत्नाधिकरणत्वमपि आत्मनो लक्षणं भवतुमर्हति। उभयोर्विधे आत्मन्यपि ज्ञानेच्छाप्रयत्नानां विद्यमानात्।

यदा आत्मत्वजातिमान् आत्मेति लक्षणम्। सा च आत्मत्वजातिः जीवात्मनि परमात्मनि च वर्तते। जीवात्मनि सुखदुःखादीनां समवायिकारणता-वच्छेदकतया आत्मत्वं सिद्धम्। परमात्मनि अपि आत्मत्वं जातिरस्ति। आत्मा वा अरे द्रष्टव्यः इत्यादि श्रुतौ आत्मशब्दव्यवहारात्। तस्मिन् सुखादीनां स्वरूपयोग्यकारणतासत्त्वात् तदवच्छेदकतया च आत्मत्वसिद्धिः। न च ईश्वरे सुखदुःखादीनां प्रसङ्गः। तस्य सुखदुःखादीनां स्वरूपयोग्यकारणत्वे अपि अदृष्टशरीरादिरूपनिमित्तकारणाभावात् सुखादीनाम् अनुत्पत्तेः। ननु नित्यस्य स्वरूपयोग्यस्य फलम् अवश्यम्भावि ईश्वरे आत्मत्वजाति नास्त्येव, सुखदुःखादिजनकतायास्तत्र अभावात्। न च ईश्वरस्य दशमद्रव्यत्वात्प्रति ज्ञानवत्वेन ज्ञानाधिकरणत्वेन वा तस्य आत्मनि अन्तर्भावात् इति।

तर्हि चार्वाकमते चैतन्यविशिष्टो देह एव आत्मा बौद्धेषु माध्यमिकानां मते शून्यमेवात्मा। योगाचारबौद्धानां मते विज्ञानस्वरूपम् आत्मा। जैनानां मते देहपरिमाणो देहाद्यतिरिक्तो जीवात्मा। परन्तु नैयायिकानां मते– देहेन्द्रियेभ्यो

भिन्नो नित्यो विभु आत्मा इति अन्नंभट्टपादै रुक्तम्ः।

ज्ञानाधिकरणम् आत्मा इति जीवात्मपरमात्मनो यत् साधारणं लक्षणम्। तत् जीवात्मनि इत्थं प्रयोजनम्– अहं सुखी, अहं दुःखी, अहं जानामि इत्यादीनां ज्ञानानाम् अधिकरणम् आत्मा समवायेन ज्ञानवान् इत्यर्थः। आत्मत्वजातिमान् आत्मेति साधारणलक्षणम् अपि अत्र अनुगतम्। तत्र येषां मते आत्मा अहं प्रत्ययविषय इति आत्मनः प्रत्यक्षत्वम्। तेषां मते आत्मत्वजातिरपि प्रत्यक्षसिद्धा। येषां मते शरीराद्यतिरिक्ततया आत्मनः प्रत्यक्षत्वं नास्ति तेषां मते आत्मत्वजातेः न प्रत्यक्षसिद्धिः अपि तु अनुमेया। आत्मनि सुखदुःखादीनां समवायेन उत्पत्तौ सत्याम् अहं सुखी अहं दुःखी इति प्रतीतिः भवति। अत आत्मा सुखदुःखादिगुणानां समवायिकारणम्। सुखादीनां समवायिकारणता आत्मनि वर्तते। तस्याः समवायिकारणतायाः अवच्छेदको धर्मश्च आत्मत्वम्। आत्मनिष्ठा सुखादिसमवायिकारणता किञ्चिद्धर्मावच्छिन्ना कारणत्वात्, दण्डनिष्ठघटकारणतावत् इत्यनुमानप्रयोगः। कारणतावच्छेदकतया च यो धर्मः अनुमीयते तदेव आत्मवत् इति सुखादिसमवायिकारणतया आत्मत्वजातिः सिद्ध्यति। सा आत्मत्वजातिः जीवात्मनि अस्त्येव इति लक्षणसमन्वयः।

जीवात्मनो विशेषलक्षणं तु सुखाद्याश्रयत्वम्। सुखदुःखादीनां गुणानां समवायिकारणं जीवात्मा इत्यर्थः। ईश्वरस्य तु सुखाद्यभावात् न तत्र अतिव्याप्तिः। यद् ज्ञानसमवायिकारणत्वं जीवात्मत्वम्। परमात्मनो ज्ञानं तु नित्यम्, नित्यस्य च समवायिकारणं नास्तीति परमात्मा न ज्ञानसमवायिकारणम् इति न तत्र अतिव्याप्तिः। एवम् इच्छासमवायिकारणत्वं प्रयत्नसमवायिकारणत्वं च जीवात्मत्वम्। सुखादिमत्वमेव जीवलक्षणम्। आश्रयत्वकथनं तु समवायेन तस्य लक्षणत्वलाभाय इति केचित्।

अयम् आत्मा बुद्धिः, सुखं, दुःखम्, इच्छा, द्वेषः, प्रयत्नः, संख्या, परिमाणम्, पृथक्त्वम्, संयोगः, विभागः, भावनाख्यसंस्कारः, धर्मः, अधर्मः इति चतुर्दशगुणानां च आश्रयः। तदुक्तं कारिकावल्याम्– बुद्ध्यादिषट्कं संख्यादिपञ्चकं भावना तथा धर्माधर्मगुणा एते आत्मनः सः चतुर्दशः इति अहंकाराश्रयोऽयम् इति विभुबुद्ध्यादिगुणवान् इति च। वेदान्तिनां मते

आत्मा ज्ञानस्वरूपञ्च। नैयायिकानां मते तु ज्ञानम् आत्मनो न स्वरूपम् अपि तु धर्मविशेषः। एवम् आनन्दमपि नात्मनः स्वरूपम् अपि तु गुणविशेष एव। मुक्तावल्याम् आत्मा देहेन्द्रियेभ्यो भिन्नः सन् तिष्ठतीति तदा कस्यापि अनुभवस्याभावात् सर्वे विशेषगुणा अपि नश्यन्ति। तथा च मुक्तात्मनि ज्ञानसुखादिकम् अपि न विद्यते। विशेषगुणोच्छेदे हि आत्मनः स्वरूपेऽवस्थानं भवति।

## सन्दर्भग्रन्थसूची

1. न्यायदृष्ट्या आत्मवादानुचिन्तनम्
2. बौद्धधर्मदर्शनम्
3. बौद्धदर्शनम्
4. न्यायभाष्यम्
5. मुक्तावली
6. तर्कसंग्रहः
7. न्यायदर्शनविमर्शः
8. कारिकावली

❐❐❐

# कठोपनिषदः श्रेयप्रेयोमार्गविवेचनम्

**पूनम** *

भारतीयवाङ्मये उपनिषदः प्रमुखं स्थानमावहन्ति। वैदिकवाङ्मये या दार्शनिकविचारधारा उपलभ्यते तस्यैव विस्तृतं रूपम् उपनिषत्सु उपलभ्यते। उपनिषत्सु ब्रह्मतत्त्वस्य नानाप्रकारेण प्रतिपादनं कृतमस्ति। ब्रह्मणः अवाप्तेश्च अनेकानि साधनानि सन्ति साध्यश्च ब्रह्म एव वर्तते। तत्र ब्रह्मप्राप्तये श्रेयमार्ग एव अनुकरणीयः। प्रेयमार्गश्च जन्ममृत्योः चक्रे बध्नाति। परमात्मनः मार्गः नीरसः परन्तु तस्य परिणामः कल्याणकरः। प्रेयोमार्गश्च मनोरमः परन्तु दुष्परिणामकरः। सान्सारिकतायाः पक्षः प्रेयो भवति। अस्मिन् मार्गे अवलम्बमानस्य मनुष्यस्य दृष्टिः एतादृशी भवति। यत् यत्किञ्चिद् अपि मनसि प्रतिभाति तदेव स्वीकरोति अनन्तरं तस्य कोऽपि परिणामो भवेत्। प्रेयमार्गात् मुक्तये एतादृशी भावना स्यात् यत् वयं भोगं भुञ्जानः स्वयमेव भुक्ताः न स्याम्।

श्रेयमार्गावलम्बने त्यागस्य, संयमस्य, तपसः, तपस्यायाः आवश्यकता भवति। येषां परिणामः श्रेयस्करो यथा कर्षकः यदा क्षेत्रे अन्नं वपति तस्मिन् पूर्वं गृहे विद्यमानं बीजरूपम् अन्नं विकीर्णति येन गृहे विद्यमानम् अन्नं तु समाप्तं जायते परन्तु पश्चात् फसलरूपेण तदेव बीजं बहुगुणं मिलति। एवं पूर्वस्मिन् काले जायमानः परिश्रमः अनन्तरं सुपरिणामकरः भवति। तदेव श्रेयमार्गः अभिधीयते। जीवनस्य मुक्तेः मार्गोऽपि श्रेयमार्गाव-लम्बनस्य परिणामरूप एवास्ति।

कठोपनिषदि यदा नचिकेता तृतीयवररूपेण यमं मृत्युरहस्यं पृच्छति। यमराजः नचिकेतसः संकल्पस्य जिज्ञासायाः च परीक्षां करोति तं ब्रह्मज्ञानस्य

---

* शोधच्छात्रा, विशिष्टाद्वैतवेदान्तविभागः, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्व-विद्यालयः, नवदेहली।

अधिकारि च अवबुद्ध्य सर्वप्रथमं तं श्रेयप्रेयसोः मार्गयोः उपदेशं अदात्। यमराजः उवाच–

**अन्यच्छ्रेयोऽन्यदुतैव प्रेयस्ते उभयं नानार्थे पुरुषं सिनीतः।**
**तयोश्श्रेय आददानस्य साधु भवति हीयते अर्थाद्य उ प्रेयो वृणीते।**

मनुष्यस्य पुरतः द्वे मार्गे स्तः ये तम् आकर्षतः। एकः मनुष्यम् अज्ञाने बध्नाति अपरं च मोचयति। 'असतो मा सद्गमय तमसो मा ज्योतिर्गमय मृत्योर्मा अमृतं गमय' उपनिषदि अयं उपदेशः श्रेयमार्गाय एवास्ति। श्रेयमार्गः विवेकं जनयति प्रेयश्च अविवेकम्। श्रीमद्भगवद्गीतायामपि अर्जुनः श्रीकृष्णं श्रेयमार्गस्य उपदेशाय एव प्रार्थयति–

**यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे।**

अतः कठोपनिषद् आध्यात्मिकतायाः मानसरोवरः या ज्ञानस्य सरिताभिः पूरिताः। श्रेयमार्गस्य आलम्बनेन मनुष्यः आध्यात्मिकज्ञानस्य साक्षात्कारः कर्तुं शक्नोति। श्रेयप्रेयोमार्गयोः श्रीरङ्गरामानुजमुनिः स्वकीये भाष्ये नीरक्षीरविवेके हन्सस्य उदाहरणं प्रस्तौति। यथा हन्सः क्षीरात् नीरं विमुच्य क्षीरमेव गृह्णाति तथैव प्रकृष्टबुद्ध्या युक्तः विवेकी मनुष्यः प्रेयमागम् अपेक्ष्य श्रेय एव वृणीते। अज्ञानी अविवेकी तत्र कल्याणम् अपेक्ष्य प्रेयमार्गस्य आलम्बनं करोति तद्यथा –

**श्रेयश्च प्रेयश्च मनुष्यमेतः तौ सम्परीत्य विविनक्ति धीरः।**
**श्रेयो हि धीरोऽभिप्रेयसो वृणीते प्रेयो मन्दो योगक्षेमाद् वृणीते॥**

श्रीमद्भागवतेऽपि एवं वर्तते यत् राज्ञः उत्तानपादस्य द्वे भार्ये आस्ताम्। एका सुनीति अर्थात् सुष्ठुर्नीतिः यस्याः सा सुनीतिरिति श्रेयरूपा कल्याणमार्गस्य प्रवर्तिका। या स्वकीयं पतिं कल्याणरूपश्रेयमार्गे नेतुमिच्छति। अपरा सुरुचिः अर्थात् सुष्ठुरुचिः यस्याः सा सुरुचिरिति प्रेयमार्गे भौतिकसुखोपभोगाय स्वकीयपतिं नेतुमिच्छति। राज्ञः उत्तानपादेन सुनीतिं परित्यज्य सुरुचेः ग्रहणं कृतं येन राजा अनेकेभ्यः दुःखेभ्यः संयुज्य वनेषु पीडितः दुःखितः अभवत्। यदा सः सुनीतिं गृहीतवान् तदा कल्याणं प्राप्नोत। अतः श्रेयमार्गमेव अनुसरेत् तेनैव चिरस्थायीसुखं प्राप्तुं शक्यते। यस्य स्वरूपं सुलभतया न उपलभ्यते तस्य स्वरूपावबोधाय धर्ममार्गे गन्तव्यं तदैव उच्यते–

**"यतो ऽभ्युदयनिःश्रेयस्सिद्धिः स धर्मः"**

इति स्वकीयाभ्युदयनिःश्रेयस्सिद्धिः धर्मेण एव सम्भवति। ये सम्यग्रूपेण धर्मपूर्वकं जीवितुमिच्छन्ति। तेषां कृते वेदविहितधर्ममार्गमेव वर्तते। नान्यः पन्थः विद्यते, अयनाय इति श्रुतिवचनात् धर्मेण एव अभ्युदयो जायते।

**धर्मेण हीनाः पशुभिः समाना** इति नीतिवचनात् धर्मस्य प्राधान्यं दृश्यते। अत एव प्रेयमार्गं परित्यज्य श्रेयमार्गस्य आश्रये सर्वे गन्तव्याः। यतोहि श्रेयमार्गे गत्वा जीवः अध्यात्मसम्पन्नमार्गे गत्वा अध्यात्मसम्पन्नो भूत्वा भौतिकजीवनं प्रति त्यक्तैषणो भूत्वा परं सुखमयं जीवनं यापयति। श्रेयसः उपनिषत्सु द्विविधस्वरूपं दृश्यते सात्त्विकजीवनम्, दिव्यामृतजीवनम्। सात्त्विकजीवनयुक्तमनुष्यैः सह देवता संयुज्यन्ते। सात्त्विकजीवनमेव अन्तिमं लक्ष्यं न वर्तते अपितु सात्त्विकजीवनेन मनः प्रकाशितो भूत्वा सत्त्वगुणसम्पन्नो भूत्वा आत्मानुभूतये योग्यतां लभते। आत्मैव सृष्टेः मुख्यं तत्त्वं वर्तते। सात्त्विकजीवनाय श्रुतिस्मृतिषु भगवद्गीतादिसु उपदिश्यते। सात्त्विकजीवनस्य महत्त्वं प्रतिपादयन् गीतायामुच्यते यत् –

**श्रद्धया परमा तप्तं तपस्तत्त्रिविधं नरैः।**
**अफलाकाङ्क्षिभिर्युक्तैः सात्त्विकं परिचक्षते॥**

अर्थात् निष्कामभावनया तपयज्ञव्रतादिषु यो प्रवर्तते। सः सात्त्विक-गुणसम्पन्नो भवति। एवं सात्त्विकजीवनं यापयित्वा अन्तःकरणं सत्त्वगुणसम्पन्नं भवति। सत्त्वगुणसम्पन्नात् अन्तःकरणे विवेकोत्पद्यते विवेकात् जीवः संसारात् विमुच्यते।

तथैव कठोपनिषदि प्रतिपाद्यते –

**यदा सर्वे प्रमुच्यन्ते कामा ये अस्य हृदिश्रिताः।**
**अथ मर्त्यो अमृतो भवति अत्र ब्रह्म समश्नुते॥**

❒❒❒

# जैनदर्शने नयवादः

**-प्रशान्तजैनः ***

**विषय-प्रवेशः**

**"प्रमाणनयैरधिगमः"**[1] इति सूत्रे जैनदर्शने अधिगमस्य ज्ञानस्य साधनरूपेण प्रमाणं नयश्च उक्तम्। प्रमाणेन तु सकलवस्तोः ज्ञानं वर्तते एवं च नयेन वस्तोः एकांशस्य ज्ञानं निर्णयं च वर्तते कथितं च सर्वार्थसिद्धिमध्ये **"सकलादेशो प्रमाणाधिनाः विकलादेशो नयाधिनः।"**[2] नयः तु वस्तुः एकांशग्राही अस्ति एवं प्रमाणं तु सम्पूर्णवस्तुनः ग्रहणं करोति। वस्तुनि बहुगुणपर्यायाणि सन्ति। अनेन गुणेन पर्यायेण च वस्तोः निर्माणं जातः यथोक्तं तत्त्वार्थसूत्रे **"गुणपर्यायवद् द्रव्यम्"**।[3] तत् द्रव्यं वस्तुः जैनदर्शने अनेकान्तः इत्यपि शब्देन अभिधीयते, यथा आचार्याभिनवधर्म- भूषणयतिना न्यायदीपिका ग्रन्थे निर्दिष्टं **"अर्थोऽनेकान्तः"**[4] अनेके अन्ताः धर्माः सामान्यविशेषपर्याया गुणा यस्येति सिद्धोऽनेकान्तः।

जैनदर्शनम् अनेकान्तवादी दर्शनमस्ति। अनेकान्तस्य प्रवर्ति नयाधारेण वर्तते। नयेन विना जैनदर्शने एकमपि सूत्रं न कथितम्। उक्तं च-

**णत्थि णएहिं विहूणं सुत्तं अत्थो न जिनवरमदम्हि।**
**ते णयवावे णिउणा मुणिणो सिद्धान्तिया होन्ति।।**[5]

---

* शोधच्छात्रः, जैनदर्शनविभागः, श्रीलालबहादुरशास्त्रीराष्ट्रीयसंस्कृतविश्वविद्यालयः, नवदेहली।

1. आचार्यः उमास्वामिः, तत्त्वार्थसूत्रं, प्रथम-अध्यायः, सूत्रम्-6
2. आचार्यः पूज्यपादः, सर्वार्थसिद्धिः, प्रथम-अध्यायः, सूत्रम्-6
3. आचार्यः उमास्वामिः, तत्त्वार्थसूत्रं, पञ्चम-अध्यायः, सूत्रम्-38
4. लघु-अनन्तवीर्यः, न्यायदीपिका, तृतीय-प्रकाशम्
5. आचार्यः वीरसेनः, धवला, खण्डः-1, भागः-1, गाथा-68

नयज्ञानात् एव मोक्षं लब्धे मुनिना। आध्यात्मिकक्षेत्रे आत्मकल्याणाय नयज्ञानस्य महत् आवश्यकता यथा निर्दिष्टम्-

**"यद्यप्यात्मा स्वभावेन नयपक्षा-**
**तीतस्तथापिस तेन विना तथाविधो न**
**भवितुमर्हत्यनादिकर्मवशाद-**
**सत्कल्पनात्मकत्वादतो नयलक्षणमुच्यते।।**[6]

**नयः निरुक्त्यर्थः**

"नी" धातोः 'एरच्' प्रत्यये नयः शब्दनिष्पद्यते। "नीयतेऽनेनेति नयः"। जैनदर्शने 'नयशब्दस्य' निरुक्त्यर्थं सर्वप्रथमम् आचार्यवीरसेनः धवलाग्रन्थमध्ये प्रदर्शितवान्-उच्चारियमत्थपदं णिक्खेवं वा कयं तु दट्ठुण।

**अत्थं णयन्ति पच्चन्तमिदि तदो ते णया भणिया।।**[7]

अर्थात् उच्चरितवान् अर्थेषु पदेषु व तस्मिन् प्रयुक्ते निक्षेपः दृष्ट्वा अर्थात् ज्ञात्वा पदार्थस्य सम्यक्निर्णयं नीयति तस्मात् नयः इत्युक्तः।

**एवं च तत्त्वार्थाधिगमभाष्ये उक्तं-**

**जीवादीन् पदार्थान् नयन्ति प्राप्नुवन्ति, कारयन्ति, साधयन्ति, निर्वर्तयन्ति, निर्भासयन्ति, उपलम्भयन्ति, व्यञ्जयन्ति इति नयः।**[8]

नयशब्दस्य नीतिः इत्यपि अर्थं सम्भावितं, तत् अर्थं ग्राह्य आचार्यमल्लिषेणेन स्याद्वादमञ्जरीग्रन्थे कथितम्-

**नियते एकदेशविशिष्टोऽर्थः**
**प्रतीतिविषयमाभिरिति नीतयो नयाः।**[9]

---

6. आचार्यः देवसेनः, श्रुतभवनदीपकनयचक्रः
7. आचार्यः वीरसेनः, धवला, खण्डः-1, भागः-1, गाथा-3
8. तत्त्वार्थाधिगमभाष्य/1/35
9. आचार्यः मल्लिषेणः, स्याद्वाद-मञ्जरिः, श्लोक-28

**नयस्य स्वरूपम्-**

जैनदर्शनम् अनेकान्तवादी दर्शनं विद्यते। अनेकान्तात्मकः वस्तुः। वस्तुनि अस्ति-नास्तिः, एक-अनेकः, नित्य-अनित्यः इत्याद्यः परस्पर-विरोधिधर्मयुगलं वर्तेते। तस्य धर्मयुगलस्य एकसमये ज्ञानं तु प्रमाणरूपेण सम्पूर्णं सम्भवं परन्तु तस्य सम्पूर्णवस्तोः कथनम् एकसमये न सम्भवम्। तस्मात् वस्तोः स्वरूपस्य कथनाय वदनाय वर्णीताय एकः कथनपद्धतिः परमम् आवश्यकं वर्तते, जैनदर्शने अनेकान्तस्य कथनपद्धतिः स्याद्वादः इति शब्दैः अभिधीयते। स्याद्वादस्य प्रवृत्तिः नयाधारेण प्रवर्तेते। उक्तं च-

**स्याद्वादः सर्वथैकान्तत्यागात् किंवृत्तचिद्विधिः।**
**सप्तभङ्गनयापेक्षो हेयादेयविशेषकः॥104॥**[10]

नयः वक्तुः हृदयस्थितः वस्तुविवक्षा वर्तेते। नयस्य प्रवृत्तिः प्रमाणेन ग्रहितं पदार्थस्य कथनाय वक्तुः हृदयस्थितः कथनविवक्षा रूपेण अस्ति। जैनग्रन्थेषु उपलब्धं नयानां प्रमुखलक्षणानि सन्ति-

1. णाणं होवि पमाणं णओ वि णादुस्स हिदियभावत्थो।[11]
2. प्रमाणेन वस्तुसंगृहीतार्थैकान्शो नयः श्रुतविकल्पोः वा ज्ञातुरभिप्रायो नयः। नानास्वभावेभ्यो व्यावृत्य एकस्मिन् स्वभावे वस्तु नयति प्रापयतीति वा नयः।[12]
3. प्रमाणप्रकाशितार्थविशेषप्ररुपको नयः।[13]
4. ज्ञातुरभिप्रायो नयः। अभिप्राय इत्यस्य कोऽर्थः? प्रमाणपरिगृहीतार्थैक-देशवस्तवध्यवसायः अभिप्रायः।[14]
5. अनिराकृतप्रतिपक्षो वस्त्वन्शग्राहि ज्ञातुरभिप्रायो नयः।[15]

---

10. आचार्यः समन्तभद्रः, आप्तमीमांसा, श्लोक-104
11. आचार्यः वीरसेनः, तिलोयपण्णत्ति, अधिकार-1, गाथा- 68
12. आचार्यः देवसेनः, आलापपद्धतिः
13. आचार्यः अकलङ्कः, तत्त्वार्थराजवार्त्तिकम्, अध्यायः-1, सूत्रम्- 33
14. आचार्यः वीरसेनः, धवला, भाग-2
15. आचार्यः प्रभाचन्द्रः, प्रमेयकमलमार्तण्डः, अधिकार-6

6. निरपेक्षा नया मिथ्या सापेक्षा वस्तुतेऽर्थकृत।[16]

7. णाणासहावभरियं वत्थुं गहिऊण तं पमाणेण।

एयन्तणासाणट्ठं पच्छा णयजुञ्जणम् कुणह।।[17]

निष्कर्षतः अनेकान्ते वस्तुनि यः श्रुतज्ञानात्मकः विकल्पः एकं पक्षम्, एकान्तं विषयमधिकृत्य कथनं क्रियते, तत् श्रुतज्ञानात्मकपर्यायः नयः इति।

**नय-प्रमाणयोः भिन्नता**

जैनदर्शने अधिगमसाधनरूपेण प्रमाणं नयश्च गृहीतवान्। प्रमाणं नयश्च ज्ञानस्य साधनरूपेण निर्दिष्टं परन्तु तयोः मध्ये भेदः स्तः।

**ज्ञानापेक्षा भिन्नता-**

**"सम्यग्ज्ञानं प्रमाणं"**[18] इति वचनैः न्यायदीपिकायां आचार्याभिनव-धर्मभूषणयतिना ज्ञानं प्रमाणरूपेण कथितम् एवं च **"तत् प्रमाणे"**[19] अनेन सूत्रेण आचार्येण उमास्वामिना मतिश्रुतावधिमनःपर्ययकेवलानि इति पञ्चज्ञानानि प्रमाणरूपेण वर्णितं। अर्थात् मतिज्ञानं, श्रुतज्ञानं, अवधिज्ञानं, मनःपर्ययज्ञानं केवलज्ञानं च इति जैनदर्शने वर्णितं सर्वाणि पञ्चज्ञानानि प्रमाणरूपं निर्दिष्टं परन्तु नयस्य प्रवृत्ति श्रुतज्ञानमेव संभवति न अन्यज्ञानेषु। यथा निर्दिष्टं **"श्रुतमूला नयाः सिद्धा"**।[20] आचार्यविद्यानन्दिना तार्किकरूपेण अस्मिन् विषये उक्तं-

**मतेरवधितो वापि मनःपर्ययतोपि वा।**
**नान्शोऽस्ति नयानां वर्तनं ननु।।24।।**

---

16. आचार्यः समन्तभद्रः, आप्तमीमांसा, श्लोक-108
17. आचार्यः माइल्लधवलः, द्रव्यस्वभावप्रकाशकनयचक्रः, गाथा- 172
18. लघु-अनन्तवीर्यः, न्यायदीपिका, प्रथम-प्रकाशम्
19. आचार्यः उमास्वामिः, तत्त्वार्थसूत्रं, प्रथम-अध्यायः, सूत्रम्-10
20. आचार्यः विद्यानन्दिः, तत्त्वार्थश्लोकवार्तिकम्, 2/1/6/श्लो.27/367

**निःशेषदेशकालार्थागोचरत्वविनिश्चयात्।**
**तस्येति भाषितं कैश्चिद्युक्तमेव तथेष्टिम्॥25॥**

**त्रिकालगोचराशेषपदार्थान्शेषु वृत्तितः।**
**केवलज्ञानमुलत्वमपि तेषां न युज्यते॥26॥**

**परोक्षाकारतावृत्तेः स्पष्टत्वात् केवलस्य तु।**
**नयाः सिद्धा वक्ष्यमाणाः प्रमाणवत्॥27॥**

**प्रधानाप्रधानापेक्षा भिन्नता-**

प्रमाणं नयात् पूज्यतरं वर्तते, यतो हि यत् ज्ञानं प्रमाणेन गृहीतस्य द्रव्यस्य एकांशं विषयं करोति तत् ज्ञानं नयरूपं निर्दिष्टं एवं च सर्वाणि पञ्चज्ञानानि प्रमाणं वर्तते एवं नयः तु श्रुतज्ञानमेव। यथोक्तं-

**अभ्यर्हितत्वात्प्रमाणस्य पूर्वनिपातः। ......कुतोऽभ्यर्हितत्वम्। नयप्ररुपणप्रभवयोनित्वात्।**[21]

एवमपि प्रमाणस्य विषयं नयात् अधिकं वर्तते यथा कथितम्-

**न ह्येवं, व्यवहारस्य पूज्यतरत्वान्निश्चयस्य तु पूज्यमत्वात्। ननु प्रमाणलक्षणो योऽसौ व्यवहारः स व्यवहारनिश्चमनुभयं च गृह्णन्नप्यधिकविषयत्वात्कथं न पूज्यतमो। नैवं नयपक्षातीतमानं कर्तुमशक्यत्वात्। तद्यथा निश्चयं गृह्णन्नपि अन्ययोगव्यवच्छेदनं न करोतीत्यन्ययोगव्यवच्छेदाभावे व्यवहारलक्षणभावक्रियां निरोद्धुमशक्तः। अत एव ज्ञानचौतन्ये स्थापयितुमशक्य एवातमानमिति।**[22]

**एकान्तानेकन्तापेक्षा भिन्नता-**

सम्पूर्णवस्तुगृह्णत्वात् प्रमाणम् अनेकान्तं विषयं क्रियते परन्तु नयः तु एकांशगृह्णत्वात् एकान्तं विषयं क्रियते। अत्र ध्यातव्यं यत् नयस्य विषयं सम्यगेकान्तं न मिथ्यैकान्तम्। सापेक्षकथनं सम्यगेकान्तम् एवं निरपेक्षकथनं

---

21. आचार्यः पूज्यपादः, सर्वार्थसिद्धिः, प्रथमाध्यायः, सूत्रम्- 6
22. जैनेन्द्र-वर्णी, जैनेन्द्र-सिद्धान्त-कोषः

मिथ्यैकान्तं वर्तते। प्रमाणनययोः एकान्तानेकान्तविषये आचार्येण अकलङ्केन राजवार्तिके स्पष्टम् उक्तं यत्-

**सम्यगेकान्तो नय इत्युच्यते। सम्यग्नेकान्तः प्रमाणम्। नयार्पणादेकान्तो भवति एकनिश्चयप्रवणत्वात्, प्रमाणार्पणादनेकान्तो भवति अनेकनिश्चयाधिकरणत्वात्।**[23]

**नयस्य प्रमाणिकता-**

अत्र प्रश्नसम्भवति यत् यदि नयः प्रमाणात् भिन्नं वर्तते तर्हि नयम् अप्रमाणमस्ति अर्थात् नयज्ञानम् अप्रामाणिकज्ञानं वर्तते एवं यदि नयः प्रमाणम् अस्ति तर्हि केन प्रकारेण तस्मात् भेदः सम्भवति अर्थात् तत्र एकं प्रमाणमेव ज्ञानस्य साधनं वर्तते न अन्यः नयादिः?

आचार्यः विद्यानन्दिः तत्त्वार्थश्लोकवार्तिके सुष्ठुरूपेण अस्य प्रश्नस्य समाधानं कृतवान्। आचार्यानुसारेण नयः न तु प्रमाणं वर्तते न अप्रमाणं नयः तु प्रमाणैकदेशः वर्तते। यथा कथितं-

**"नाप्रमाणं प्रमाणं वा नयो ज्ञानात्मको मतः।**
**स्यात्प्रमाणैकदेशस्तु सर्वथाप्यविरोधतः।।**[24]

अर्थात् नयः ज्ञानात्मकत्वात् नाप्रमाणं न प्रमाणम् अपि तु प्रमाणैकदेशः वर्तते। यथा सागरस्य अन्शः (तरङ्गः) न तु सागरात् भिन्नं वर्तते न सागरात् अभिन्नमेव सः तु सागरस्य एकदेशी वर्तते तथैव नयः ज्ञानात्मकत्वात् नाप्रमाणं न प्रमाणम् अपि तु प्रमाणैकदेशः वर्तते। यथा निर्दिष्टं-

**"स्वार्थनिश्चायकत्वेन प्रमाणं नय इत्यसत्।**
**स्वर्थैकदेशनिर्णीतिलक्षणो हि नयः स्मृतः।।4।।**

**नायं वस्तु न चावस्तु वस्त्वंशः कथ्यते यतः।**
**नासमुद्रः समुद्रो वा समुद्रान्शो यथोच्यते।।5।।**

---

23. आचार्यः अकलङ्कः, तत्त्वार्थराजवार्तिकम्, प्रथमाध्यायः, 16/7/35/28
24. आचार्यः विद्यानन्दिः, तत्त्वार्थश्लोकवार्तिकं, नयविवरणम्, श्लोकः-10

**तन्मात्रस्य समुद्रत्वेशेषांशस्यासमुद्रता।**
**समुद्रबहुता वा स्यात्तत्त्वे क्वाऽस्तु समुद्रवत्।।6।।**

**यथांशिनि प्रवृत्तस्य ज्ञानस्येष्टा प्रमाणता।**
**तथांशेष्वपि किन्न स्यादिति मानात्मको नयः।।7।।**

**तत्रान्शिन्यपि निःशेषधर्माणां गुणतागतौ।**
**द्रव्यार्थिकनयस्यैव व्यापारान्मुख्यरूपतः।।8।।**

**धर्मधार्मिसमूहस्य प्राधान्यार्पणया विदः।**
**प्रमाणत्वेन निर्णीतेः प्रमाणादपरो नयः।।9।।**

यथा अंशः अंशीतः न भिन्नमस्ति न अभिन्नमस्ति सः तु अंशिनः एकदेशं वर्तते तथैव नयः प्रमाणस्य अंशः वर्तते ज्ञानात्मकत्वात् तर्हि सः तु प्रमाणैकदेशः वर्तते। अतः नाप्रमाणिकं नयः इति सिद्धम्।

**नयस्य भेदः-**

नयानां भेदः संख्यात-असंख्यात-अनन्तः सम्भवः। संख्यातेषु अपि तस्य द्वौ, त्रयः, सप्त, सप्तचत्वारिन्शत् भेदाः उपलब्धम्। "जावदिया वयणवाह तावदिया चेव होन्ति णयवादा" अर्थात् यदेव वचनविकल्पं सम्भवं तदेव नयवचनं भवति। यतो हि वचनविकल्पं असन्ख्यातम् अस्ति तर्हि नयविकल्पमपि असन्ख्यातमेव। एवं ज्ञानस्य विकल्पाः अनन्तः सम्भवः तस्मात् ज्ञानविकल्पापेक्षा नयः अनन्तः अपि कथितम्। संख्यातेषु सम्भवः भेदः निच्चौः निर्दिष्टम्-

**द्वौ भेदौ**

नयस्य द्वौ भेदः द्विप्रकारेण सम्भवः। प्रथमप्रकारेण सिद्धन्तापेक्षा[25] एवं द्वितीयप्रकारेण अध्यात्मापेक्षा अस्ति। सिद्धन्तापेक्षा द्रव्यार्थिकं पर्ययार्थिकं इति द्वौ भेदः नयस्य स्तः। एवं अध्यात्मापेक्षा[26] निश्चयं व्यवहारं इति द्वौ भेदः स्तः।

---

25. आचार्यः मईल्लधवलः, द्रव्यस्वभावप्रकाशकनयचक्रः, गाथा- 183
26. आचार्यः देवसेनः, आलापपद्धत्तिः

**सिद्धान्तापेक्षाभेदः-**

1. **द्रव्यार्थिकनयः**- द्रव्यम् अर्थः यस्य सः द्रव्यार्थिकः नयः।[27] यथा कनकमानय इति। अत्र कनकं वक्तुः प्रयोजनं वर्तते तर्हि सः कुण्डलं, मुकुटम् इत्यादि केचित् अपि कनकनिर्मितम् आभूषणं आनयति।

2. **पर्यायार्थिकनयः**- पर्यायम् अर्थः यस्य सः पर्यायार्थिकः नयः।[28] यथा कुण्डलमानय इति। अत्र कनकनिर्मितं कुण्डलम् वक्तुः प्रयोजनं वर्तते तर्हि सः कुण्डलमेव आनय न तु मुकुटादि।

**अध्यात्मापेक्षाभेदः-**

1. **निश्चयनयः**- अभेदानुपचारतया वस्तु निश्चीयत इति निश्चयः।[29] यथा ज्ञानी जीवः। अत्र यः ज्ञानी सः एव जीवः एवं यः जीवः सः एव ज्ञानी इति द्विकथनं समानमेव निश्चयनयस्यबलात्। अतः यः गुण-गुणिना अभेदं कृतवान् सः नयः निश्चयनयः इति।

2. **व्यवहारनयः**- भेदोपचारतया वस्तु व्यवह्रीयत इति व्यवहारः।[30] यथा आत्मनः ज्ञानम्। अत्र आत्मा भिन्नं वस्तु एवं ज्ञानमपि भिन्नं वस्तु अस्ति तयोः मध्ये सम्बन्धं दृष्ट्वा भेदं प्रदर्शितवान्। अतः यः गुण-गुणिना भेदं कृतवान् सः नयः व्यवहारनयः इति।

**त्रयः भेदाः**

ज्ञाननयः, अर्थनयः, शब्दनयः च इति त्रिभेदात् नयस्य त्रयः भेदः। लोकेऽस्मिन् वस्तोः तिस्रः सत्ता सन्ति। प्रथमसत्ता ज्ञानापेक्षा, द्वितीयसत्ता अर्थापेक्षा, तृतीयसत्ता शब्दापेक्षा। यथा गोः इति शब्दं प्रयुक्ते सति एका सत्ता गोः इति शब्दरूपं क्रियते द्वितीयसत्ता गोः इति शब्देन श्रुत्वा ज्ञाने

---

27. आचार्यः पूज्यपादः, सर्वार्थसिद्धिः, प्रथमाध्यायः, सूत्रम्-6
28. आचार्यः पूज्यपादः, सर्वार्थसिद्धिः, प्रथमाध्यायः, सूत्रम्-6
29. आचार्यः देवसेनः, आलापपद्धत्तिः
30. तदेव

निर्मितं गोचित्रं रूपं ज्ञानसत्ता अस्ति एवं तृतीयसत्ता गोः इति लोके प्रसिद्धं शावलयादियुक्तं गोः इति पशुविशेषः रूपम् अर्थसत्ता अस्ति। अस्मिन् सन्दर्भे श्लोकवार्तिकं निर्दिष्टम्-

**"सर्वे शब्दनयास्तेन परार्थप्रतिपादने।**
**स्वार्थप्रकाशने मातुरिमे ज्ञाननयाः स्थिताः।।110।।**
**तैर्नीयमानवस्त्वंशा कथ्यन्तेऽर्थनयाश्च ते।**
**त्रैविध्यं व्यवतिष्ठन्ते प्रधानगुणभावतः"।।111।।**[31]

**सप्त भेदाः**

आचार्येण उमास्वमिना स्वकीयग्रन्थे तत्त्वार्थसूत्रे प्रथमाध्याये अन्तिमसूत्रे नयस्य सप्त भेदः उक्तं-

**नैगमसंग्रहव्यवहारऋजुसूत्रशब्दसमभिरूढएवंभूताः नयाः।**[32]

अस्मिन् सूत्रे आचार्यः सप्त नयानां नामोल्लिखितं तेषां विशेषस्वरूपम् आचार्यः पूज्यपादः तत्त्वार्थसूत्रस्यटिकायां सर्वार्थसिद्धियां प्रदर्शितवान्-

1. **नैगमनयः**- अनभिनिर्वृत्तार्थसंकल्पमात्रग्राहि नैगमः।
2. **संग्रहनयः**- स्वजात्यविरोधेनैकध्यमुपानीय पर्यायानाक्रान्तभेदानविशेषेण समस्तग्रहणात् संग्रहः।
3. **व्यवहारनयः**- संग्रहनयाक्षिप्तानामर्थानां विधिपूर्वकमवहरणं व्यवहारः।
4. **ऋजुसूत्रनयः**- ऋजुं प्रगुणं सूत्रयति तन्त्रयतीति ऋजुसुत्रः।
5. **शब्दनयः**- लिङ्गसंख्यासाधनादिव्यभिचारनिवृत्तिपरः शब्दनयः।
6. **समभिरुढः**- नानार्थशमभिरोहणात्समभिरुढः। यतो नानार्थान् समतीत्यैकम् अर्थमाभिमुख्येन रुढः समभिरुढः।
7. **एवंभूतः**- येनात्मना भूतस्तेनैवाध्यवसाययतीति एवंभूतः। स्वाभिप्रेत-क्रियापरिणतिक्षणे एव स शब्दो युक्ते नान्यदेति।

---

31. आचार्यः विद्यानन्दिः, तत्त्वार्थश्लोकवार्तिकम्, नयविवरणम्, श्लोकः- 110,111
32. आचार्यः उमास्वामि, तत्त्वार्थसूत्रम्, प्रथमाध्यायः, सूत्रम्- 33

**सप्तचत्वारिंशत् भेदाः**

नयानां सप्तचत्वारिंशत् भेदाः आचार्येण अमृतचन्द्रेण रचितं प्रवचन-सारग्रन्थोपरितत्तपर्यवृत्तिनाम्नाटीकायां परिशिष्टे चर्चां कृतम्। तत्र उपलब्धं सप्तचत्वारिंशत् नयानां अभिधानाः सन्ति-

(1) द्रव्यनयः (2) पर्यायनयः (3) अस्तित्वनयः (4) नास्तित्वनयः (5) अस्तिनास्तित्वनयः (6) अवक्तव्यनयः (7) अस्तित्व-अवक्तव्यनयः (8) नास्ति-अवक्तव्यनयः (9) अस्तित्व-नास्तित्व-अवक्तव्यनयः (10) विकल्पनयः (11) अविकल्पनयः (12) नामनयः (13) स्थापनानयः (14) द्रव्यनयः (15) भावनयः (16) सामान्यनयः (17) विशेषनयः (18) नित्यनयः (19) अनित्यनयः (20) सर्वगतनयः (21) असर्वगतनयः (22) शून्यनयः (23) अशून्यनयः (24) ज्ञानज्ञेय-अद्वैतनयः (25) ज्ञानज्ञेय-द्वैतनयः (26) नियतिनयः (27) अनियतिनयः (28) स्वभावनयः (29) अस्वभावनयः (30) कालनयः (31) अकालनयः (32) पुरुषकारनयः (33) दैवनयः (34) ईश्वरनयः (35) अनीश्वरनयः (36) गुणीनयः (37) अगुणीनयः (38) कर्तृनयः (39) अकर्तृनयः (40) भोक्तृनयः (41) अभोक्तृनयः (42) क्रियानयः (43) ज्ञाननयः (44) व्यवहारनयः (45) निश्चयनयः (46) अशुद्धनयः (47) शुद्धनयः।

**उपसंहारः-**

यतो हि जैनदर्शनम् अनेकान्तवादिदर्शनम् अस्ति तर्हि जैनदर्शने सर्वाणि कथनानि सापेक्षं वर्तते तस्मात् नयस्य ज्ञानम् आवश्यकं वर्तते। वस्तवेकांशग्राहि श्रुतज्ञानस्य विकल्पाः नयः। नयः प्रमाणात् भिन्नमभिन्नं वर्तते एवं प्रमाणैकदशत्वात् प्रामाणिकमपि अस्ति। जैनदर्शने विविधस्थाने विविधनयप्रयुक्तमस्ति यथा अध्यात्मकथने निश्चय-व्यवहारं सिद्धान्तकथने द्रव्यार्थिक-पर्यायार्थिकं च। उचितस्थाने प्रयुक्तं उचितनयं ज्ञात्वा जीवैः ज्ञानं प्राप्तम्।

नयस्य सामाजिकोपयोगितापि अस्ति। लोके सर्वविवादः कथनविवक्षा अज्ञानात् भवति। यदि कथनविवक्षायाः सम्यक्प्रकारेण निर्णयं जातः तर्हि

उत्पन्नानां विवादानां समाधानं स्वतः भवति। कथनविवक्षायाः सम्यकग्ज्ञानं नयस्य ज्ञानात् उत्पादयति तर्हि समाजिककल्याणाय नयज्ञानं परमावश्यकमस्ति।

दर्शनक्षेत्रेऽपि समुत्पन्न विवादः नयज्ञानात् एव समाधेयः। दर्शनेषु परस्परं विरोधिकथनस्य दर्शनं नित्यमुप्लब्धं यथा बौद्धः क्षणिकवादी मीमांसकः नित्यवादी यदि ते परस्परं विवक्षायाः ज्ञानं करिष्यन्ति तर्हि सर्वविवादस्य समाधानं भवति।

तस्मात् जगतकल्याणाय आत्मकल्याणाय दार्शनिकनिर्णयाय विवाद-समाधानाय पक्षपातं रहितं भूत्वा अध्येतव्यं नयवादः।

## सहायकग्रन्थसूची


1. अकलङ्काचार्यः, *तत्त्वार्थराजवार्तिकम्* (तत्त्वार्थसूत्रस्य वार्तिकम्), महेन्द्रकुमारन्यायाचार्यः (सं), भारतीयज्ञानपीठम्, दिल्ली, 1982।
2. अभिनव-धर्मभूषणयतिः, *न्यायदीपिका*, दरबारीलाल कोठीया (सं.), वीर-सेवा-मन्दिरम्, सहारनपुरम्, 1945।
3. उमास्वामी-आचार्यः, *तत्त्वार्थसूत्रम्*, (सर्वार्थसिद्धि-वृत्ति-समन्वितम्), सिद्धान्ताचार्यः फूलचन्दः (सं), भारतीयज्ञानपीठम्, दिल्ली, 2013।
4. कुन्दकुन्दाचार्यः, *प्रवचनसारः*, (तत्त्वप्रदीपिका-तत्त्पर्यवृति-व्याख्या-द्वयसमन्वितम्), अमृतचन्द्राचार्यः (व्या.)- जयसेनाचार्यः (व्या.) (क्रमानुरूपम्), हिम्मतलाल-जेठालालशाहः (अनु.), श्री-दिगम्बर-जैन-स्वाध्याय-मन्दिर-ट्रस्टः, सोनगढः, 2010।
5. पुष्पदन्त-भूतबली-आचार्यौ, *षट्खण्डागमः* (धवला-टीका-समन्वितम्), वीरसेनाचार्यः (व्या.), हीरालालजैनः (सं.), जैन-संस्कृति-संरक्षक-संघः, सोलापुरम्, 2000।
6. प्रभाचन्द्राचार्यः, *प्रमेयकमलमार्तण्डः*, आर्यिका-जिनमति (अनु.), कमल-प्रिण्टर्स, किशनगढः, राजस्थानम्।

7. मल्लिषेणाचार्यः, *स्याद्वादमञ्जरी*, जगदीशचन्द्रजैनः (अनु.), परम-श्रुत-प्रभावक-मण्डलम्, आगासः, 1970।

8. विद्यानन्दाचार्यः, *तत्त्वार्थश्लोकवार्तिकालङ्कारः* (तत्त्वार्थसूत्रस्य वार्त्तिकम्), माणिकचन्द-कौन्देय-न्यायाचार्यः (सं.), वर्धमान-पार्श्वनाथशास्त्री (प्र.), सोलापुरम्, 1951।

9. समन्तभद्राचार्यः, *आप्तमीमान्सा*, जुगलकिशोर-मुख्तारः (अनु.), वीरसेवामन्दिरप्रकाशनम्, दरियागन्जः, 1978।

10. सिद्धसेन-दिवाकराचार्यः, *सन्मति-तर्क-प्रकरणम्*, (तत्त्वबोधविधायिनी टीकासमन्वितम्), अभयदेवसूरिः (वृत्तिकारः), जयसुन्दरसूरिः (अनु.), दिव्यदर्शन-ट्रस्टः, गुजरातप्रान्तः, 2011।

11. वर्णी-जिनेन्द्रः, *जैनेन्द्र-सिद्धान्त-कोशः*, भारतीय-ज्ञानपीठम्, दिल्ली, 2010।

❒❒❒

# वैशेषिकदर्शनदृष्ट्या परमाणुवादविमर्शः

**-सुमनकुमारझा***

**श्रोतव्यः श्रुतिवाक्येभ्यः मन्तव्यश्चोपपत्तिभिः।**
**ज्ञात्वा च सततं ध्येयः एते दर्शनहेतवः॥**

इति शास्त्रमतानुसारेण परमाणुवादः वैशेषिकदर्शनस्यातीव महत्वपूर्ण-सिद्धान्तोऽस्ति। सर्वे पदार्थाः अवयवाः सन्ति। भिन्न-भिन्नावयवानां योगेन च एषां निर्मितः भवति। एते अनन्ताः सन्ति। अवयवानां मेलनङ्कृत्वा अवयवो भवति। प्रथमावयवः अपरस्य समवायिकारणं (उपादानकारणम्) भवति। यथा मृत्तिका घटस्य समवायिकारणमस्ति तन्तुश्च पटस्य समवायिकारणमस्ति। द्वयोः पदार्थयोः नित्यसम्बन्धः समवायः उच्यते। उक्तञ्च **'नित्यसम्बन्धः समवायः।'** अपि च **'यत्समवेतं कार्यमुत्पद्यते तत्समवायिकारणम्। यथा तन्तवः पटस्य पटश्च स्वगतरूपादेः।'**[1] अत्र समवेतशब्दस्यार्थोऽस्ति समवायसम्बन्धेन सम्बन्धः। पुनश्च प्रश्न जायते समवाय सम्बन्धः कः? पूर्वमेव मया वर्णितं नित्यसम्बन्धः समवायः। अपि च द्वयोः अयुतसिद्धवस्तुनोः सम्बन्धः समवायसम्बन्धः। अयुतसिद्ध-स्यार्थोऽस्ति अपृथक्सिद्धसम्बन्धः। ययोर्द्वयोर्मध्ये एकमविनश्यदपराश्रित-मेवावतिष्ठते तावयुतसिद्धो। उक्तञ्च- **'तावेवायुतसिद्धौ द्वौ विज्ञातव्यौ ययोर्द्वयोः। अनश्यदेकमपराश्रितमेवावतिष्ठते।'**[2] सामान्यरूपेणायुत-सिद्धस्यार्थोऽस्ति न युतसिद्धः (पृथक्सिद्धः) इति। युत शब्दः 'यु' मिश्रणा-मिश्रणयोः धातुना निष्पन्नोऽस्ति। यथा उत्पीटिका पुस्तकञ्च पारस्परिकाश्रयं

---

* शोधच्छात्रः, पौरोहित्यविभागः, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः, नवदेहली:-110016

1. तर्कसंग्रहः, डॉ. अनिता सेन गुप्ता, पू.सं. 71
2. तर्कसंग्रहः, आद्याप्रसाद, पू.सं. 26

विना स्वस्मिन् रूपे पृथक् पृथक् 'सिद्ध' इत्युच्यते अतः तत्र युतसिद्ध-सम्बन्धोऽस्ति। तन्तूनामाश्रयं विना तन्तुषु न पटाश्रितः पटं विनाऽपि तन्तोः सत्ता विद्यते। अतः अयुतसिद्धस्वीकृतयोः द्वयोः पदार्थयोः केवलं एकमेव अपराश्रितं भवति।[3] द्वावेव पारस्परिकरूपेण आश्रितौ न स्तः। मूले अयं समवायसम्बन्धः 'अयुतसिद्धवृत्तिः इत्युच्यते अर्थात् अयुतसिद्धयोः वृत्त्यर्थस्य सः।[4] तन्तुपटयोः गुणगुण्योः क्रियाक्रियावतोः जातिव्यक्तयोः विशेषनित्यद्रव्ययोः भवति।

**1. तन्तुपटयोः सम्बन्धः -**

तन्तु अवयवोऽस्ति पटः अवयवा अस्ति। तन्तुरूपावयवेषु पटरूपावयवा समवायसम्बन्धे न तिष्टति। तन्तुरूपावयवेषु विनष्टे सति अवयवा पटोऽपि विनिष्टं भवति।

**2. गुणगुण्योः सम्बन्धः -**

यथा- गन्धपुष्पयोः सम्बन्धः। पुष्पात् गन्धरूपगुणं पृथक् कर्तुं न शक्यते। पुष्पे विनष्टे सत्यपि गन्धरूपगुणः विनष्टं भवति।

**3. क्रियाक्रियावतोः**

कर्मरूपा क्रिया पृथिव्यापस्तेजोवायुमनस्तु द्रव्येषु समवायसम्बन्धे न तिष्टति।

**4. जातिव्यक्तयोः**

घटव्यक्तौ घटत्वजातिः समवायसम्बन्धेन वसति।

**5. विशेषनित्यद्रव्ययोः -**

पृथिव्यादिपरमाणु नित्यद्रव्याणि सन्ति। एषु परमाणुरूपनित्यद्रव्येषु विशेषनामपदार्थः समवायसम्बन्धेन वसति।[5] अस्मादेवं तन्तुषु समवायसम्बन्धेन

---

3. तर्कसंग्रहः, अनिता सेन गुप्ता, पू.सं. 71
4. तर्कसंग्रहः, आद्याप्रसाद, पू.सं. 86
5. तर्कसंग्रहः, डॉ. अनिता सेन गुप्ता, पृ.सं. 11

सम्बद्धो भूत्वा पटकार्यमुत्पन्नं भवति अतः तन्तुः पटस्य समवायिकारणमस्ति। अनेनैव प्रकारेण पटे समवाय सम्बन्धेन सम्बद्धो भूत्वा पटरूपमुत्पन्नं भवति, अतः पटः पटरूपस्य समवायिकारणमस्ति। इत्थमेव कपाले समवायसम्बन्धेन सम्बन्धो भूत्वा घटकार्यमुत्पन्नो भवति अतः कपालः घटकार्यस्य समवायिकारणमस्ति। समवायिकारणमेव सांख्यवेदान्तादिमतेन उपादानकारणमुच्यते।[6]

**निष्कर्षः**–

उपर्युक्तविश्लेषणेन स्पष्टं जातव्यं यत् घटस्य मृत्तिकया सह पटस्य तन्तुना सह नित्यसम्बन्धोऽस्ति। अवयवानां एषा प्रक्रिया पदार्थतः पर्वतपर्यन्तं समग्रवस्तुना समानरूपेण सम्प्राप्यते। अवयवानां एषा विभाजनप्रक्रिया चान्ते तस्यामवस्थां प्राप्नोति यस्य विभाजनं कदापि सम्भवः एव नास्ति। सा अवस्था अणोः अवस्थोच्यते। तदेव परमाणुरस्ति। पट सूक्ष्मादपि सूक्ष्मतरं भवति तदेव 'परमाणु' इत्युच्यते। यत् भेत्तुं छेत्तं न शक्यते यदभेद्यं अच्छेद्यं वाऽस्ति कणादेन स परमाणुरूच्यते। आकाशः कालः दिक् मनः आत्मा च भौतिकपरमाणवः सन्ति। एते न उत्पद्यन्ते नैषां संहारः कर्तुं शक्यते। प्रलयावस्थामपि एषां विनाशः न भवति। पृथिव्यापतेजोवाय्वादिभौतिकपरमाणवः सन्ति। एते महाभूता अपि कथ्यन्ते। एभिः परमाणुभिः एव सृष्टेः सूत्रपातं भवति। एते परमाणवः मूलभूतकारणरूपे नित्यपरमाणवः सन्ति उत्पत्तिकार्यरूपे एते अनित्याः भवन्ति।[7]

परिमाणदृष्ट्या परमाणवः स्वरूपद्वयमस्ति अणुः महच्च। परिमाणस्य अल्पतमसीमा परमाणुः अस्ति। वृहत्तमासीमा परममहच्चास्ति। परममहत्तु अगाम्यभूतत्वात् अनुमानगम्यमस्ति। अत एव महदणोः निर्मितिः भवति। परमाणुद्वयेन संयोगेन द्व्यणुकः परमाणुत्रयेण व संयोगेन त्र्यणुकः भवति। अतः परं भूतमानपरमाणवः द्व्यणुकमाश्रयन्ति। अणुद्वयोः विद्यमाना द्वित्वसंख्या वहुत्वस्य संख्यां भवितुमेव न शक्यते।

---

6. तर्कसंग्रहः, डॉ. अनिता सेन गुप्ता, पू.सं. 71
7. भारतीय धर्म और दर्शन– पू.सं. 274

# सिद्धान्तबिन्दुवेदान्तपरिभाषयोः प्रमालक्षणस्वरूपे वैषम्यम्

-जूही गर्ग*

**[अस्मिन् लेखे सिद्धान्तबिन्दुवेदान्तपरिभाषयोः उपवर्णितः प्रमालक्षणस्वरूपविचारः निरूपितः। तत्र प्रमालक्षणे प्रयुक्तविशेषणपदेषु कुत्र कुत्र उभयोर्ग्रन्थकारयोः वैमत्यमित्यादिविषयाणां तुलनात्मकरूपेण विचारः कृतः।]**

**प्रस्तावना**- दर्शनशास्त्रेषु वेदान्तदर्शनस्य स्थानं सर्वोपरि महत्त्वपूर्णञ्च विद्यते। तेष्वपि अद्वैतवेदान्तदर्शनं सर्वेषां वेदान्तदर्शनानां शिरोमणिरस्ति। अतः वेदान्तदर्शनम् इत्युक्ते अद्वैतवेदान्तदर्शनम् इत्येव अत्र स्वीक्रियते। वेदान्तदर्शनं मुख्यरूपेण प्रमेयतत्त्वप्रतिपादकं शास्त्रमस्ति। एतेषां प्रमेयतत्त्वानां सिद्धिः प्रमाणैः एव भवति। प्रमीयते अनेनेति व्युत्पत्त्या निष्पन्नोऽयं प्रमाणशब्दः प्रमाकरणार्थकोऽस्ति।[1] तत्र यथार्थज्ञानमेव प्रमा। तच्च ज्ञानं स्मृतियथार्थानुभव-भेदेन द्विविधम्।[2] तत्र संस्कारजन्यज्ञानं स्मृतिः तद्व्यतिरिक्तं यज्ज्ञानं स अनुभवो यथार्थायथार्थभेदेन द्विविधः। द्विविधप्रमायाः स्मृतेः प्रमात्वविषये दार्शनिकानां मतभेदोऽस्ति। कतिपयदार्शनिकास्तु प्रमाणजन्ययथार्थानुभवमेव प्रमापदेन व्यपदिशन्ति **तद्वति तत्प्रकारकोऽनुभवो यथार्थः**।[3] यथा शुक्तिविशिष्टशुक्तौ शुक्तित्वप्रकारकोऽनुभवो यथार्थः। एवमेव आचार्यवाचस्पति-मिश्रैरपि स्मृतिव्यतिरिक्तं प्रमास्वरूपं स्वीक्रियते- **अनधिगततत्त्वबोधः**

---

* शोधच्छात्रा:, अद्वैतवेदान्तविभागः, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृत-विश्वविद्यालयः, नवदेहली।

1. प्रमाकरणं प्रमाणम्- वेदान्तपरिभाषा, प्र. परि.
2. तर्कभाषा
3. तर्कसंग्रहः

**पौरुषेयो व्यवहार हेतुः प्रमा**।[4] एतद्भिन्नं केषाञ्चिन्मते स्मृतिरपि प्रमा एव। स्मृतिरप्रमा प्रमा वा इति वैमत्यसहितं वेदान्तपरिभाषाकारैः उद्धृते प्रमालक्षणे प्रयुक्ते। अबाधितमिति विशेषणमाहत्यापि सिद्धान्तबिन्दुवेदान्त-परिभाषयोः उभयोः ग्रन्थयोः वैमत्यमस्ति। अतोऽत्र सिद्धान्तबिन्दुवेदान्त-परिभाषयोस्तुलनात्मकदृष्ट्या प्रमालक्षणस्वरूपविमर्शो आरभ्यते।

**वेदान्तपरिभाषासम्मतपक्षः-**

वेदान्तपरिभाषायां तु प्रमायाः सर्वलक्षणसाररूपेण स्मृतिसाधारणं स्मृतिव्यावृतञ्च इति लक्षणद्वयं स्वीकृतम्। तत्र **अबाधितविषयज्ञानत्वं प्रमात्वम्**[6] इति **स्मृतिसाधारणलक्षणम्**। एतस्मिन् पक्षे प्रमायाः यथार्थत्वमेव प्रमात्वनियामकत्वम् इत्युक्ते वेदान्तपरिभाषाकारैः अयं लक्षणमुपस्थापितम्। अत्र अबाधितपदेन तात्पर्योऽस्ति यद्विषयस्य ज्ञानमन्यप्रमाणेन न मिथ्या सिद्धं तज्ज्ञानमेव प्रमा। अर्थात् यद्विषयकं ज्ञानं जायते स विषयः यदि अपरज्ञानेन बाधितो भवति तर्हि तद् ज्ञानं प्रमा न अपितु भ्रमः कथ्यते। यथा दूरत्वादिदोषवशात् शुक्तौ रजतं दृश्यते परन्तु समीपे आनीते तु शुक्तौ शुक्तित्वम् एव गृह्यते न तु रजतत्वम्। अतः शुक्तौ रजतत्वज्ञानं तु भ्रमः एव। अत्र शुक्तौ भासितं रजतज्ञानं प्रत्यक्षप्रमाणेन बाधितं भवति। तस्मात् तज्ज्ञानं न प्रमा। अतः स्पष्टं रज्जौ सर्पं शुक्तौ च रजतम् इत्यादिबाधितज्ञानेषु प्रमात्वातिव्याप्तिवारणाय लक्षणे अबाधितं इतिविशेषणं प्रयुक्तम्[5]।

**अनधिगताबाधितार्थविषकज्ञानत्वं प्रमात्वम्**[6] इति **स्मृतिव्यावृत-लक्षणम्**। एतस्मिन् पक्षे अनधिगतविशेषणं **'स्मृतिरप्रमा'** इति सिद्धये एव दीयते।[7] यतोहि स्मृतिः साक्षात् प्रत्यक्षादिप्रमाणैः न अपितु संस्कारैः उत्पद्यते। संस्कारेषु अप्रमाणत्वात् स्मृतिरपि अप्रमा इति मन्यते। अपि च

4. पातञ्जलयोगसूत्रम्- तत्त्ववैशारदीटीका-पृ. 10
5. शुक्तिरूप्यादौ तन्निसाराय अबाधितेति- वेदान्तपरिभाषा, प्र.परि., अर्थदीपिका टीका, पृ- 20
6. वेदान्तपरिभाषा, प्र.परि.
7. स्मृतावतिव्याप्तिवारणायनधिगतेति विषयविशेषणम्- वे.प. प्र.परि. शिखामणि टीका- पृ- 23

स्मृतिविषयः पूर्वाधिगतः। अतः लक्षणे अनधिगतपदयुक्तत्वात् स्मृतिव्यावृत्तिः। अत एव स्मृतिरपि प्रमा इति पक्षे अनधिगतविशेषणं न देयं परन्तु अबाधितत्वं तु उभयात्र अपेक्षितम् इति वेदान्तपरिभाषाकारमतम्।

**सिद्धान्तबिन्दुसम्मतपक्षः-**

सिद्धान्तबिन्दौ प्रमालक्षणविचारे वेदान्तपरिभाषायाः वैमत्यं दृश्यते। अत्र स्मृतिव्यावृतं लक्षणमेव सिद्धान्तबिन्दुकारः स्वीकृतवान्- **"यदज्ञातं व्यवहारकाले च अबाधितं तद्विषयकज्ञानत्वस्यैव प्रमात्वरूपत्वात्, स्मृतौ तदभावात्।"**[8] अर्थात् अज्ञानस्य निवर्तकमेव ज्ञानं भवति। स्मृतिः अज्ञानस्य निवर्तनं न करोति। सा तु ज्ञातज्ञानस्य स्मरणमात्रम् एव। अतः स्मृतौ ज्ञातत्वविशिष्टविषयकत्वात् प्रमाऽविषयत्वं वर्तते इति सिद्धम्।

**अबाधितपदप्रयोगे ग्रन्थकारयोः वैमत्यम्-**

न केवलं स्मृतिप्रमात्वविषये अपि च अबाधितपदप्रयोगेऽपि उभयोः ग्रन्थकारयोः वैमत्यं दृश्यते। सिद्धान्तबिन्दौ **सर्वप्रमानुगतत्वं अप्रमाव्यावृतत्वं प्रमाणम्**[10] इति उद्धृतम्। तदनुसारं सर्वप्रमाणानां प्रयोजनं अज्ञातपदार्थानां ज्ञानेनैव[11] भवति। अतएव **'यद् विषयमज्ञातं तदुद्बोधनमेव प्रमात्वम्'** इति श्रीमधुसूदनाचार्यैः स्वीकृतम्। तथाहि-**"ज्ञानविषयतया यथा शुक्तौ इदं रजतम् अत्र अज्ञातत्वं सप्रयोजत्वञ्च[12] निर्विवादमेव अबाधित्वमात्रं सन्दिग्धम्[13]।"** प्रमाणं प्रमोत्पादनेन अज्ञाननिवर्तत्वं करोतीति सर्वजनप्रसिद्धम्।

---

8. सिद्धान्तबिन्दुः- न्यायरत्नावली टीका- पृ- 246-47
9. प्रमाण्यस्य चाज्ञातज्ञापकरूपत्वात् अन्यथा स्मृतेरपि तदापत्तिरिति- सिद्धान्तबिन्दु- अच्युतग्रन्थमाला. पृ- 86
10. सिद्धान्तबिन्दुः न्यायरत्नावली टीका-पृ.248
11. 'सर्वप्रमाणानां च अज्ञातज्ञापकत्वनैव प्रमाण्यात्' सिद्धान्तबिन्दु, अच्युतग्रन्थमाला, पृ-86
12. अद्वैतसिद्धौ मधुसूदनसरस्वतीमहोदयास्तु प्रयोजनवत्त्वमपि प्रमालक्षणशरीरे- निवेशयन्ति।
13. अद्वैतसिद्धिः बालबोधिनीटीका- आगमबाधोद्धारप्रकरणम्, पृ- 594

श्रीमधुसूदनानुसारं यद्विषयकमज्ञानं तद्विषयकज्ञानेनैव तमज्ञानं निवर्तयते ज्ञानाज्ञानयोः समाश्रयत्वात्।[14] एवञ्चाज्ञानं तु ज्ञानरूपचैतन्यनिष्ठम् एव, न तु जडपदार्थनिष्ठम् एवमेव जडपदार्थेषु प्रमाणस्य किमपि प्रयोजनं न विद्यते।[15]

अस्मिन् सन्दर्भे पूर्वपक्षीनाम् आक्षेपः– यदि घटादिपदार्थेषु अज्ञातत्वं न तर्हि घटोऽज्ञातं, मया पटं न ज्ञायते वा इति व्यवहारः कथं भवितुमर्हति। तत्र समाधानं दीयते– घटे यत् घटावच्छिन्नं चैतन्यं वर्तते तस्मिन् चैतन्ये एव ज्ञानम्। यदा अज्ञानस्य आवरणं निवर्तते तदेव चैतन्यम् अनुभूयते। तच्चचैतन्यं स्वविशिष्टघटमपि बोधयति एतत्कृतैव अहं घटं न जानामि– इत्यादिव्यवहारः घटादिषु क्रियते। परन्तु स्वतन्त्ररूपेण घटादिषु जडपदार्थेषु न प्रमाणव्यापारः।[16] अतः अज्ञातस्य ज्ञातत्वम् एव प्रमात्वम्। तत्र अबाधितविशेषणं न योज्येत।

तत्र यद्यपि वेदान्तपरिभाषाकारैः अबाधितत्वविशेषणं व्यवहारकाले बाधिते भ्रमज्ञाने प्रमालक्षणातिव्याप्तिवारणाय दत्तम्। किन्तु मधुसूदनसरस्वती–महोदयानुसारं प्रमालक्षणे अज्ञातपदमात्रप्रयोगेनैव अबाधित्वमपि तदन्तर्गतम् आयाति। स्पष्टीकरणं दीयते– अस्मिन्संसारे द्विविधसत्ताकपदार्थाः भवन्ति। तत्र प्रथमास्तु अज्ञातसत्ताकपदार्थाः द्वितीयाः ज्ञातैकसत्ताकपदार्थाः इति अनुभवसिद्धम्।

---

14. (क) ज्ञानाज्ञानयोः समानाश्राययविषयत्वनियमात्। –सिद्धान्तबिन्दुः, अच्युतग्रन्थ–माला, पृ– 86

    (ख) स्वविषयविषयकप्रमात्वेनैवाविद्या निवर्तकत्वात्– सिद्धान्तबिन्दु, अच्युतग्रन्थमाला., पृ– 104
15. जड़े च प्रमाणप्रयोजनाभावेनाज्ञानानङ्गीकारात्। –सिद्धान्तबिन्दुः, अच्युतग्रन्थमाला, पृ– 86
16. ज्ञानाज्ञानयोरेकाश्रयविषयकत्वनियमात् चिन्मात्राश्रिताज्ञाननाशयोत्पन्ना वृत्तिः चित्तमेव विषयकरोति न घटादिकं मानाभावात्। –सिद्धान्तबिन्दुः, नारायणीटीका, पृ– 241

**अज्ञातसत्ताकपदार्थाः-**

येषां पदार्थानां सत्ता तु पूर्वत एव परन्तु सम्प्रतिज्ञातं न। यथा- उत्पीठिकास्थपुस्तकस्य सत्तायाः ज्ञानं सम्प्रति उत्पीठिकायां नास्ति अर्थात् पुस्तकस्य सत्ता तु अस्ति किन्तु तद्ज्ञानं न। अतः येषां पदार्थानां सत्ता तेषां ज्ञानात् पूर्वमपि भवति एतादृशाः पदार्थाः अज्ञातसत्ताकपदार्थाः भवन्ति।

**ज्ञातैकसत्ताकपदार्थाः-**

येषां पदार्थानां ज्ञानेन सहैव सत्ता भवति, ते ज्ञातैकसत्ताकपदार्थाः कथयन्ते। यदि एतेषां ज्ञानं नास्ति तर्हि सत्तापि नास्ति। अर्थात् येषाम् उत्पत्त्या सहैव ज्ञानं भवति यथा सुख-दुःख-इच्छादयः। अहं सुखीति अनुभवे सुखसत्ता ज्ञानकाले एव भवति। यदि ज्ञानं न तर्हि सत्तापि न। एवमेव रज्जौ सर्पसत्ता पूर्वतः नासीत्। यावत् पर्यन्तं रज्जौ सर्पः दृश्यते तावत् पर्यन्तमेव रज्जौ सर्पसत्ता भासते। अतः रज्जुसर्पादिव्याप्तभ्रमज्ञानमपि ज्ञातैकसत्ताकपदार्थज्ञानम्।

श्रीमधुसूदनाचार्यानुसारं 'यदज्ञातं तद्ज्ञातत्वमेव प्रमात्वमिति' लक्षणस्य विषयास्तु घटादीनाम् अज्ञातसत्ताकपदार्थानां ज्ञानमेव न तु शुक्तिरूप्यादीनां ज्ञानैसत्ताकपदार्थानां ज्ञानम्। भ्रमज्ञाने तु अज्ञातत्वमेव नास्ति। अतः भ्रमज्ञाने लक्षणातिव्याप्तिवारणाय अबाधितेति विशेषणं न देयम्। अपि च कस्मिन्नपि लक्षणे व्यर्थविशेषणयोजनात् सोपाधिकत्वमिति महद्दोषः जायते। एवं प्रमालक्षणे अबाधितेति व्यर्थविशेषणम्। अतः 'अज्ञातार्थविषयकज्ञानत्वं प्रमात्वम्' इति प्रमालक्षणमेव उचितं मधुसूदनाचार्यमते।

**नैयायिकानाम् आक्षेपः**

सर्वमेव ज्ञानं क्षणिकं न्यायमते। नैयायिकानां मते धारावाहिकज्ञाने एकस्यैव वस्तुनः दीर्घकालीना अवस्थितिः भवति। अस्यां स्थितौ अनधिगत-विशेषणयुक्तप्रोक्तलक्षणस्य स्वीकारे सति प्रथमक्षणज्ञानं तु प्रमा, किन्तु द्वितीयतृतीयक्षणज्ञानस्य तद्गृहीतवस्तुग्राहकत्वात् तस्य अन्तर्भावः प्रमाकोट्यां न भवति। अतः प्रोक्तलक्षणस्य द्वितीयतृतीयज्ञानादौ अव्याप्तिः। द्वितीयक्षण-ज्ञानस्य घटादिविषयः अनधिगतः नास्ति, स तु प्रथमक्षणे अधिगतो अस्ति।

अतः द्वितीयतृतीयादिज्ञानेषु अनधिगतार्थविषयकत्वं नास्ति, केवलम् अबाधितार्थविषयकत्वमस्ति। अतः लक्षणस्य अव्याप्ति इति आक्षेपः।

तत्र वेदान्तपरिभाषाकारः समाधत्ते– प्रत्येकक्षणविशिष्टज्ञानस्य क्षणभेदत्वेन भिन्नत्वात् क्षणविशिष्टरूपेण अनधिगतत्वं नवीनत्वञ्च एव स्वीकरणीयम्। अर्थात् लोके कापि प्रतीति एवं नास्ति यस्यां कालस्य भानं न विद्यते। उदाहरणार्थम्– इदानीं घटं पश्यामि इत्यादिप्रत्यक्षं सर्वेषां भवति। अत्र नैयायिकैः पुनः शङ्का उत्थिता–'विषये उद्भूतरूपसत्ता एव अप्रत्यक्षे कारणम्'[17] इति पक्षसिद्धिहेतुः नैयायिकैः **'द्रव्यवृत्तिलौकिक-विषयतासम्बन्धेन प्रत्यक्षं प्रति समवायसम्बन्धेन उद्भूतरूपं कारणम्'**[18] इति कार्यकारणभावं प्रमाणरूपेण प्रस्तूयन्ते। एवमेव कालप्रत्यक्षहेतुः अपि उद्भूतरूपकारणम् आवश्यकमस्ति। परन्तु कालं तु अरूपम्। यदि काले उद्भूतरूपं नास्ति तर्हि तस्य प्रत्यक्षं कथं भवितुमर्हति इति आक्षेपः।

तत्र समाधानं दीयते– ये विषयाः केवलम् एकेन्द्रियगोचराः तेषां प्रत्यक्षे एव उद्भूतरूपस्य आवश्यकता यथा चक्षुरिन्द्रियद्योतिताः घटादिपदार्थाः। परन्तु कालस्तु सर्वेन्द्रियगोचरः। अतः तस्य प्रत्यक्षे उद्भूतरूपस्य न कापि आवश्यकता। अतः प्रतिक्षणं तत्तत्क्षणविशिष्टघटादिज्ञानम् अनधिगतम् एव न तु अधिगतम्। एवम् अनधिगतार्थविषयकत्वम् अबाधितार्थविषयकत्वञ्च द्वितीयतृतीयादिज्ञाने वर्तते इत्युक्ते न अव्याप्तिः। इति वेदान्तपरिभाषासम्मतं प्रथमं समाधानं दृष्टम्।

**द्वितीयसमाधानार्थं धर्मराजाध्वरीन्द्राः वदन्ति**– वेदान्तसिद्धान्ते धारावाहिकज्ञानस्थले क्षणभेदत्वात् ज्ञानभेदो न स्वीक्रियते। यावत् विच्छेदरहितः घटः प्रकाशते, तावत् पर्यन्तम् एकैव घटाकाराकारिताऽन्तःकरणवृत्तिः भवति। तद्घटाकारवृत्तौ प्रतिबिम्बितचैतन्यरूपघटादिज्ञानमपि एकैव भवति। अतएव अनधिगतविषयज्ञानत्वम् इति लक्षणस्य धारावाहिकबुद्धिस्थले न अव्याप्तिः।

---

17. उद्भूतत्वं प्रत्यक्षप्रयोजको धर्मः। –तर्कसंग्रहदीपिका– पृ– 14

18. तर्कसंग्रहः (टीकात्रयोपेतः)

एतद्विपरीतं मधुसूदनाचार्यास्तु भिन्नं समाधानं स्वीकुर्वन्ति। तेषां मते धारावाहिकज्ञानस्थले यद् द्वितीयादिज्ञानं भवति तद् ज्ञातार्थज्ञापकत्वात् अनुवादमात्रमेव न तु अज्ञातस्य ज्ञापिका प्रमा। अज्ञातर्थस्य ज्ञापकत्वम् एव प्रमात्वम्। अतः अनुवादमात्रज्ञाने अज्ञातज्ञापकत्वमिति प्रमात्वस्य प्रयोजकं न। अतः द्वितीयादिज्ञानं प्रमा नास्ति। अतः तत्र लक्षणस्य अगमनं उचितमेव।

इत्थं तु अद्वैतमतेषु विरोधः स्यात् इति शङ्का यदि पूर्वपक्षिभिः क्रियते तर्हि वार्तिककारसुरेश्वराचार्याणाम् इयं पक्तिः द्रष्टव्या-

**यया यथा भवेत्पुंसो व्युत्पत्तिः प्रत्यागात्मनि।**
**सा सैव प्रक्रिया ज्ञेया साध्वी सा चानवस्थिता।।**[19]

## सन्दर्भग्रन्थसूची


1. **अद्वैतवेदान्त**- डॉ. राममूर्ति शर्मा, ईस्टर्न बुक लिंकर्स, सं. 1907
2. **तर्कभाषा**- तत्त्वालोकसंस्कृतहिन्दीटीका, केशवमिश्रः, टीकाकारः-पं. श्रीरुद्रधरझा, टिप्पणी लेखकः- पं. श्रीकान्तानाथशास्त्री, सम्पादकः- पं. श्री शोभितमिश्रः, चौखम्बा संस्कृत सीरिज, वाराणसी 1953
3. **तर्कसंग्रहः**- (दीपिकया सहितः) -निर्णयसागरप्रेस, बम्बई, 1876
4. **तर्कसंग्रहः**- (टीकात्रयोपेतः ) - न्यायाचार्यः पं. शिवदत्तमिश्रगौड़ा, विद्याभवनम्, काशी, प्र. सं. 1995
5. **तर्कसंग्रहः**- अन्नम्भट्टः, आचार्यश्रीनिवासशर्मा, भारतीयविद्यासंस्थानम्, वाराणसी, प्रथमसंस्करणम्, 2010
6. **पातञ्जलयोगसूत्रम्**- वाचस्पतिकृततत्त्ववैशारदीसंवलितव्यासभाष्य-समेतम्, सं.- श्रीरामशङ्करभट्टाचार्यः, भारतीयविद्याप्रकाशनम्, वाराणसी
7. **बृहदारण्यकभाष्यवार्तिकम्** (सुरेश्वराचार्यकृतम्)
8. **भामती** (शारीरकभाष्यव्याख्या) -वाचस्पतिमिश्रः, सम्पादकः- अनन्तकृष्णशास्त्री, निर्णयसागरप्रेस, बम्बई, 1938


---

19. बृ.भा.वा. 1.4.402

9. **वेदान्तपरिभाषा**– पं. स्वामीगोविन्दसिंहसाधुः, प्रकाशकः– क्षेमराज–कृष्णदासः, श्रीवेङ्कटेश्वरमुद्रालयः, मुम्बई, सं.–1901

10. **वेदान्तपरिभाषा**– के.साम्बशिवशास्त्री, राजकीयमुद्रणयन्त्रालयः, 1928

11. **वेदान्तपरिभाषा**– अनन्तकृष्णशास्त्री, कोलकाताविश्वविद्यालयः, 1930

12. **वेदान्तपरिभाषा**– डॉ. श्रीगजाननशास्त्रीमुसलगांवकरः, सम्पादकः– श्रीरामशास्त्री–मुसलगांवकरः, चौखम्बा विद्याभवन, वाराणसी, 1983

13. **वेदान्तपरिभाषा**– समणिप्रभाशिखामणिसहिता, सम्पादकः– प्रो. पारसनाथद्विवेदी, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, 1984

14. **वेदान्तपरिभाषा**– श्रीशिवदत्तशास्त्रीविरचिताऽर्थदीपिकाटीकासहिता, सम्पादकः– त्र्यम्बकरामशास्त्री, चौखम्बा संस्कृतसीरिज आफिस, वाराणसी, 2019

15. **सिद्धान्तबिन्दुः**– आचार्यमधुसूदनसरस्वती, सम्पादकः– अभ्यंकरोपाह्ववासुदेवशास्त्रिकृतबिन्दुप्रपातटीकासहितः, भण्डारकरप्राच्यविद्या–संशोधनमन्दिर, 1928

16. **सिद्धान्तबिन्दुः**– सम्पादकः–श्रीकृष्णपन्तः, गीताप्रेस गोरखपुर, 1932

17. **सिद्धान्तबिन्दुः**– सम्पादकः– त्र्यम्बकरामशास्त्री, प्रकाशकः– जयकृष्णदास–हरिदासगुप्तः, विद्याविलासप्रेस, बनारस, 1985

18. **सिद्धान्तबिन्दुः**– श्रीगौडब्रह्मानन्दकृतन्यारत्नावली– श्रीनारायणतीर्थ–कृतलघुव्याख्यासहिता, चौखम्बासंस्कृतसीरिज, विद्याविलासप्रेस, बनारस, अष्टम पुष्पम्, 1985

❑❑❑

# श्रीमधुसूदनसरस्वतीमते द्वैताद्वैतवादविमर्शः

**-सौरभपन्तः***

मानवः स्वभावेन एव चिन्तनशीलोऽस्ति। इदं भारतभूमिः चिन्तनस्य आद्या भूमिः वर्तते। मनुष्यः सदा प्रत्येकं विषये चिन्तनं मननं ध्यानं विश्लेषणं च करोति। तस्य मननशीलस्वभावेन एव विभिन्नदर्शन-सम्प्रदायाः उत्पन्नाः जायन्ते। दर्शनशास्त्रमात्रेण कस्मिन्नपि विषये सूक्ष्मातिसूक्ष्मं गहनमध्ययनं भवितुं शक्यते।

भारतीयदर्शनवाङ्मये वेदानां स्थानं सर्वोपरि वर्तते। परन्तु वेदा न तु दर्शनग्रन्थाः, अपितु भारतीयदर्शनामङ्कुरा वेदेष्वेव प्रसृताः। भारतीयदर्शनग्रन्थेषु यावन्त्यपि विभिन्नानि मतान्युपमतानि प्रसृतानि तेषां मूलं वेदेभ्यः एव निर्गतम्। भारतीयदर्शनसम्प्रदायानां वेदानां पुराणानां तथा च अन्यधार्मिकग्रन्थानां प्रमुख्युद्देश्यं मोक्षप्राप्तिः वर्तते। आत्मसाक्षात्कारेण मोक्षप्राप्तिं भवितुं शक्यते, अतः सर्वेष्वेषु शास्त्रेषु दर्शनविद्यासु मोक्षप्राप्त्युपायाः भिन्न-भिन्नरूपेण दृश्यन्ते। भारतीयानां समष्टिदर्शनस्य पूर्णफलं वेदेषु वरीवर्ति, मुख्यत्वेन वेदशब्दः ऋग्यजुसामाथर्वनामभिः प्रचलितानां चतसृणां वेदसंहितानां बोधकोऽस्तिः।

प्रामुख्येन द्विविधः दर्शनसम्प्रदायः प्राच्यपाश्चात्यश्च। प्राच्यदर्शने न्याय-वैशेषिक-सांख्य-योग-मीमांसा-वेदान्तादीनि वैदिकानि दर्शनानि तथा च चावार्कबौद्धजैनादीन्यवैदिकानि दर्शनान्यङ्गीक्रियन्ते।

**दर्शनानि षडेवात्र मूलभेदव्यपेक्षया।**
**देवतातत्त्वभेदेन ज्ञातव्यानि मनीषिभिः॥**

---

* शोधच्छात्रः, सर्वदर्शनविभागः, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः, नवदेहली- 110016

**बौद्धं नैयायिकं साख्यं जैनं वैशेषिकं तथा।**
**जैमिनीयं च नामानि दर्शनानाममून्यहो॥**[1]

प्रायः प्राच्येषु अर्थात् भारतीयेषु दर्शनेषु आत्मस्वरूपस्यैव प्रमुखतया विचारः भवति अन्ये तु कश्चिद्विषयाः आत्मस्वरूपविचारेण संबद्धा एव तत्र प्रवेशं लभन्ते। परं तु पाश्चात्यदर्शनेषु दर्शनानाम् उद्भवविषये विविधाः वादाः यथा आश्चर्यजन्यत्वं ज्ञानानुरागमूलकत्वं वा प्रस्तूयन्ते।

**वेदान्तदर्शनविमर्शः-**

वेदान्तदर्शनं मुख्यतः उपनिषदां तत्त्वज्ञानं प्रतिपादयति, उपनिषद् वेदान्तशब्देन अभिधीयन्ते। वेदादर्शनस्य आधारभूतं यर्थाथतत्त्वं ब्रह्मास्तिं इदं ब्रह्म अखण्डं एकरसम् अद्वैतं च वर्तते। अद्वैतं ब्रह्म तत्त्व निदम् आधारीकृत्य महर्षिणा बादरायणेन ब्रह्मसूत्रस्य रचना कृता। वेदान्तदर्शनस्य आधारभूताः ग्रन्थाः "प्रस्थानत्रयी" उपनिषद्-ब्रह्मसूत्र-श्रीमद्भगवद्गीताश्च इत्येवं प्रकारेण प्रख्याताः सन्ति। वेदान्तस्य परम्परा महती प्राचीनं वर्तते। तस्या ऐतिह्यं सोपानत्रये शंकराचार्यपूर्ववार्तिना वेदान्तपरम्परा शंकराचार्य-समकालिकी वेदान्तपरम्परा शंकराचार्योत्तरवर्तिवेदान्तपरम्परायां विभक्तुं शक्यते। गौडपादप्रवर्तितः तथा च शंकराचार्यैः पोषितः विस्तारिश्चसाऽयम् अद्वैतवादः नूतन अपितु वेदप्रभृतिसकलप्रमाणग्रन्थमूलक एव। अद्वैत- वेदान्तस्य सम्बन्धो वेदैः सह स्पष्टं दृश्यते। **"वेदान्तो नाम उपनिषत् प्रमाणम्"** इति कथनेन वेदान्त-उपनिषन्मात्रेषु सीमितो ज्ञातः परन्तु सत्यमिदमस्ति चेद् वेदानां परमप्रतिपाद्ये मोक्षे कारणत्वात् वेदान्त इत्यन्वर्था संज्ञा **"को ददर्श प्रथमं जायमानमस्थन्वन्दां यदनस्था विभर्क्षि। भूम्या असुरसृगात्मा स्व स्वित् को विद्वासमुपगात् द्रष्टुमेतत्**।[2]

भारतीयदर्शनपरम्परायाम् अद्वैतसम्प्रदायः मूर्धाभिविक्तोऽस्ति। अस्य दर्शनसम्प्रदायस्य आदि आचार्यः भगवन् नारायणः अस्ति। गुरुपरम्परास्तुतिपरकं इदं श्लोकः अद्वैतवेदान्ते प्रसिद्धोऽस्ति-

1. षड्दर्शनसमुच्चयः
2. ऋग्वेदः, वामीयसूक्तम् 1/04

**लक्ष्मीनाथसमारम्भां शङ्कराचार्यमध्यमाम्।**
**अस्मदाचार्यपर्यन्तां वन्दे गुरुपरम्पराम्॥**

आचार्यश्रीमधुसूदनसरस्वती न केवलं ब्रह्मविदां तत्त्ववेत्ताचार्यरूपेण अपितु भगवच्चरणरसिकं भक्तरूपेण अपि भारतीयदर्शने प्रसिद्धोऽस्ति। विश्वेश्वरसरस्वतीशिष्यामधुसूदनसरस्वत्या वैदान्तकल्पलतादीकां भगवद्-गीताव्याख्यां गूढार्थदीपिकां संक्षेपशारीरकव्याख्यां सारसंग्रहदीपिकां प्रस्थान-भेदेतिख्यात्रयीसांख्येत्यादिसप्तविवरणघटितां महिम्नस्त्रोतटीकां सिद्धान्त-बिन्दुनाम्नीदशश्लोकीव्याख्यामद्वैतसिद्धिं च प्रणिन्युरित्यत्र वस्तुन्यन्तराणां बाह्यानां च प्रमाणानां सत्वान्न संशयलेशस्याप्यवकाशः। ईश्वरस्वरूपनिर्णय-भगवद्भक्तिरसायनहरिलीलान्याख्यां सर्वशास्त्रार्थसंग्रहाद्वैतरत्नरक्तणादि प्रबन्धाप्येते प्रणित्युरित्यपि लोके प्रवादः प्रचलिता दृश्यते।

**तथा च अद्वैतसिद्धौ........ विस्तरः।**
**अहममज्ञ .......अद्वैतसिद्धौ द्रष्टव्यः॥**[3]

**मोक्षाय स्मृहयालवः श्रुशिगिरां शृहालवोऽर्थेऽनृतौ। वेदान्तार्थ-विभवनासु सुतरां व्याजेन निद्रालवः। भेदे खण्डनखण्डितेऽपि शतधा तन्द्रालवस्तार्किकाः। कैवल्यात्पतयालवः शृणुत सधुक्तिं दयालोर्मम।**[4]
अत्र आचार्यमधुसूदनसरस्वतीमहोदयाः न्यायभक्तिवेदान्तादि सर्वेषु शास्त्रेषु तावदप्रतिहतगतयो विद्वांसः आसन्। इमे वाराणस्यामध्ययनकालादेव वेदान्तशास्त्रस्य पारम्परिक-शास्त्रार्थमाध्यमेन अद्वैतवेदान्तशास्त्रस्य प्रचार-प्रसारे विकासे च यदनुपमं योगदानं कृतवन्तस्तन्नूनं विदुषामविस्मरणीयमेव। आचार्यसरस्वतीमहाभागः भारतीयदर्शने प्रतिमूर्तिवेदान्तं तथा च अद्वैतदर्शनमतैः पुनरुत्थापितं संवर्द्धितं संपोषितञ्च।

**निर्जित्य प्रतिपक्षान्द्वैतधियो दुष्टजार्किकमन्यान्न...॥**[5]

अत्र अद्वैतरत्नरक्षणं ग्रन्थस्य शीर्षके अपि स्पष्टं भवति यत्

---

3. गूढार्थदीपिका
4. अद्वैतरत्नरक्षणम्
5. अद्वैतरत्नरक्षणम्

अद्वैतरूपी रत्नस्य रक्षणार्थे आचार्यश्रीमधुसूदनसरस्वतीमहाभागः अस्य ग्रन्थस्य रचनां कृतवान्।

श्रीमद्भगवद्गीतोपदेशस्य स्वरूपनिरूपणं यादृशं वैष्णवाचार्यैः क्रियते तादृशमेव आचार्यसरस्वती गूढार्थदीपिकायामपि क्रियते। यद्यप्यसौ शांकरभाष्यमनुमन्वानोऽपि बहुमानमनुसरन्तोऽपि श्रीमद्भगवद्गीतायाः स्वकीये स्वतन्त्रव्याख्याने प्रवृत्तिहेतून् प्रारम्भे विस्तरेणोपपादयतीति नात्रलेशमात्रोऽपि शंका। गूढार्थदीपिकायाः वैशिष्ट्यं द्वैताद्वैतवादसमन्वयात्मिका दृष्टिः-

**उभयानुगता सा हि सर्वविघ्नापनोदनी।**
**कर्ममिश्रा च शुद्धा च ज्ञानमिश्रा च सा त्रिधा।।**[6]

वेदान्तवाक्यविचारसहितां "युक्तम् आसीत् मत्परः" इत्यादिना सूत्रिताऽनेकप्रकारा भगवद्भक्तिनिष्ठाध्यायषट्केन प्रतिपाद्यते। गूढार्थदीपिकायां मधुसूदनाचार्यः, अद्वैतवादेन सह द्वैतवादस्य समन्वयक्रमे पातञ्जलयोगानुमत-तत्त्वत्रयस्याभ्युपगमो न वैष्णवसम्प्रदायाभ्युपगतजीवेश्वरजगतां स्वरूप-संबंधावेरप्यभ्युपगमः ब्रह्मात्मैक्यवाद-निर्गुणात्मवादोऽपि स्वीकृतः। अतः सर्वाऽपि द्वैताद्वैतवादो युगपदऽभ्यपगन्तुं सम्भाव्यः मधुसूदनमतेन प्रतीयते।

अद्वैतसिद्धिः बहुचर्चितोऽयं अद्वैतसिद्धान्तप्रतिपादको ग्रन्थः श्रीमधु-सूदनसरस्वतीविरचितग्रन्थेषु द्वैताद्वैतभक्तियोगज्ञानयोगकर्मयोगानां प्रवृत्तिः दृश्यते-

**यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम्।**
**स्वकर्मणा तमभ्यर्च्च्य सिद्धिं विदन्ति मानवाः।।**[7]

उपर्युक्तश्लोकव्याख्याव्याजेन सगुणब्रह्मण उपासनायाः श्रेष्ठत्वेऽपि युक्ततमत्वेऽपि मधुसूदनसरस्वतीमहाभागः स्वाभिमतमद्वैतनिर्गुणब्रह्मवादमतमेव प्रख्यापयितुं प्रवर्तते। अद्वैतमतेनैता व्याख्याः सर्वा एव भगवद्गीतायाम् आनुगुण्यं तथा नैव वहन्ति यथाऽन्ये वैष्णवसम्प्रदायाचार्या इति। मधुसूदनाचार्यास्तु अद्वैतनुसारिव्याख्यानं कुर्वाणाऽपि भगवद्धर्मानुसारिणीं व्याख्यां प्रस्तुवन्ति।

---

6. गूढार्थदीपिका
7. गीता- 18/46

मधूसूदनोऽद्वैतवादी संन्यासी आसीत्। अद्वैतवादिनामुपास्योपासकोपासनाभेदो नास्ति–

**श्लोकार्धेन प्रवक्ष्यामि यदुक्तं ग्रन्थकोटिभिः।**
**ब्रह्म सत्यं जगन्मिथ्या जीवो ब्रह्मैव नापरः॥**

अहं ब्रह्मास्मि नास्ति मे कश्चिद्बन्धः नाहं देहो नेन्द्रियाणि न मनो न बुद्धिर्न पृथिव्यादिभूतानि नाव्याकृतामित्यादिप्रकारेण मधुसूदनो निरन्तरं ब्रह्मविचारपरायणः आसीत्। मधुसूदनस्तु श्रीकृष्णपूजनं करोतीति ज्ञात्वा अद्वैतमार्गावलम्बितः केचित् सन्न्यासिनः कदाचित्तदन्तिकमागत्योचुः– "महात्मन् भवताऽद्वैतवादिना कथं द्वैतभावात्मकं श्रीकृष्णोपासनं क्रियत", इति एतच्छ्रुत्वा मधूसूदनमहाभागः सद्य एव श्लोकमेकं विरचय्य तान् सन्न्यासिनः श्रावयाभास–

**अद्वैतसाम्राज्यपथाधिरूढास्तृणीकृताखण्डलवैभवाश्च।**
**हठेन केनापि वयं शब्देन दासीकृता गोपवधूविटेन॥**

अनेनाद्वैतवादित्वेऽपि मधुसूदनस्य सगुणब्रह्मणि श्रीकृष्णे परा भक्तिरासीदिति लभ्यते। गीताटीकायामन्यत्रापि श्रीकृष्णभक्तिसूचकानि बहूनि वाक्यानि दृश्यन्ते। तस्मात्तस्य श्रीकृष्णे परमा भक्तिः द्वैतवादी अनुमीयते। अद्वैतसिद्धिः ग्रन्थे आचार्यमधुसूदनसरस्वतीमहाभागेन द्वैतमतनिराकरणेन, विशेषतो माध्वमतनिराकरणपूर्वकमद्वैतवेदान्तसिद्धान्ततत्त्वं प्रतिपादितम्। ग्रन्थोऽयं यथा विशालस्तथा दुर्गमोऽपि।

**श्रद्धाधनेन मुनिना मधुसूदनेन–**
**संगृह्य शास्त्रनिचयं रचितातियत्नात्॥**[8]

बोधाय वादिविजयाय च सत्वराणामद्वैतसिद्धिरियमस्तु मुदे बुधानाम्।

आचार्यमधुसूदनमहाभागस्य भारतीयसाधकसम्प्रदायेषु सर्वेषु समन्वय-बुद्धिरासीदित्यप्यनुमातुं शक्यते। यद्यप्यद्वैतसिद्ध्याद्यद्वैतभावप्रकाशकग्रन्थेषु परमतनिराकरणपूर्वकमद्वैतमतस्थापनं कृतं तेन, तथापि गुरुणामादेशेन तथा कृतमिति दृश्यते। यथा–

---

8. अद्वैतसिद्धिः

**श्रीरामविश्वेश्वरमाधवानामैक्येन साक्षात्कृतमाधवानाम्।**
**स्पर्शेण निर्धूततमोरजोभ्यः पादोत्थितेभ्योऽस्तु नमो रजोन्यः।।**[9]

मधुसूदनमहाभागः सदाचाररतः संयतः सन् परया श्रद्धया राममिश्राद् वेदान्तमध्यैषत। स च तृष्णार्तचातको जलबिंदुवत् क्षुधितः सुस्वाद्वन्नवत् भिक्षान्नभोजनमात्रेण सन्तुष्टो नियमेन वेदान्तचिन्तने मनौ निवेशयामास। एवंरूपेण स उपनिषदः शारीरकसूत्रं भगवद्गीतां तासां भाष्याणि तट्टीकादिकं प्राचीनवेदान्तप्रकरणग्रन्थान् नव्यवेदान्ताश्च क्रमेणाध्यैष्ट, मननेन च तानधीतवान् तस्य विद्याभ्यासं दृष्ट्वा सर्वे विस्मित अभवन्, रामतीर्थाश्च योग्यं शिष्यं प्राप्य परां मुदं लेभे। आचार्यमधुसूदनसरस्वतीमहाभागस्य भक्तिमार्गस्य प्ररेणा शुष्कवेदान्तस्य तत्त्वानाम् अवबोधनार्थं वेदान्तानुरागीणां कृतं सरसम् अस्ति। अतएव पण्डिताः आचार्यश्रीमधुसूदनाय प्रशस्तिं दत्तवन्तः–

**वेत्ति पारं सरस्वत्या मधुसूदनसरस्वती।**
**मधुसूदनसरस्वत्याः पारं वेत्ति सरस्वती।।** इति।

## सन्दर्भग्रन्थसूची


1. श्रीमद्भगवद्गीताः गूढार्थदीपिका, मधुसूदनसरस्वतीकृता, चौखम्बा संस्कृत-सीरीज, वाराणसी 1962।
2. शांकरभाष्यम् आनन्दगिरिव्याख्यासहितम्, सम्पादकः, वासुदेव शर्माः, प्रकाशकः, मुन्शीराममनोहरलालपब्लिशर्स, दिल्ली।
3. श्रीमद्भगवद्गीता/तत्त्वप्रकाशिकेत्याद्यष्टटीकोपेता/, सम्पादकः, दिनकर-विष्णुगोखले, परिमलपब्लिकेशन्स, दिल्ली।
4. अद्वैतसिद्धिः, अनन्तकृष्णशास्त्री, निर्णयसागरप्रेस, बम्बई, 1917।
5. सिद्धान्तबिन्दुः, जयकृष्णदास-हरिदासगुप्तः, चौखम्बा संस्कृतसीरीज-ऑफिस, बनारस।
6. अद्वैतरत्नरक्षणम्, अनन्तकृष्णशास्त्री, निर्णयसागरप्रेस, बम्बई, 1917।
7. षड्दर्शनसमुच्चयः, महेन्द्रकुमारजैनः, भारतीयज्ञानपीठप्रकाशनम् नई दिल्ली।
8. ऋग्वेदसंहिता, वैदिकसंशोधनमण्डलः, पूना 1972।


---

9. अद्वैतसिद्धिः

# सांख्यदर्शने सत्कार्यवादविमर्शः

**-पलाशदासः ***

भारतीयषडास्तिकदर्शनेषु अन्यतमम् एवं प्राचीनतमं दर्शनं सांख्यदर्शनम्। अपि च अस्य दर्शनस्य प्रवक्ता कपिलमुनिः ततोऽधिकः प्राचीनः प्रसिद्धश्च। वेदे पुराणे महाभारते च तस्य प्रसिद्धिः सर्वत्र प्रचारिता प्रसारिता च। महाभारते निम्नश्लोकानुसारेण गुणदोषमीमांसापूर्वकं कस्यापि विषयस्योपरि प्रमाणपुरस्कृत्य सरण्याः विचारकरणं संख्या उच्यते, अस्मात् संख्याशब्दात् सांख्यशब्दः उत्पद्यते, अथवा सांख्यदर्शनं प्रकृति-पुरुषयोः। विवेकज्ञानात् कैवल्यं मन्यते। अतः अस्य दर्शनस्य नाम सांख्यमिति-

**दोषाणां च गुणानां च प्रमाणं प्रविभागतः।**
**कञ्चिदर्थमभिप्रेत्य सा संख्येत्युपधार्यताम्॥**[1]

सांख्यशब्दः गणनावाचकः ज्ञानवाचकः वा उभयार्थे प्रयुक्तः। अत्र गणनावाचकात् संख्याशब्दात् सांख्यशब्दः उत्पद्यते, यतः सांख्याचार्यैः तत्त्वानां गणना क्रियते, पुनः प्रकृतिः जगतः कारणमुच्यते, तथा तद्भिन्नानि चतुर्विंशतितत्त्वानि वर्तन्ते। तस्मात् सांख्यदर्शने उच्यते-

**संख्यां प्रकुर्वते चैव प्रकृतिं च प्रचक्षते।**
**तत्त्वानि च चतुर्विंशत्तेन सांख्याः प्रकीर्तिताः॥**[2]

**'तत्त्वानां सम्यक् ख्यानं संख्या संख्यैव सांख्यं प्रकृतिपुरुष-विवेकात्मकं विशिष्टं ज्ञानम्'**- इति व्युत्पत्त्यनुसारेण सांख्यशब्दस्यार्थः

---

* शोधच्छात्रः, सांख्ययोगविभागः, श्रीलालबहादुरशास्त्रीराष्ट्रीयसंस्कृतविश्व-विद्यालयः, नवदेहली।

1. महाभारतम्- 12.111.34
2. महाभारतम्- 12.306.43

सम्यक् प्रकारकं ज्ञानम् अर्थात् प्रकृतिः, पुरुषः, महत्, अहंकारः, मनः, पञ्चतन्मात्राणि, पञ्चज्ञानेन्द्रियाणि, पञ्चकर्मेन्द्रियाणि, पञ्चमहाभूतानि चेति पञ्चविंशतितत्त्वानां यथार्थज्ञानम्। सांख्यदर्शने पञ्चविंशतितत्त्वानि सन्ति, परन्तु तेषु मुख्यद्वयं वर्तेते प्रधानम् अर्थात् प्रकृतिः ज्ञः अर्थात् पुरुषः इति। तस्मात् सांख्यदर्शनं द्वैतवादिदर्शनमुच्यते। सांख्यमते कार्यस्योत्पत्तेः प्राक् कार्यं सत्-रूपेण कारणे अस्ति। तस्मात् सांख्यदर्शनस्य सत्कार्यवादः अत्यन्तं प्रसिद्धः। प्रधानस्य सिद्ध्यनन्तरं महदादेः प्रधानस्य यत् कार्यं तस्मिन् विषये विवेचनमावश्यकम्। यथा पूर्वकारिकायां संकेतं क्रियते- **'महदादि तच्च कार्यं प्रकृति रूपं विरूपं च'**।[3] इदं महदादि कार्यं स्वकारणे प्रधाने सत्-रूपेण असत्- रूपेण वा विद्यमानं भवति? अस्मिन् विषये विभिन्नदार्शनिकेषु मतानैक्यं विद्यते। सांख्यदर्शनं सत्कार्यवादाय दार्शनिकसमाजे प्रख्यातं भवति। माठराचार्येण विरोधिमतं पूर्वपक्षरूपेण उपस्थापितम्-

**असदकरणादुपादानग्रहणात् सर्वसम्भवाभावात्।**
**शक्तस्य शक्यकरणात् कारणभावाच्च सत्-कार्यम्॥**[4]

अस्यां कारिकायां सिद्धान्तरूपेण सत्कार्यवादः प्रस्तुयते येन पूर्वपक्षे वैशेषिकदर्शने, जैनदर्शने तथा बौद्धदर्शने विरोधः दृश्यते। इदं दर्शनत्रयं सत्कार्यवादविरोधी। एतेषु जैनदर्शने तथा बौद्धदर्शने कस्मादपि प्रबलात् तर्काभावात् वृत्तिकारस्याभिमतं यत् तैः सह विवादकरणं व्यर्थम्, यतः तेषां सिद्धान्तः अपूर्णः तथा स्ववचनविरोधी अपास्तः च भवति। अतः तैः सह व्यर्थविवादं कृत्वा समयापचयः न करणीयः।

वैशेषिकदर्शने **'असतः सद्भवति।'** मतमिदम् अत्यन्तं गुरुत्वसहकारेण उपस्थापितम्, अतः विशेषतः तस्य मतं निरस्तार्थं प्रकृतकारिकायाः उदयः भवति।

सत् विषये जैनदर्शनस्य मतम्- प्रत्येकपदार्थस्य द्वौ अंशौ वर्तेते-

3. सांख्यकारिका-8
4. सांख्यकारिका-9

शाश्वतांशः अशाश्वतांशः च। शाश्वतांशस्य कारणत्वात् प्रत्येकवस्तु नित्यम्: अपि च अशाश्वतांशस्य कारणत्वात् प्रेत्यकं वस्तु उत्पत्तिविनाशशीलम् अर्थात् अनित्यम्। यदि केवलम् एकांशोपरि दृष्टिपातं क्रियते चेत् तर्हि वस्तु स्थिरं प्रतीतं भवति, तथा अपरांशे विचारं क्रियते चेत् तर्हि तत् अस्थिरं प्रतीतं भवति। परन्तु एकांशे दृष्टिपातनिक्षेपम् एकाङ्गी सत्यम् भवितुम् अर्हति सर्वाङ्गीणसत्यता उभयांशस्य निरीक्षणोपरि अवलम्बितम्। अतः दृष्टिद्वयानुसारेण जैनशास्त्रं प्रत्येकवस्तुनः उत्पाद-व्ययध्रौवयुक्तं मन्यते स अर्थात् पदार्थस्य उत्पर्त्तिः भवति तथा नाशः भवति। अपि च स स्थिरो भवति। अतः सः अनित्यः नित्यः भवति। अस्याभिप्रायो भवति यस्य पदार्थस्य परिणामत्वात् अपि जातिगता एकता विघटिता न भवति, अतः सः नित्यः वस्तुगतपरिणामत्वात् अनित्यः भवति। संक्षेपेण अस्मिन् जैनदर्शने सत्स्वरूपविवेचनं कृतम्। बौद्धानां मतमस्ति शून्यवादः। बौद्धदर्शने माध्यमिकानां बाह्यार्थं स्वीक्रियते विज्ञानं न च मन्यते। तेषां मतानुसारेण शून्यम् एव परमार्थं सत्यम् अस्ति। अयं शून्यशब्दः कोऽपि अभाववादिशब्दो न भवति अपितु अनिर्वचनीयतत्त्वस्य द्योतको भवति। यद् न सत्, न असत्, न सदसत् अपि च द्वयोः भिन्नमपि न भवति तदेव शून्यम्। इदं चतसृभ्यः श्रेणीभ्यः भिन्नं तथा विलक्षणकारणत्वात् इदं परमार्थं शून्यं नाम्नाभिहितम्। अनेन प्रकारेण बौद्धदर्शने निःस्वभाव-अथनिर्वचनीय-अलक्षणादिशब्देन निरूपितं शून्यम् एव परमतत्त्वं भवति। अस्मिन् स्थाने गमनम् एव बौद्धसाधनाया अन्तिमं फलं भवति।

वैशेषिकदर्शनानुसारेण उत्पत्तेः पूर्वं स्वकारणे असत्कार्यस्य कारण-सामग्र्यनन्तरं उत्पत्तिर्भवति। अतः स्वकारणे मृत्तिकायां पूर्वम् असत् कार्यस्य दण्ड-चक्र-कुम्भकारदिना मृदादिकारणात् भिन्नस्य घटादिकार्यस्य उत्पत्तिर्भवति। अतः कार्य-कारणयोः भिन्नताऽपि भवति। 'सतोऽसज्जायते' इतीदं वैशेषिकस्य मतम्। सतः भावरूपात् परमाण्वादितः पूर्वम् अविद्यमानस्य असतः द्व्यणुकादेः उत्पत्तिः भवति। अस्य मतस्य निराकरणार्थं सांख्याचार्यैः पूर्वोक्तया कारिकया स्वसिद्धान्तमुपस्थापितम्-'असदकरणात्' अर्थात् वैशेषिकैः पूर्वम् अविद्यमान-

कार्यस्य उत्पत्तिः मन्यते, अस्मिन् विषये सांख्यनां मतं भिन्नम् अस्मिन् संसारे किमपि कारणं न दृश्यते, यदि एवं भवति तर्हि सिकताभ्यस्तैलं निर्गतं भवति, परन्तु एवं न भवति। सतः सतः उत्पत्तिर्भवति, यथा– पूर्वं विद्यमानात् तिलात् तैलं भवति न अविद्यमानात् भवति। तस्मात् उपादानकारणस्य ग्रहणं क्रियते। यदि एवं न भवति तर्हि दध्यर्थीअपि उदकस्य ग्रहणं कर्तुं शक्यते। समर्थकारणात् एव समर्थकार्यं उत्पन्नं भवति। अस्याभिप्रायः एवं भवति यत् तस्य कार्यस्य जननशक्तिः कारणे एव आदौ विद्यमाना भवति। यथा– समर्थः कुम्भकारः शक्यात् मृत्पिण्डात् एव समर्थघटादेः उत्पत्तिं कर्तुं शक्नोति न हि वस्त्रादेः। यतः नियमः अस्ति **'कारणगुणाः कार्यगुणान्नारभन्ते'** इति। अतः चास्ति– शक्तस्य शक्यकरणात्। इह लोके शक्तः शिल्पी करणादिकारणोपादानकालोपायसम्पन्नः शक्यादेव शक्यं कर्म आरभते नाशक्यमशक्यात्। तद्यथा– शक्तः कुम्भकारः शक्यादेव मृत्पिण्डात्।

शक्यदण्डचक्रसूत्रोदकविदलतलादिभिः सम्पन्नो घटशरावोदञ्चना-दीन्यारभमाणो दृष्टः। न च मणिकादि अशक्यत्वात्तावता पिण्डेन तस्य यदि पुनः करणनियमो न स्यात् अशक्यादप्यशक्यमारभ्येत तस्मात् सत् कार्यं स्यान्नासत्। किं च– कारणभावाच्च कार्यं सदेव स्यात् यथा– कोड्वेभ्यः कोद्रवा, व्रीहियो व्रीहभ्यः स्युः। यदि चासत् कार्यं स्यात् तदा कोद्रवेभ्यः शालीनामपि निष्पत्तिः स्यात्, तथा न च भवति। अतः इयं सिद्धिः भवति यत् कार्यं सत् भवति अर्थात् अभिव्यक्तेः पूर्वम् अपि स्वकारणे सूक्ष्मावस्थारूपेण विद्यमानं भवति। यदि कारणेय पूर्वं कार्यं असत् भवति तर्हि केनाप्युपायेन तस्य उत्पत्तिः न सम्भवति। यतः सहस्रशिल्पीप्रयत्नेनापि नीलं पीतं न भवति। तस्मात् सांख्यसूत्रे उच्यते– **'नासदुत्पादो नृशृङ्गवत्'**– इति स गीतायामपि श्रीकृष्णेनोच्यते–

**नासतो विद्यते भावो नाभावो विद्यते सतः।**
**उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभिः॥**[5]

5. गीता–2.16

**अन्यत्रापि उच्यते-**

**असत्त्वान्नास्ति सम्बन्धः कारणे सत्त्वसङ्गिभिः।**
**असम्बद्धस्य चोत्पत्तिमिच्छतो न व्यवस्थितिः॥** (स.द.)

यदि कोऽपि एवं पृच्छति यद् घटादिकार्यं यदि पूर्वतः विद्यमानं भवति तर्हि घटम् उत्पादयति, घटं नाशयति इत्यादि व्यवहारस्य किमपि प्रयोजनं नास्ति, यतः घटादिकार्यं स्वकारणे विद्यमानं तिष्ठति। परन्तु लोके एवं व्यवहारः भवति यत् अयं घटो नष्टो भवति, अयं घटः उत्पद्यते। अस्योत्तरं सांख्यसूत्रस्य अनिरुद्धवृत्तौ अनेन प्रकारेण दीयते यत् नैयायिकादयः दार्शनिकाः घटस्य विषये उत्पत्तिर्नाशयोः व्यवहारः क्रियते, वस्तुतः तद् घटस्य अभिव्यक्तावस्था तिरोभावावस्था च भवति। इदं सर्वं स्वकारणसामग्र्‌यः समवधानस्य कारणम्। नाशस्याभिप्रायः कारणे लयप्राप्तिः, यथा घटस्य दण्डप्रहारेण तस्य नाशो भवति। तस्य घटस्य अभावः नास्ति अपितु स्वकारणे तस्य लयप्राप्तिः। अनेन प्रकारेण मतान्तरस्य खण्डनावसरे सांख्याचार्यैः पुष्कलप्रमाणात् स्वस्य सत्कार्यवादसिद्धान्तस्य स्थापना क्रियते।

## सन्दर्भग्रन्थसूची

1. उप्रेतिः, थानेशचन्द्रः, "सांख्यकारिका" दिल्ली, चौखाम्बासंस्कृत-प्रतिष्ठानम्, सन्- 2011।
2. गोस्वामी. नारायणचन्द्रः, "सांख्यतत्त्वकौमुदी", कोलकाता, संस्कृत-पुस्तकभण्डार, सन्- 2016।
3. विश्वनाथानन्दस्वामी, "सांख्यकारिका" कोलकाता, उद्बोधनकार्यालयः, सन्- 2000।
4. भट्टाचार्यः, श्रीवामदेवः, श्रीमद्भगवद्गीता, कोलकाता, ओरियेन्ट-लाइब्रेरी।
5. त्रिपाठी. श्रीकृष्णमणिः, सांख्यकारिका, वाराणसी, चौखम्बा सुभारती प्रकाशनम्, सन्-2018।

6. षडङ्गी, सुधांशुकुमारः, सांख्यकारिका, वाराणसी, चौखाम्बा सुभारती प्रकाशनम्, सन्–2013।

7. पाण्डेयः, जनार्दनशास्त्री, सांख्यकारिका, मोतिलालबनारसीदासः, दिल्ली, सन्– 1989।

8. गौडः, ज्वालाप्रसादः, साख्यकारिका, वाराणसी, चौखाम्बा सुभारती प्रकाशनम्, सन्–2004।

9. शास्त्री, गोस्वामीदामोदरः, सांख्ययोगदर्शनम्, चौखम्बा संस्कृत भवनम्, सन्– 2012।

10. त्रिपाठी. केदारनाथः, सांख्ययोगकोश, वाराणसी, सन्– 1974।

❏❏❏

# ब्रह्मसूत्रभाष्यादिषु आभासवादविमर्शः

-सत्येश्वरजाना *

अद्वैतवेदान्ते जीवब्रह्मणोः सम्बन्धे बहवः वादाः प्रचलिताः सन्ति। यथा अवच्छेदवादप्रतिबिम्बवादाभासवादादयः।

यथा अवच्छेदवादस्य तथा प्रतिबिम्बवादस्य मूलभूतानि तत्त्वानि शांकरभाष्ये उपलभ्यन्ते तथैव आभासवादस्यापि। अस्मिन् सन्दर्भे भगवत्पादस्य शंकराचार्यस्य निम्नलिखितानि कथनानि अवधेयानि वर्तन्ते।

(क) "आभास एव च"[1] इत्यस्य सूत्रस्य भाष्ये शंकराचार्यः कथयति "आभास एव चैष जीवः परस्यात्मनो जलसूर्यकादिवत्प्रतिपत्तव्यः। न स एव साक्षात्। नापि वस्त्वन्तरम्। अतश्च यथा नैकस्मिन्जलसूर्यके कम्पमाने जलसूर्यकान्तरं कम्पते, एवं नैकेस्मिञ्जीवे कर्मफलसम्बन्धिनि जीवान्तरस्य तत्सम्बन्धः"।[2]

(ख) अनाभासं न केनचित् कल्पितेन विषयेण अवभासते[3] .. 'अचिन्त्यास्ते यत सदैव'[4] ....'नात्माभासत्वसिद्धश्चेदात्मनो ग्रहणात् पृथक्। मुखादेश्च पृथ्विसिद्धिरिह त्वन्योन्यसंश्रयः'।[5]

भगवत्पादस्य शंकराचार्यस्य उपर्युक्तानि अन्यानि च कथनानि आश्रित्य सुरेश्वरप्रभृतिभिराचार्यैः यः आभासवाद प्रवर्तितः तस्य स्वरूपं संक्षिप्तरूपेण निम्नलिखितमस्ति।

---

* शोधच्छात्रः, अद्वैतवेदान्तविभागः, श्रीलालबहादुरशास्त्रीराष्ट्रीयसंस्कृतविश्व-विद्यालयः, नवदेहली।

1. ब्रह्मसूत्रम्, 2.3.50
2. ब्र.सू.शा.भा. 2.3.50
3. मा.उ.शा.भा. 3-4
4. तत्रैव, 4.51,52
5. उपदेशसाहस्री

**( अ ) आभासस्य स्वरूपम्-**

आभासस्य स्वरूपं सुरेश्वराचार्यस्य मतानुसारम् इत्थमस्ति-

(1) "अविद्याकार्यबुद्धिस्थप्रत्यगाभासरूपवत्।"[6]

बौद्धेत्यादिसमुत्थानं भण्यते परमात्मनः।[7]

(2) "स्वाभासैर्बहुतमिति मनोबुद्ध्याद्धोधिभिः।"

(3) "आत्मा संसारितां यातो यथा कार्यं विष तथा"।[8]

अस्यार्थः अयमस्ति यत् अविद्यायां चैतन्यस्य आभासः ईश्वर तथा बुद्धौ चैतन्यस्य आभासः जीवः। किन्तु आभासत्वात् उभावेव मिथ्या।

**( अ ) आभासस्य कारणम्-**

भगवता शंकराचार्येण माण्डूक्यकारिकायाः भाष्ये एतत् निर्दिष्टं यत् आभासः परमार्थतः कार्यकारणशून्यः अस्ति। तद्यथा 'यथाहि लोके' ऋजुवक्रादिप्रकाशभासमलातस्पन्दितझत्काचलनं तथा ग्रहणग्राहकाभासं विषयिविषयाभासमित्यर्थः। किं तद्विज्ञानस्पन्दितम्। स्पन्दितमिव स्पन्दितमविद्यया। न ह्यचलस्य विज्ञानस्य स्पन्दनमस्ति। अजचलमिति ह्युक्तम्। अचलं तेन समानं सर्वं विज्ञानस्य सदाचलत्वं तु विज्ञानस्य विशेषः। जात्याभासा विज्ञाने चले किं कृता इत्याह। अस्य कथनस्य सारः अयमस्ति यत् आभासस्य कार्यता एवं कारणता अनुपपन्ने अतः कार्यकारणशून्यः आभासः अचिन्त्यः वर्तते। किन्तु पारमार्थिकदृष्टया कार्यकारणशून्यत्वे सत्यपि व्यापारिकदृष्टया आभासस्य किंचित् कारणं भवितव्यम् इत्येवं विचार्य आभासस्य कारणं ब्रह्म इति उच्यते। तद्यथा

**बिम्बं विना यथा नीरे प्रतिबिम्बो भवेत्कथम्।**
**विनात्मानं तथा बुद्ध्यौ चिदाभासौ भवेत्कथम्॥**[9]

---

6. तत्रैव,
7. तत्रैव, अ.2, ब्रा.4, वा.425
8. मा.का.शा.भा 4-47-52
9. अद्वैतानुभूतिः 54

**अज्ञानं तदविच्छिन्नभासयोरुभयोरपि।**
**आधारं शुद्धचैतन्यं यत्तुर्यमितोर्यते॥**[10]

अस्य आशयः अयमस्ति यत् स्वविद्यायाः अभावे कार्यकारणशून्यं निर्गुणं, निर्विकारं, निष्प्रपञ्चं, निराभासं ब्रह्म स्वतः आभासस्य कारणं भवितुं न शक्नोति। अतः आभासस्य अविद्याकृतत्वं तयैवोच्यते यथा जगत् कारणं ब्रह्म उच्यते। सुरेश्वराचार्यः कथयति यत् "अविद्यायाः ब्रह्मणश्च आश्रिताश्रयः विषयीविषयः सम्बन्धः वर्तेते। असौ सम्बन्धः अनादि नैसर्गिकश्च वर्तते"।

**(इ) आभासस्य अधिष्ठानम् आश्रयश्च-**

यथा मुखाभासस्य अधिष्ठानं मुखम् आश्रयश्च दर्पणं भवतः तथैव आभासस्य अधिष्ठानं शुद्धं ब्रह्म आश्रयश्चाविद्या। तद्यथा चाविद्याकृतत्वात् तदाश्रयस्य संसारस्याविद्याकृतत्वोपपत्तिः।

**(ई) आभासस्य भेदाः-**

यथा एक एव देवदत्तः जाति, क्रिया- धर्म (गौरत्व) आदिभेदेन व्यवहितः भवति तथैव जगतः पदार्थाः अपि जात्याभासछलाभास-वस्त्वाभासरूपेण अवगन्तुं शक्यते। तद्यथा-

**जात्याभासं छलाभासं वस्त्वाभासं तथैव च।**
**अजाचलमवस्तुत्वम् विज्ञानं शान्तमद्वयम्॥**[11]

सुरेश्वराचार्येण चिद्व्यातिरिक्तस्य ईशादिविषयान्तस्य जगतः आभास-रूपतां प्रतिपाद्य चेतनाचेतनरूपेण आभासस्य द्वैविध्यं निरूपितम्। चेतनाभासः (कारणाभासः) एव चेतनाभासः कार्याभासः।

**(उ) आभासस्य उपयोगिता-**

आभासस्य उपयोगितायाः विषये शंकराचार्यस्य निम्नलिखितं कथनम् अवधेयं वर्तते "यथा चादित्यज्योतिरवभास्यभेदैः संयुज्यमानं हरितनील-

---

10. सर्ववेदान्तसिद्धान्तसारसंग्रहः 328
11. मा.का.शा.भा. 4-45

पीतलोहितादिभेदैरविभाग्यं तदाकाशभासं भवति।[12] तथा च कृत्स्नं जगदव-भासश्च क्षुरादीनि च तदाकारं भवति"। अस्मिन् विषये सुरेश्वराचार्यस्य कथनम् एतदस्ति यत्- ध्वान्तादिविषयान्तोऽर्थोजत्वान्नात्मसिद्धिकृत्। आत्मं ज्योतिरिरभावे नाभावमपि विन्दति।[13]

**(उ) आभासवादानुसारं ब्रह्म-जगत्-ईश्वर-जीव-स्थितिः-**

अस्मिन् सन्दर्भे शंकराचार्यस्य निम्नलिखितानि कथनानि अवधेयानि वर्तन्ते-

**प्रतिबिम्बचंचलत्वाद्या यथा बिम्बस्य कर्हिचित्।**
**न भवेयुस्तथा भासकर्तृत्वाद्यास्तु नात्मनः॥[14]**

**जगविलक्षणं ब्रह्म ब्रह्मणोऽन्यत् न किंचन।**
**ब्रह्मान्यद्भाति चेन्मिथ्या यथा मृगमरीचिका॥[15]**

**दृष्टं ब्रह्मातिरिक्तं सकलमिदमसद्रूपमा भासमात्रम्।**
**मायाभासो विशुद्धात्मा त्रयमेतन्महेश्वरः॥[16]**

आभास एव चैष जीवः परस्यात्मनो जलसूर्यकादिवत् प्रतिपत्तव्यः[17]

"जीवोहि नाम देवतायाः आभासमात्रम्। बुद्ध्यादिभूतमात्रासंसर्ग-जनितादर्श इव प्रविष्टः पुरुषप्रतिबिम्बो जलादिविष्वव च सूर्यादीनाम्।[18]

सुरेश्वराचार्यस्य मतानुसारं जीवः प्रत्यगात्मनः आभासः अस्ति। अतः स्वरूपतः जीवः एक एव। एकः सन्नपि जीवः नानाविधान्तःकरणवृत्तिषु आश्रितः सन् भेदभावम् आप्नोति। अतः जीवस्य नानात्वम् कल्पितमस्ति।

---

12. बृ.उ.शा.भा. 4.3.30
13. अद्वैतानुभूतिः 55
14. बृ.भा.वा. अ-4
15. आत्मबोधः, 38
16. शतश्लोकी. 64
17. स्वात्मप्रकाशिका. 38, ब्र.सू.
18. छा.उ.शा.भा. 6.3.2

## सन्दर्भग्रन्थसूची

1. विश्वनाथानन्दः, स्वामी, वेदान्तदर्शनम्, उद्बोधन-कार्यालयम्, 1996 ख्रीष्टाब्दः, वेलुडमठः।

2. शास्त्री, पण्डितः शिवनारायणः, गीताभाष्यनवाम्वरा, भारतीय पब्लिशिंग हाउस, 1673 ख्रीष्टाव्दः, वाराणसी।

3. गोयन्दका, जयदयालः, श्रीमद्भगवद्गीता, गीताप्रेसः, गोरखपुरः, 2016 ख्रीष्टाब्दः।

4. सेमवालः, श्रीकृष्णः, शङ्करग्रन्थावलिः उपनिषद्भाष्यम्, दिल्लीसंस्कृत-अकादमी (दिल्ली सर्वकारः) 2006-2007 ख्रीष्टाब्दः।

5. सेमवालः, श्रीकृष्णः, ब्रह्मसूत्रभाष्यम्, दिल्लीसंस्कृतअकादमी, (दिल्ली सर्वकारः) 2001- 2010 ख्रीष्टाब्दः।

6. धर्मराजाध्वरीन्द्रः, वेदान्तपरिभाषा, सम्पादकः श्रीगजाननशास्त्रीमुसल-गांवकरः, वाराणसी, चौखम्बा-विद्याभवनम्।

7. वल्लभाचार्यः, ब्रह्मसूत्र-अणुभाष्यम्, सम्मादकः मदनलालशास्त्री, मुम्बई, 1975 ख्रीष्टाब्दः।

8. शास्त्री, अनन्तकृष्णः, ब्रह्मसूत्रशाङ्करभाष्यम्, राष्ट्रीयसंस्कृतसंस्थानम्, नवदिल्ली, 2012 ख्रीष्टाब्दः।

❑❑❑

# न्यायवैशेषिकनये गुणतत्त्वनिर्वचनम्

-गीताञ्जलि देइ

**गुणविषये वैशेषिकसूत्रकारमतोपस्थापनम्-**

द्रव्यपदार्थनिरूपणानन्तरं गुणपदार्थस्य निरूपणं महर्षिणा कणादेन स्वीयसूत्रनिबन्धे कृतम्। गुणस्य लक्षणनिरूपणावसरे वैशेषिकसूत्रकारेण महर्षिकणादेनोक्तम्-

**"द्रव्याश्रय्यगुणवान् संयोगविभागेष्वकारणमनपेक्ष इति गुणलक्षणम्"**[1] इति। अत्रेदं बोध्यं द्रव्यमाश्रयो यस्यासौ तद्द्रव्याश्रयः भवति। द्रव्यगुणकर्मवृत्तिसामान्यादिव्यावृत्तार्थत्वापरपर्यायः सामान्यपदार्थः, स च उदयनादिनयेः सत्ता भवति। द्रव्याश्रयोऽस्मिन्नस्तीति द्रव्याश्रयी द्रव्याश्रित-मिति। न गुणवानिति गुणशब्देन गुणविशेषाः संख्यापरिमाणपृथक्त्व-संयोगविभागाः गृह्यन्ते। संयोगविभागेष्वकारणमनपेक्ष इति संयोगविभागानपेक्ष-कारणत्वरहितत्वं विवक्षितम्, कारणपदस्यानपेक्षपदेनान्वयात्। असमवायि-कारणमनपेक्षकारणं सामग्रीतुल्यरूपत्वात्।

विभागानपेक्षकारणत्वरहितत्वेनैव कर्मण्यतिव्याप्तेरीश्वरेच्छाज्ञान-प्रयत्नादृष्टेष्वव्याप्तेश्च परिहाराद् व्यर्थं संयोगकारणत्वग्रहणमिति चेत्- न, शरीरकुड्यभागजनकहस्तकुड्यविभागाव्याप्तिपरिहारार्थत्वात्। तस्मादर्थत्वाश्रयः संख्याद्यनाश्रयः संयोगकारणत्वे सति विभागानपेक्षकारणत्वरहितो गुण इति लक्षणं सिध्यति। इतिशब्दः सूत्रे उत्क्षेपणावृत्तिसंयोगासमानाधिकरणसत्ता-साक्षाद्व्याप्यजातिमान् गुण इत्येवं लक्षणान्तरपरिग्रहार्थः।[2]

---

* शोधच्छात्रा, न्यायवैशेषिकविभागः, श्री.ला.ब.शा.रा.सं.विश्वविद्यालयः, नवदेहली-110016

1. वै.सू. 1.1.16
2. वै.द. (अविज्ञातकतृकप्राचीनव्याख्यया समलंकृतम्) पृ. 8

### गुणत्वजातिसिद्धिप्रकारः-

सूत्रकारदिशा गुणलक्षणनिरूपणानन्तरं गुणत्वजाति- सिद्धिप्रकारप्रदर्शनं समुपस्थाप्यते। तथाहि- गुणत्वजातौ किं मानमिति? आशङ्कायां न्यायसिद्धान्त- मुक्तावल्यां विश्वनाथपञ्चाननभट्टाचार्येणोक्तम्- इदमिति। इदमर्थात् **"द्रव्य- कर्मभिन्ने सामान्यवति या कारणता सा किञ्चिद्धर्मावच्छिन्ना, निरवच्छिन्नकारणताया असम्भवात्। न हि रूपत्वादिकं सत्ता वा तत्रावच्छेदिका, न्यूनाधिकदेशवृत्तित्वात्। अतश्चतुर्विंशत्यनुगतं किञ्चिद्वाच्यं, तदेव गुणत्वम् इति"।**[3]

### गुणभेदप्रदर्शनम्-

गुणभेदप्रदर्शनावसरे इत्थं वक्तुं शक्यते यत्- यद्यपि "रूपरसगन्धस्पर्शाः संख्याः परिमाणानि पृथक्त्वं संयोगविभागौ परत्वापरत्वे बुद्धयः सुखदुःखे इच्छाद्वेषौ प्रयत्नाश्च गुणारिति"[4] कण्ठनिःश्रृतं सप्तदशगुणानामुल्लेखं वैशेषिकसूत्रकारैः वैशेषिकसूत्रग्रन्थे चर्चितम्, तथापि प्रशस्तपादादयः प्रभृतिभिः परवर्ती आचार्यैः सूत्रस्थ चकारेण लोकतन्त्रप्रसिद्धाः गुरुत्वद्रवत्वस्नेहसंस्कार- धर्माधर्मशब्दारिति सप्तगुणानां ग्रहणं कृतमितिः। उपस्कारे शङ्करमिश्रेणापि ग्रथितं यत्-

> **"चकारेण गुरुत्वद्रवत्वस्नेहसंस्कार-**
> **धर्माधर्मशब्दान्समुच्चिनोति"।**[5]

किन्तु वैशेषिकभाष्यकारैः चन्द्रकान्तभट्टाचार्यैः एकं नवीनं आख्यानमत्र प्रकाशितम् तथाहि-

"चकारेण गुरुत्वलघुत्वद्रवत्वस्नेहसंस्कारधर्माधर्मशब्दसमवायशक्ति- प्रभृतीनान्गुणान्र्यः समुच्चिनोति"[6]। परन्तु तन्मते गुरुत्वाभावो लघुत्वं, औपश्लेषो समवायः तथा अस्तित्वाभावेति शक्तयः न तु अतिरिक्तमपि तु

---

3. न्यायसिद्धान्तमु. पृ. 364-365
4. वै.सू. 1.1.6
5. वैशेषिकसूत्रोप. 1.1.6
6. चन्द्रकान्तभा. 1.1.6

समान-मिति। अतः गुणाः चतुर्विंशतिः भवन्ति, न न्यूनाः, नाधिका इति न्यायवैशेषिकतन्त्रे प्रसिद्धाः सन्ति। तद्यथा-

**स्वरूपनिरूपणम्-**

"सर्वपदार्थानामभिव्यक्तिनिमित्तत्वादादौ रूपं निरूपयति"[7] इति न्यायेन न्यायवैशेषिकप्रस्थाने स्वीकृतानां चतुर्विंशतिगुणानां मध्ये आदौ रूपनिरूपणं शास्त्रकारैः कृतम्। रूपस्य लक्षणनिरूपणावसरे दार्शनिकानां मध्ये महान् विप्रतिपत्तिः दरीदृश्यते। तथाहि-

"रूपं चक्षुर्ग्राह्यम्"[8] इति प्रशस्तपादाचार्याः निगदन्ति। "रूपत्वजातिमत् चक्षुर्मात्रग्राह्यो गुणो रूपम्"[9] इति शिवादित्याः। गुणत्वे सति चक्षुर्ग्राह्यं रूपम्"[10] इति उदयनाचार्याः। "चक्षुर्मात्रबहिरिन्द्रियग्राह्यगुणत्वं रूपत्वम्"[11] इति शङ्करमिश्रः उपस्कारे प्राहुर्विचक्षणा। तच्च सप्तविधं मतम्। तथाहि भाषापरिच्छेदे-

**"चक्षुर्ग्राह्यं भवेद्रूपं द्रव्यादेरुपलम्भकम्।**
**चक्षुषः सहकारि स्याच्छुक्लादिकमनेकधा"**[12] इति।

**रसनिरूपणम्-**

रूपनिरूपणानन्तरं रसस्य निरूपणं शास्त्रेषु परिदृश्यते। रसस्य लक्षणावसरे दार्शनिकानां मध्ये महान् मतभेदः परिलक्ष्यते। तथाहि- "रसो रसनग्राह्यः"[13] इति पदार्थधर्मसंग्रहकाराः प्रशस्तपादाचार्याः प्राहुः। "रसनेन्द्रिय-ग्राह्यगुणत्वव्याप्यजातिमत्त्वं रसत्वम्"[14] इति मिश्रवंशसमुद्भवः शङ्करमिश्रः

7. न्यायकन्द. पृ. 251
8. प्रशस्त. पृ. 251
9. सप्तपदा. पृ. 55
10. लक्षणाव. पृ. 4
11. वैशेषिकसूत्रोप. 7.1.6
12. भाषापरि. 100
13. प्रशस्त. पृ. 254
14. वैशेषिकसूत्रोप. 7.1.6

स्वीयोपस्कारे प्रतिपादित:। स च रसो षड्विध: मधुराम्ललवणकटुतिक्त-कषायभेदेन।

**गन्धस्वरूपम्-**

"घ्राणमात्रग्राह्यो गुणो गन्ध:"[15] अत्रेदमवधातव्यं घ्राणेन्द्रियमात्रजन्य-प्रत्यक्षज्ञानयोग्यत्वे सति गुणवत्त्वं गन्धस्य लक्षणमिति फलितम्। अतीन्द्रिये गन्धेऽतिप्रसक्तिवारणाय लक्षणे "घ्राणकरणकसाक्षात्कारविषयगुणत्व-व्याप्यजातिमत्त्वं"[16] विवक्षितम्। स च गन्धो द्विविध:, सुरभिरसुरभिभेदेनैव।

**स्पर्शलक्षणविचार:-**

स्पर्शस्य लक्षणनिरूपणावसरे आचार्याणां मध्ये विप्रतिपत्ति: नास्तीति वक्तुं नैव शक्यते। यथा- प्रशस्तपादाचार्या: स्पर्शलक्षणविचारप्रदर्शनावसरे स्वीयग्रन्थे प्रतिपादितं यत् "स्पर्शस्त्वगिन्द्रियग्राह्य:"[17] इति। किरणावल्याया-मुदयनाचार्येण भणितं यत्- "गुणत्वजातिमत्त्वे सति त्वगिन्द्रियमात्रग्राह्य:"[18] स्पर्श:। "एवं स्पर्शोऽपि स्पर्शत्वजातिमान् गुण: त्वगिन्द्रियमात्रग्राह्यगुणत्व-साक्षाद्व्याप्यजातिमत्त्वं स्पर्शत्वम्"[19] इति स्पर्शस्य लक्षणनिरूपणावसरे वैशेषिकसूत्रोपस्कार: शङ्करमिश्र: स्वीयसूत्रव्याख्यानग्रन्थे चर्चितवान्। उक्तं च भाषापरिच्छेदे-

**स्पर्शस्त्वगिन्द्रियग्राह्यस्त्वच: स्यादुपकारक:।**
**अनुष्णाशीतशीतोष्णभेदात् स त्रिविधो मत:।।**[20] इति।

**संख्यानिरूपणम्-**

अयमेक:, इमौ द्वौ इत्याकारकव्यवहारस्यासाधारणं कारणं भवति संख्या। तदुच्यते-

15. कणादरह. पृ. 32
16. कणादरह. पृ. 32
17. प्रशस्त. पृ. 256
18. किरणा. पृ. 18
19. वैशेषिकसूत्रोप. 7.1.6
20. भाषापरि. 103-104

**गणनाव्यवहारे तु हेतुः संख्याऽभिधीयते।**[21]

संख्या एकत्वादिव्यवहारहेतुरिति प्रशस्तपादाचार्याः, अन्नम्भट्टाश्च प्रवदन्ति। अत्र हेतुपदे कारणमसाधारणकारणं वेति बोध्यम्।

**परिमाणनिरूपणम्**–

मानव्यवहारासाधारणकारणमिति यद्यपि परिमाणस्य इदं लक्षणमाधुनिक-समाजतन्त्रे प्रायः सर्वत्र प्रसिद्धोः भवति तथापि परिमाणस्य लक्षणनिरूपणावसरे लक्षणावलीकारैः उदयनाचार्यैः एकं नवीनं लक्षणमत्र प्रकाशितम्। यथा– "संख्यासमवेतत्वरहितसंख्यासमवायिसमवेतसमवेतवत् परिमाणम्"[22] इति। तत् चतुर्विधं भवति। अणु–महत्–दीर्घ–ह्रस्वञ्चेति।

**पृथक्त्वस्वरूप**–

पृथक्त्वस्य लक्षणनिरूपणावसरे वैशेषिकसूत्रकारो महर्षिकणादः स्वीयसूत्रग्रन्थे "तथा पृथक्त्वम्"[23] इति प्रतिपादितवान्। सूत्रव्याख्यानावसरे प्रशस्तपादाचार्येण स्वीयनिबन्धे भणितम् यत्–

**"पृथक्त्वमपोद्धाव्यवहारकारणम्"।**[24] इति।

सूत्रोपस्कारे आचार्यशङ्करमिश्रेणापि प्रशस्तपादमिव लक्षणं ग्रथितम्। एवं "पृथक्त्वमयोगो वैलक्षण्यमनेकता इत्यनर्थान्तरमिति"[25] भाष्यकारैः चन्द्रकान्तैः स्वीयसूत्रभाष्ये चर्चितम्। अत्रेदं बोध्यं पृथक्त्वमयमिति उपलब्धिविशेषः भवति। "स खलु शब्दविशेषनिमित्तो न त्वर्थभेदादिति"[26] भाष्यकारवचनप्रामाण्यात्।

---

21. भाषापरि. 106
22. लक्षणाव. पृ. 20
23. वै. सू. 7.2.2
24. प्रशस्त. पृ. 332
25. चन्द्रकान्तभा. 7.2.2
26. चन्द्रकान्तभा. 7.2.2

**संयोगस्वरूपकथनम्–**

संयोगस्य लक्षणनिरूपणावसरे दार्शनिकानां मध्ये महान् विप्रतिपत्तिः दरीदृश्यते। तद्यथा– "संयोगः संयुक्तप्रत्ययनिमित्तम्"[27] इति प्रशस्तपादाचार्यः। "अप्राप्तिपूर्विका प्राप्तिः संयोगः"[28] इति सूत्रोपस्काराः। "अप्राप्तयोस्तु या प्राप्तिः स एव संयोग ईरितः"[29] इति विश्वनाथपादाः। स च संयोगः त्रिविधः। तथाहि वैशेषिकसूत्रम्–

**"अन्यतरकर्मज उभयकर्मजः संयोगजश्च संयोगः"**[30] इति।

चन्द्रकान्तभट्टाचार्येणापि सूत्रकारस्य मतं स्वीकृतम्।

**विभागस्वरूपचिन्तनम्–**

संयोगनिरूपणानन्तरं विभागनिरूपणं वैशेषिकसूत्रकारैः कृतम्। तथाहि सूत्रम्– **"एतेन विभागो व्याख्यातः"**[31] इति।

विभक्तप्रत्ययनिमित्तं, प्राप्तिपूर्विकाऽप्राप्तिर्विभागोऽपि[32] त्रिविधं भवति। तथाहि चद्रकान्तभाष्ये–

**"अन्यतरकर्मज उभयकर्मजो विभागश्चेति"।**[33]

**परत्वाऽपरत्वयोः स्वरूपनिर्वचनम्।–**

परत्वाऽपरत्वयोः निरूपणावसरे वैशेषिकसूत्रकारैः लक्षणमिदं प्रतिपादितं यत्–

**"एकदिक्काभ्यामेककालाभ्यां**
**सन्निकृष्टविप्रकृष्टाभ्यां परमपरं चेति।"**[34]

---

27. प्रशस्त. पृ. 335
28. वैशेषिकसूत्रोप. 7.2.9
29. भाषापरि. 115
30. वै. सू. 7.2.9
31. वै. सू. 7.2.10
32. प्रशस्त. पृ. 363
33. चन्द्रकान्तभा. 7.2.10
34. वै.सू. 7.2.21

सूत्रव्याख्यानावसरे चन्द्रकान्तभट्टाचार्येणोक्तम्-

"एका दिगेकश्च कालो ययोस्ताभ्यामेकदिक्काभ्यामेककालाभ्यां सन्निकृष्टविप्रकृष्टाभ्यां परमपरं च प्रतिपत्तव्यम्"[35] भवति। तत् द्विविधं भवति। तथाहि चन्द्रकान्तभाष्ये प्रतिपादितमस्ति यत्-

**"दैशिकं कालिकं चेति द्विविधं परत्वमपरत्वं च"।**[36]

## बुद्धिस्वरूपविवेचनम्-

वैशेषिकसूत्रकारस्य कण्ठोक्तसप्तदशगुणदिशा क्रमप्राप्तस्य बुद्धिगुणस्य विवेचनमत्रारभते। बुद्धेर्लक्षणं प्रतिपादनावसरे अक्षपादैः गौतमैः प्रतिपादितं यत्-

**"बुद्धेरुपलब्धिर्ज्ञानमित्यनर्थान्तरम्"**[37] इति।

उदयनाचार्येणापि "यस्मिन् सति आत्मनि जानामीति अनुव्यवसायो सा बुद्धिः"[38] इति बुद्धेर्लक्षणं प्रतिपादितम्। वैशेषिकमते विद्याऽविद्यारूपे बुद्धिः द्विधा प्रोक्ताः। तथाहि भाषापरिच्छेदे-

**अप्रमा च प्रमा चेति ज्ञानं द्विविधमिष्यते।**
**तच्छून्ये तन्मतिर्या स्यादप्रमा निरूपिता॥**[39]

## सुखस्वरूपनिर्वचनम्-

यतो हि सुखदुःखादिकं प्रति बुद्धिः कारणं भवति। अतः बुद्धिरूपकारणनिरूपणानन्तरं कार्यरूपसुखदुःखादिकं निरूपणं युक्तिसङ्गतं भवति। 'अनुग्रहलक्षणं सुखमिति'[40] प्रशस्तपादाचार्याः प्राहुः। 'प्रीतिः

---

35. चन्द्रकान्तभा. 7.2.21
36. चन्द्रकान्तभा. 7.2.21
37. न्या.सू. 1.1.15
38. किरणा. पृ. 51
39. भाषापरि. 126-127
40. प्रशस्त. पृ. 630

सुखमिति'[41] केशवमिश्राः आहुः। अभीष्टवस्तूनां प्राप्त्यर्थं धर्मेण सति ज्ञानेन्द्रियसन्निकर्षेण च सम्पद्यमानेन आत्ममनः संयोगाभ्याम् आत्मनि सुखमुपद्यते। तथा चोक्तं प्रशस्तपादभाष्ये–

"स्वर्गाद्यभिप्रेतविषयसान्निध्ये सतीष्टोपलब्धीन्द्रियार्थसन्निकर्षाद् धर्माद्यपेक्षादात्ममनसोः संयोगादनुग्रहाभिष्वङ्गनयनादिप्रसादजनकत्वमुत्पद्यते तत् सुखम्"[42] इति। वस्तुतः अनुकूलवेदनीयं सुखं भवति।

**दुःखस्वरूपनिरूपणम्–**

सुखविरोधित्वात् सुखनिरूपणानन्तरं दुःखस्य निरूपणं शास्त्रकारैः कृतम्। दुःखस्य लक्षणपरिष्कारावसरे महर्षिगौतमेन स्वीयसूत्रग्रन्थे भणितं यत्–

**"बाधनालक्षणं दुःखम्"**[45] इति।

केशवमिश्रेणापि 'पीडा दुःखम्' इति चर्चितम्। परन्तु प्रशस्तपादाचार्यैः स्वीयप्रकरणग्रन्थे दुःखस्य एकं भिन्नं लक्षणं प्रतिपादितम्। यथा–

**"उपघातलक्षणं दुःखम्" इति।**

अत्रेदं तत्त्वं बाधना- पीडा- उपघात इति नामत्रयस्य समानार्थता भवति।

**इच्छास्वरूपकथनम्–**

इच्छायाः स्वरूपकथनावसरे महर्षिणा कणादेन लक्षणरूपं सूत्रद्वयं सूत्रग्रन्थे उल्लिखितम्। तद्यथा–

i) 'इच्छाद्वेषपूर्विका धर्माधर्मप्रवृत्तिः'।[46]

---

41. तर्कभा. पृ. 122
42. प्रशस्त. पृ. 630
43. न्या. सू. 1.1.21
44. तर्कभा. पृ. 460
45. प्रशस्त. पृ. 633
46. वै. सू. 6.2.14

ii) 'सुखाद्रागः'[47] चेति।

सूत्रव्याख्यानावसरे चन्द्रकान्तभट्टाचार्येणोक्तम्- **"सुखहेताविच्छा-विशेषाद्रागात्तत्प्रतिषेधे द्वेषाच्च धर्मप्रवृत्तिः"**[48] इति। तथाहि गौतमीयसूत्रे-

**'प्रवृत्तिर्वाग्बुद्धिशरीरारम्भः'**[49] इति।

फलेच्छा उपायेच्छारूपेणैव सा च इच्छा द्विविधा। यथा-

**"निर्दुःखत्वे सुखे चेच्छा तद्ज्ञानादेव जायते।**
**इच्छा तु तदुपाये स्थादिष्टोपायत्वधीर्यति"**[50] इति।

अत्र फलेच्छां प्रति फलं कारणम्, उपायेच्छां प्रति इष्टसाधनताज्ञानं कारणं भवतीति सिद्धान्तः।

**द्वेषस्वरूपनिरूपण-**

द्वेषस्य लक्षणप्रतिपादनावसरे प्रशस्तपादाचार्येण स्वीयपदार्थधर्मसंग्रहे प्रोक्तं यत्-

**"प्रज्वलनात्मको द्वेषः"**[51]

अभिप्रायस्तु- यस्मिन्सति विद्यमाने ज्वलितमात्मानं मन्यते स एव द्वेषः। उदयनाचार्येणापि उक्तलक्षणं स्वीकृतम्।

**प्रयत्ननिरूपणम्-**

प्रयत्नविषये इत्थं वक्तुं शक्यते यत्- प्रयत्नः धर्माधर्मोभयजन्यः, अतीन्द्रियः श्वासनिःश्वासपरम्परानुमेयश्च भवति।

**गुरुत्वस्वरूपप्रदर्शनम्-**

सूत्रकारोक्तानां कण्ठोच्चारितानां रूपरसादिसप्तदशगुणानां निरूपणानन्तरं

---

47. वै. सू. 6.2.10
48. चन्द्रकान्तभा. 6.2.14
49. न्या. सू. 1.1.17
50. भाषापरि. 146
51. प्रशस्त. पृ. 637

च शब्देन घटकीभूतगुणविभागानाम् अवशिष्टपरिगणितसप्तगुणानां मध्ये आदौ गुरुत्वं मयात्र शोधपत्रे निरूप्यते। गुरुत्वलक्षणनिरूपणावसरे वैशेषिकसूत्रकारेण महर्षिकणादेन स्वीयसूत्रग्रन्थे द्वयमिति सूत्रेण गुरुत्वस्य लक्षणद्वयं निरूपितम्। तद्यथा–

i. "संयोगाभावे गुरुत्वात् पतनम्"।[52]

ii. "अपां संयोगाभावे गुरुत्वात् पतनम्"[53] चेति।

सूत्रव्याख्यानावसरे चन्द्रकान्तभट्टाचार्येणोक्तम्– "मेघगतानामपां वायुसंयोगात्कर्मोत्पत्त्या मेघसंयोगस्योपरमे प्रतिबन्धाभावात् गुरुत्वात्पतनं भवति"।[54]

**द्रवत्वस्वरूपम्–**

द्रवत्वस्य लक्षणनिरूपणावसरे महर्षिणा कणादेन प्रोक्तम्–

**"द्रवत्वात् स्यन्दनम्"**[55] इति।

चन्द्रकान्तभट्टाचार्येणापि स्वीयभाष्यनिबन्धे "द्रवाः खल्वापः पृथिव्यां पतिताः स्यन्दन्ते इति द्रवत्वं तत्र हेतुरिति"[56] चर्चितम्। तथा चोक्तं प्रशस्तपादभाष्ये–

**"द्रवत्वं स्यन्दनकर्मकारणम्"**[57] इति।

**स्नेहस्वरूपम्–**

स्नेहस्य लक्षणावसरे शङ्करमिश्रेणोक्तम्–"रसवन्मात्रवृत्तिवृत्तिगन्धवब्दृत्य-वृत्तिगुणत्वसाक्षाद्व्याप्यजातिमत्त्वम्"[58] इति लक्षणं जातिघटितलक्षणं वेति प्रतिपादितम्।

---

52. वै. सू. 5.1.7
53. वै. सू. 5.2.3
54. चन्द्रकान्तभा. 5.2.3
55. वै. सू. 5.2.4
56. चन्द्रकान्तभा. 5.2.4
57. प्रशस्त. पृ. 641
58. कणादरह. पृ. 71

**संस्कारस्वरूपम्–**

संस्कारः त्रिविधो भवति। तन्मध्ये पृथिव्यप्तेजोवायुमनांसि पञ्च मूर्तद्रव्याणि भवन्ति। तत्र वेगाख्यसंस्कारः वर्तते। आत्मनि भावनाख्यसंस्कारः विद्यते। तथा च स्पर्शवत् पृथिव्यादिचतुष्टयेषु स्थितिस्थापकः संस्कारः वर्तते।

**धर्मनिरूपणम्–**

धर्मस्य स्वरूपप्रतिपादनावसरे महर्षिकणादेनोक्तम्–

**"यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः"**[59] इति।

"अभ्युदयस्तत्त्वज्ञानं निःश्रेयसमात्यन्तिकी दुःखनिवृत्तिः तदुभयं यतः स धर्मः"[60] इति वैशेषिकसूत्रोपस्कारकारेण शङ्करमिश्रेण ग्रथितम्। सूत्रव्याख्यानावसरे चन्द्रकान्तभट्टाचार्येणापि "यस्मादभ्युदयनिश्रेयसयोः सिद्धिर्निष्पत्तिः स धर्मः"[61] इति निगदितम्। वस्तुतः श्रुतिविहितकर्मजन्यो धर्मो भवति।

**अधर्मस्वरूपप्रतिपादनम्–**

धर्मनिरूपणानन्तरमधर्मस्य निरूपणं कृतम्। अधर्मात् दुःखमुत्पद्यते। आत्मविशेषगुणस्य अधर्मस्य लक्षणावसरे शङ्करमिश्रेण जातिघटितमेकं नवीनं लक्षणमत्र प्रकाशितम्। यथा–

**"दुःखजनकवृत्तिप्रत्यक्षात्मगुणावृत्ति–
वृत्तिगुणत्वव्याप्यजातिमत्त्वमिति"**।[62]

**शब्दतत्त्वनिर्वचनम्–**

भाष्यकारेण चन्द्रकान्तभट्टाचार्येण कणादोक्तगुणविभाजकसूत्रस्थ च शब्देन गुरुत्वादीनां सप्तगुणानां परिगणनं कृतम्। तत्र सप्तगुणेषु मध्ये शब्दोऽन्तिमः गुणः विद्यते। तथैवोक्तं प्रशस्तपादभाष्ये–

59. वै. सू. 1.1.2
60. वैशेषिकसूत्रोप. 1.1.2
61. चन्द्रकान्तभा. 1.1.2
62. कणादरह. पृ. 77

**"चशब्दसमुच्चिताश्च गुरुत्वद्रवत्वस्नेह-**
**संस्काराऽदृष्टशब्दाः सप्तैवेत्येवं चतुर्विंशतिर्गुणाः"**[63] इति।

अनेन प्रकारेण क्रमस्यानुसरणेन चरमस्य शब्दस्य निरूपणं युक्तिसङ्गतं भवति। शब्दस्य लक्षणनिरूपणावसरे वैशेषिकसूत्रनिबन्धे महर्षिकणादेनोक्तम्-

**"श्रोत्रग्रहणो योऽर्थः स शब्दः"**[64] इति।

सूत्रव्याख्यानावसरे भाष्यकारेण चन्द्रकान्तेन स्वीयभाष्ये प्रतिपादितं यत्-

**"योऽयं श्रोत्रेण गृह्यतेऽर्थः स खलु शब्दः"**[65] इति।

स च शब्दः द्विविधः। ध्वन्यात्मको वर्णात्मकश्चेति।

निष्कर्षः- अतः गुणाः चतुर्विंशतिर्संख्यकाः, न न्यूनाः, नाप्यधिका इति न्यायवैशेषिकतन्त्रे प्रसिद्धाः। अयमिति सिद्धान्तः।

## सन्दर्भग्रन्थसूची

1. कणादसूत्रवृतिः, जयनारायणतर्कपञ्चाननभट्टाचार्यः, सम्पा. विन्ध्येश्वरीप्रसादः, कलकत्ता, 1861
2. कारिकावली, विश्वनाथपञ्चाननभट्टाचार्यः, भारतीयबुककॉरपोरेशन, दिल्ली, 1861
3. तर्ककौमुदी, लौगाक्षिभास्करः, सं.वी.एल.एस. पनसीकरः, निर्णयसागरप्रेस, बम्बई, 1928
4. तर्कभाषा, केशवमिश्रः, सम्पा. बदरीनाथशुक्लः, मोतीलालबनारसीदासः, वाराणसी, 1968

---

63. प्रशस्त. पृ. 27
64. वै. सू. 2.2.21
65. चन्द्रकान्तभा. 2.2.21

5. तर्कसंग्रहः, अन्नंभट्टः, सम्पा. गोविन्दाचार्यः, चौखम्बा (दीपिका-न्यायबोधिनी-पदकृत्य-श्रीनिवासमुखोल्लासिनी सुरभारती प्रकाशनम्, वाराणसी, 2015)

6. तत्त्वचिन्तामणिः, गंगेशोपाध्यायः, गादाधरीसंस्करणम्, कलकत्ता, 1892

7. न्यायकुसुमाञ्जलिः, उदयनाचार्यः, सं..महाप्रभुलालगोस्वामी, मिथिला विद्यापीठग्रन्थमाला, सं. 28, 1972

8. न्यायकोशः, भीमाचार्यझलकीकरः, चौखम्बा सुरभारती प्रकाशनम्, वाराणसी, 1928

9. न्यायदर्शनविमर्शः, कालीप्रसादसिंहः, संस्कृतबुकडिपो, कलकत्ता, 1980

10. न्यायबोधिनी, कनकलालठक्कुरः, मा. खेलाड़ीलालप्रकाशनम्, 1928

11. न्यायभाष्यम्, आचार्यवात्स्यायनः, व्याख्या. सुदर्शनाचार्यः (प्रसन्न-पदाव्याख्याविभूषिता) सम्पा. द्वारिकादासशास्त्री, सुधी प्रकाशनम्, वाराणसी, 1986

12. न्यायमञ्जरी, जयन्तभट्टः, सम्पा. गङ्गाधरशास्त्रीतैलङ्गः, चौखम्बा संस्कृतसीरीज, वाराणसी, 1985

13. न्यायसूत्रम्, महर्षिगौतमः, सम्पा. तारानाथः, देहली, 1984

14. पद्मपुराणम्, महर्षिवेदव्यासः, अनु. मुन्नीलालगुप्ता, गीताप्रेसः, गोरखपुरम्, 1996

15. पाणिनीयसूत्रम्, सम्पा. डॉ. प्रबोधचन्द्रलाहिड़ी, पं. हृषीकेशशास्त्री, डॉ. प्रद्योतकुमारवन्द्योपाध्यायः, दि ढाका स्टुडेन्टस् लाइब्रेरी, 1959

16. वैशेषिकसूत्रम्, महर्षिकणादः, सम्पा. नारायणमिश्रः, चौखम्बा संस्कृत-सीरीज, वाराणसी, 1966

17. वैशेषिकसूत्रोपस्कारः, शंकरमिश्रः, सम्पा. ढुण्ढिराजशास्त्री, काशी संस्कृतग्रन्थमाला, वाराणसी, 1969

18. श्लोकवार्त्तिकम्, कुमारिलभट्टः, सं.द्वारिकादासशास्त्री, तारा

पब्लिकेशन्स, वाराणसी, 1978

19. सर्वदर्शनसंग्रहः, माध्वाचार्यः, सम्पा. उमाशंकरशर्मा 'ऋषि', चौखम्बा विद्या भवनम्, वाराणसी, 1964

20. सिद्धान्तचन्द्रोदयः, कृष्णधूर्जटि, चौखम्बा संस्कृतसीरीज, वाराणसी, 1986

21. सांख्यकारिका, ईश्वरकृष्णः, सम्पा. आद्याप्रसादमिश्रः, अक्षयवट-प्रकाशनम्, इलाहाबाद, 2027, वि. संवत्

22. वैशेषिकदर्शनम्- शंकरमिश्रकृतवैशेषिकसूत्रोपस्कारजयनारायणकृत-काणादसूत्रविवृतिचन्द्रकान्तभट्टाचार्यविरचितं भाष्यम्।

❒❒❒

# न्यायनये वादजल्पादिकथास्वरूपविवेचनम्

**-रतनचन्द्रसरकारः ***

दर्शनशब्दस्य व्युत्पत्तिः प्रतिपाद्यते- **"दृश्यते अनेनेति दर्शनम्"**। अस्य दर्शनशास्त्रस्य मुख्योद्देश्यं भवति आत्मतत्त्वज्ञानं जगति विद्यमानानां पदार्थानां तत्त्वज्ञानञ्चेति। नवविधेषु भारतीयदर्शनशास्त्रेषु न्यायनयेऽपि अस्य विषयस्य नास्ति व्यतिक्रमः। तत्र आत्मतत्त्वप्रतिपादने षोडशविधाः पदार्थाः स्वीकृताः न्यायसूत्रकारेण गौतमेन। तेन कृतं सूत्रम् एवं भवति- **"प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डा-हेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः"**[1] इति। सूत्रेऽस्मिन् वादजल्पवितण्डाश्च तत्त्वज्ञानस्य कारणभूताः पदार्थाः सन्ति, इति सूत्रकारेण स्वीक्रियन्ते। महर्षिणा गौतमेन कथेतिपदेन वादजल्प-वितण्डानामकं पदार्थत्रयं अङ्गीकृतम्। भाष्यकारेण वात्स्यायनेन विषयेऽस्मिन् निराकृतम्- **"तिस्रः कथा भवन्ति वादो जल्पो वितण्डा चेति"**।[2] तदनन्तरं वृत्तिकारेणापि स्पष्टरूपेण कथातिस्रः स्वीक्रिताः- **"तिस्रः खलु कथा भवन्ति वादो जल्पो वितण्डा च"**।[3] वादजल्प- वितण्डाश्चेति तिस्रः कथाः विचारपदेनापि बोध्यते। अतः वार्त्तिककारेण उद्योत्करेण विचारसत्त्वं साधितम् यत्- **"तत्र विचारो वादो जल्पो वितण्डेति"**।[4]

---

* शोधच्छात्रः, न्यायविभागः, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः, नवदेहली।

1. न्यायसूत्रम्, 1.1.1
2. वात्स्यायनभाष्यम्, वादलक्षणम्, पृ.सं- 367
3. न्यायसूत्रवृत्तिः, वादलक्षणम्, पृ.सं- 262
4. न्यायवार्त्तिकम्, वादलक्षणम्, पृ.सं- 146

अपि च **"न विगृह्य कथारूचिः"**[5] इति वाल्मीकिरामायणस्य अयोध्या-काण्डेऽपि परिलक्ष्यते। साधनीयः पक्षः स्वपक्षः तथा दूषणीयः पक्षः परपक्षः वा प्रतिपक्षः। स्वपक्षपरपक्षयो उभययोर्मध्ये कथां प्रचलिता। अतः सा कथा विचार्ये विषये तत्त्वनिर्णयविजयहेतुत्वात् स्वपक्षप्रतिपक्षयोः यथोक्तवाक्यं नियमानुसारेण उक्तिप्रत्युक्तिवचनं भवति। एतस्मिन् कथाप्रसङ्गे न्यायसूत्रवृत्यां **"तत्त्वनिर्णयविजयान्यतरस्वरूपयोग्यन्यायानुगतवचन-सन्दर्भः कथा"**[6] इति आचार्यविश्वनाथेन वर्णितम्। तिसृणां कथानां मध्ये वादकथायाः फलं भवति तत्त्वनिर्णयः। किन्तु जल्पे पक्षप्रतिपक्षयोः तत्त्वनिर्णयेन सह विजयोऽपि सम्भवति एवञ्च विजयेच्छा हि वितण्डायां विद्यमानम् अस्ति। कथामाध्यमेन बोध्यते, निश्चितरूपेण यदि एकपक्षस्य विजयं भवेत् तर्हि अपरपक्षस्य विजयं कदापि न सम्भवेत्। अतः वक्तुं शक्यते, एकपक्षेन विचार्यं कार्यम् अत्र न विवक्षितम्। एतस्माद् कारणाद् आचार्य-वाचस्पतिमिश्रेण कथितम्- **"तथा च नानाप्रवक्तृकविचारविषया वाक्य-संगदृग्धिः कथेति"**।[7] कथाप्रसङ्गेऽस्मिन् श्रीमान् वरदराजोऽपि अवदत्- **"विचारविषयो नानावक्तृको वाक्यविस्तारः"**।[8]

तिसृषु कथासु सूक्ष्मभेदो विद्यते। यतः कथितम् अस्ति यद्-तत्त्वबुभुत्सुकथा वादः, विजिगीषुकथा जल्पः, एवञ्च प्रतिपक्षस्थापनाहीना विजिगीषुकथा वितण्डा। कथावर्णनायाः प्राग्काले उद्योतकारो स्वीकरोति- **"सोऽयं पक्षप्रतिपक्षपरिग्रहश्च्छलजातिनिग्रहस्थानप्रयोगाप्रयोगाभ्यां भिद्यमानो वादो जल्पो वितण्डा च भवति"**।[9] तिसृषु कथासु परिग्रहो भवति वादः। यतोहि पक्षप्रतिपक्षयोः सम्विदेव परिग्रहः। परिग्रह इत्युक्ते अभ्युपगमव्यवस्था। "एवं धर्मा अयं धर्मी, नैवं धर्मा अयं धर्मी" इत्येवं यस्य विरूद्धधर्मद्वयस्य परिग्रहः, स एव पक्षप्रतिपक्षयोः परिग्रह उच्यते।

---

5. वाल्मिकीरामायण, अयोध्याकाण्डम्, 2.42
6. न्यायसूत्रवृत्तिः, वादलक्षणम्, पृ.सं- 263
7. न्यायवार्त्तिकतात्पर्यटीका
8. तार्तिकरक्षा
9. न्यायवार्त्तिकम्, जल्पलक्षणम्, पृ.सं- 162

अर्थात् वादिप्रतिवादिनोः पक्षप्रतिपक्षं स्वीकारस्य प्रतिज्ञानः तथा व्यवस्थैव भवति अभ्युपगमव्यवस्थेति। उद्योतकारेण स्पष्टीकृतम्- **"प्रमाणतर्क-साधनश्च प्रमाणतर्कसाधनोपालम्भश्च प्रमाणतर्कसाधनोपालम्भः, एकस्य साधनस्य गम्यमानार्थत्वाल्लोपः, यथा उष्ट्रमुखीति"**।[10] प्रमाणतर्काभ्यां स्वपक्षसाधनं परपक्षोपालम्भश्च प्रतिपाद्यते तर्हि सिद्धान्ताविरूद्धः पञ्चावयव-युक्तश्च पक्षप्रतिपक्षयोः परिग्रहो भवति वादः। अर्थात् प्रमाणतर्कपञ्चावयव-युक्तप्रभृतिविषयाणां प्रयोगेन सिद्धान्ताविरूद्धतत्त्वनिर्णये चेष्टते, तस्मिन् समये पक्षप्रतिपक्षो उभययोर्मध्ये या कथा प्रचलति सा कथैव वादो बोध्यते। वादविषये सूत्रकारेण महर्षिगौतमेन निर्दिष्टम्- **"प्रमाणतर्क-साधनोपालम्भः सिद्धान्तविरूद्धः पञ्चावयवोपपन्नः पक्षप्रतिपक्षपरिग्रहो वादः"**।[11] अस्मिन् विषये केशवमिश्रेणापि निगदितं तर्कभाषायाम्- **"तत्त्वबुभुत्सोः कथा वादः"**।[12] वादकथायाम् एकोद्देश्यम् एव विद्यते तत्त्वनिर्णयः। पुरुषः वादकथायां छलादिमाध्यमेन स्वपक्षसाधनं वा परपक्षनिषेधः न करोति। अतः जल्पे निग्रहस्थानस्य विनियोगादेव वादे तत्प्रतिषेधो भवति। पञ्चावयवौपयिकः नास्ति वादः, अवश्यं सिद्धान्ताविरूद्धरेव वादरिति। पञ्चावयवोपपन्नपदे पञ्चपदेन न्यूनाधिकमिति पदद्वयं तथा अवयवपदेन अवयवाभासो गृहीतम्। एवञ्च सिद्धान्ताविरूद्ध इत्युक्ते अपसिद्धान्तं बोध्यते ज्ञायते वा। किन्तु कस्यचित् प्रमाणस्य दोषनिर्धारणार्थं न्यूनाधिके द्वे निग्रहस्थानस्य उद्भावनम् आवश्यकता अस्ति, नोचेत् वादकथा न सम्भवति। अनेन कारणेन वादेऽपि अवयवाभासः, न्यूनम्, अधिकम्, अपसिद्धान्तञ्चेति पञ्चनिग्रहस्थानस्य प्रयोगं आवश्यकं प्रतिपादयति। प्रमाणतर्काभ्यां साधनम् उपालम्भश्च कर्तुं शक्यते वादकथायाम्। अतः भाष्यकारेण उक्तम्- **"तेनापि कल्पेन साधनोपालम्भौ वादे भवत इति ज्ञापयति"**।[13] वाचस्पतिमिश्रेणापि अनुरूपेण उपवर्णिता- **"वादः पञ्चावयवोपपन्न**

---

10. न्यायवार्त्तिकम्, वादलक्षणम्, पृ.सं- 148
11. न्यायसूत्रम्, 1.2.1
12. तर्कभाषा, वादपदार्थनिरूपणम्, पृ.सं- 533
13. न्यायभाष्यम्, वादलक्षणम्, पृ.सं- 370

**इत्येकः कल्पः, प्रमाणतर्कसाधनोपालम्भ इति द्वितीय इत्यर्थः"**।[14] किन्तु वादे गुरवादिभिः सहैव वादविचारः करणीय इति उपदेशम् अस्ति। तत्र वादविचारे अधिगततत्त्वस्य ज्ञानम्, संशयस्य निवृत्तिः, अध्यवसितस्य अभ्युपगमरिति फलत्रयाणाम् आकाङ्क्षाहेतुत्वात् वादविचारं प्रचलति। प्रतिद्वन्द्विना सह न वादः परिलक्ष्यते, तस्मिन् क्षेत्रे जल्प एव कर्तव्यः। अस्माद् कारणात् जल्पे सर्वस्य निग्रहस्थानस्यैव प्रयोगं दृश्यते। किन्तु वादे समग्रनिग्रहस्थानस्य प्रयोगं न भवति। अतएव वादजल्पयोः विशेषो वर्तमानोऽस्ति।

तिसृषु कथासु एका कथा वर्तते जल्पकथा। विनिग्रहो भवति जल्पः। अर्थात् छलजातिनिग्रहस्थानसाधनोपालम्भ एव जल्पः कथयति। स्वपक्षप्रतिपक्षयो उभययोः पक्षस्थापनावती विजिगीषुकथा बोध्यते जल्पः। विजयस्य कृते येन तेन प्रकारेण परपक्षं दूषित्वा स्वपक्षस्थापनामेव जल्पो भवति। तर्कभाषायाम् अस्ति– **"उभयसाधनवती विजिगीषुकथा जल्पः"**।[15] जल्पे वादभेदो विद्यते वादभिन्नत्वात्। वादे प्रमाणतर्काभ्यां साधनोपालम्भं प्रतिपादयति। किन्तु छलादयो भवन्ति असदुत्तरविशेषः। तत्र असदुत्तरेण साधनोपालम्भयोः कृते तत्त्वनिर्णये कोऽपि जनः प्रवृत्तिः न भवति। किन्तु विजयस्य कृते स एव पुरूष असदुत्तरस्य प्रयोगं करोति। यतः जल्पादौ छलादीनां व्यावहारो लक्ष्यते। अतः विजिगीषुपुरुष एव छलादीनाम् उपयोगं करोति जल्पे। अतएव जल्पो भवति विजिगीषुकथा। अर्थात् उभयपक्षस्थापनावती विजिगीषुकथा जल्पः। वृत्तिकारेण आचार्यविश्वनाथेन निर्णीतम्– **"छलेत्यादिना विजिगीषुकथात्वं बोध्यते। विजिगीषुर्हि छलादिकं करोति तथा चोभयपक्षस्थापनावती विजिगीषुकथा जल्प इत्यपि वदन्ति"**।[16]

जल्पे पक्षप्रतिपक्षयो उभययोरेव स्वपक्षरक्षणं परपक्षप्रतिषेधञ्च करोति। तस्मात् कारणात् जल्पे प्रमाण–प्रमाणाभास–तर्क–तर्काभासप्रभृतीनां उपयोगं कर्तुं शक्यते। वस्तुतः यः पुरुषः प्रमाणाभासतर्काभासयोः प्रयोगं करोति, स

---

14. न्यायवार्त्तिकतात्पर्यटीका
15. तर्कभाषा,जल्पपदार्थनिरूपणम्, पृ.सं– 535
16. न्यायसूत्रवृत्तिः, जल्पलक्षणम्, पृ.सं– 271

एव वादिपुरुषः प्रतिवादिपुरुषश्च विजयेच्छावशात् स्वेच्छया एवं साधयति। यतः इमे द्वे प्रमाणतर्कज्ञाने हि आहार्यज्ञानं वर्तते। विषयेऽस्मिन् वृत्तिकारेण व्याख्या कृता– **"न तु ज्ञानेऽनाहार्यत्वं विवक्षितम्, आरोपितप्रमाण-भावेनापि जल्पस्य निर्वहात्"**।[17] बाधकालीनेच्छाप्रयोज्यं ज्ञानम् आहार्य-ज्ञानमिति बोध्यते। छलादिमाध्यमेन परपक्षमतं खण्डयित्वा स्वपक्षस्थापना हि जल्पकथा। अतः महर्षिणा गौतमेन सूत्रं प्रदत्तम्– **यथोक्तोपपन्नश्छल-जातिनिग्रहस्थानसाधनोपालम्भो जल्पः**।[18] उपपन्नेन अर्थात् प्रमाणतर्क-साधनोपालम्भः, सिद्धान्तविरूद्धः, पञ्चावयवोपपन्नः, पक्षप्रतिपक्षपरिग्रहरिति पदचतुष्टयेन तथा छलजतिनिग्रहस्थानेन जल्पे साधनोपालम्भौ एव सिद्धति। अस्मिन् जल्पलक्षणे छल इत्युक्ते वचनविघातोऽथावकल्पोपपत्त्या छलम् इति महर्षिगौतमेन प्रतिपादिम्। यः प्रतिवादिपुरुषः जल्पवितण्डयोः कस्मिञ्चित् समये यदि सदुत्तरं वक्तुं न शक्यते किम्वा असमर्थो भवेत्, पराजयहेतुत्वात् भिन्नभिन्नप्रकारेण असदुत्तरप्रयोगेन स्वमतं स्थापनार्थं प्रचेष्टते। अतः असदुत्तरप्रयोगेन स्वपक्षसाधनमेव छलः। छलविषये श्रीमान् केशवमिश्रः स्वाभिमतम् उपस्थापयति– **"अभिप्रायान्तरेण प्रयुक्तस्य शब्दस्यार्थान्तरं परिकल्प्य दूषणाभिधानं छलम्। यथा नवकम्बलोऽयं देवदत्त इति"**।[19] तद्छलं वाक्छलं सामान्यछलम् उपचारच्छलञ्चेति त्रिविधम्। अनन्तरम् असदुत्तरं भवति जातिः। यथा शब्दोऽनित्यः कृतकत्वात्। सा जातिः उत्कर्षसम–अपकर्षसमादिभेदेन चतुर्विंशतिः प्रकाराः सन्ति। जातिविषये न्यायसूत्रे वर्तते–**"साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानं जातिः"**।[20] तत्पश्चात् पराजयहेतुः हि निग्रहस्थानम्। तन्निग्रहस्थानं न्यून–अधिक–अपसिद्धान्तादिभेदात् बहुविधम्। न्यायसूत्रे कथितम् अस्ति– **"विप्रतिपत्तिरप्रतिपत्तिश्च निग्रहस्थानम्"**।[21] तत्र छलजातिनिग्रहस्थानानाम् अङ्गभावः स्वपक्षरक्षणार्थत्वात्

17. न्यायसूत्रवृत्तिः, जल्पलक्षणम्, पृ.सं–269
18. न्यायसूत्रम्, 2.43
19. तर्कभाषा, छलपदार्थनिरूपणम्, पृ.सं– 583
20. न्यायसूत्रम्, 1.2.18
21. न्यायसूत्रम्, 1.2.19

तानि हि प्रयुज्यमानानि परपक्षविघातेन स्वपक्षं रक्षन्ति। तथा चोक्तम्- **"तत्त्वाध्यवसायसंरक्षणार्थं जल्पवितण्डे बीजप्ररोहसंरक्षणार्थं कण्टक-शाखावरणवदिति"**।[22]

समस्तं वादलक्षणं छलजातिनिग्रहस्थानसाधनोपालम्भश्च जल्प इति न्यायवार्त्तिके उल्लेखितम् एतद् लक्षणम्। तत्र साधनोपालम्भविषये स्पष्टरूपेण व्याख्या कृता- साधनं स्थापना, उपालम्भः प्रतिषेध इति। अपि च साधनपदस्य अर्थः परकीयानुमानम्, उपालम्भपदस्य अर्थो भवति यत्न इति। न्यायसारे उल्लेखितम् अस्ति- **"सिद्धिः साधनम्, उपालम्भनमुपालम्भः"**।[23] प्रमाणतर्कसाधनोपालम्भविशिष्टः, पक्षप्रतिपक्षयोः परिग्रहविशिष्टः या कथा यस्मिञ्च क्षेत्रे छलजातिनिग्रहस्थानैः परकीयानुमानस्य अर्थात् वादिप्रतिवादिनोः अनुमानस्य यत्नो प्रयच्छति सा कथा जल्पकथा। अतएव अनन्तरं कोऽपि अनुपपत्तिः न भवति। तत्र छलजातिनिग्रहस्थानानाम् अङ्गभावः स्वपक्ष-रक्षणार्थत्वात् तानि हि प्रयुज्यमानानि परपक्षविघातेन स्वपक्षं रक्षन्ति।

स्वपक्षस्थापनारहितं विजिगीषुकथा जल्पो हि वितण्डा भवति। तर्कभाषायाम् अस्ति- **"स एव स्वपक्षस्थापनाहीनो वितण्डा"**। अर्थात् यस्यां कथायां स्वपक्षस्य मतं न स्थापयित्वा नूनं परपक्षं खण्डयति सा एव कथा वितण्डा। न्यायवार्त्तिके एवम् अस्ति- **प्रतिपक्षस्थापनाहीनं च वाक्यं वितण्डेत्युच्यते**।[25] जल्पात्मके कथायां परपक्षखण्डनं तथा स्वपक्षरक्षणम्, किन्तु वितण्डात्मके कथायां केवलं परपक्षखण्डनमेव भवति। वैतण्डिकस्य आत्मपक्षस्थापनार्थं नास्ति अपरपक्षस्य प्रयोजनम्। सुतरां यया कथया जिगीषुप्रतिवादी यथानियमेन केवलं परपक्षखण्डनं हि करोति, स्वपक्षः तथा प्रतिपक्षसाधनं न करोति सा एव कथा वितण्डा। न्यायसूत्रकारेण उक्तम्- **"स प्रतिपक्षस्थापनाहीनो वितण्डा"**।[26] चरक-

---

22. न्यायभाष्यम्, जल्पलक्षणभाष्यम्, पृ.सं- 379
23. श्रीभासर्वज्ञः, न्यायसारः
24. तर्कभाषा, वितण्डापदार्थनिरूपणम्, पृ.सं- 535
25. न्यायवार्त्तिकम्, पृ.सं- 15
26. न्यायसूत्रम्, 1.2.3

संहितायाः विमानस्थाने वितण्डाकथाप्रसङ्गे कथितम् अस्ति– **“जल्पविपर्य्ययो वितण्डा, वितण्डा नाम परपक्षदोषवचनमात्रमेव”**।[27] परपक्षखण्डनेन विजयोद्देश्यमेव कथायाः प्रवृत्तिः जायते। अर्थात् वादिपुरुषः स्वपक्षस्थापना करोति तथापि प्रतिवादिपुरुषः वैतण्डिकः स्वपक्षस्य न स्थापयित्वा विजयहेतुत्वात् उपस्थापितपरपक्षस्य उपालम्भः करोति। अन्ये तु परपक्षखण्डनेन एव वैतण्डिकस्य आत्मपक्षो बोध्यते।

मानवजीवने वादजल्पादिकथानां व्यवहारं प्रतिमुहूर्तं दूरीदृश्यते। कस्मिञ्चित् तत्त्वनिर्णये अस्माकं दैनन्दिनव्यवहारिकजीवने अस्माभिः एतासां कथानां प्रयोगः क्रियते। कथानां गुरूत्वं न केवलं मानवजीवने अपि तु राजनीतौ गुरूत्वं महत्वञ्च अस्ति। न्यायालये यदा पक्षप्रतिपक्षयोः मध्ये विचार्यं कार्यं प्रचलति तदा कथातिसृणां प्रयोगं दृश्यते। अतः वादादिकथानां प्रयोजनं अभूतपूर्वम् अस्तीति।

## सन्दर्भग्रन्थसूची

1. गौतम–महर्षिः, न्यायदर्शनम्, शास्त्री–स्वामीद्वारिकादासः (सं), बौद्धभारती, वाराणसी, 1989/2.

2. उद्योत्कर–श्रीभारद्वाजः, न्यायवार्तिकम्, द्विवेदी–पं. विन्ध्येश्वरी (सं.), चौखम्भासंस्कृतभवन, वाराणसी, 1916

3. उपाध्याय–बलदेवः (व्या.), भारतीयदर्शनम् (सं.), (व्या.), चौखम्बा–संस्कृतभवन, वाराणसी, 2021

5. भट्टराघवः, न्यायसारविचारः, डॉ. श्रीउमारमणझा, श्रीरणवीरकेन्द्रीय–संस्कृतविद्यापीठम्, जम्मूः

6. तर्कालङ्कार–जगदीशः, तर्कामृतम्, (तरङ्गिणी–चषकव्याख्या एवं चषकतात्पर्यटीका–व्याख्यासमेतम्), दीक्षित–प्रो. पीयूषकान्तः (सं) (व्या.), नागपब्लिशर्स, दिल्ली, 2003/1

---

27. चरकसंहिता, विमानस्थानम् (अष्टमाध्यायः)

7. प्रशस्तपाद–आचार्यः, प्रशस्तपादभाष्यम्, चौखम्बासंस्कृतसंस्थानम्, वाराणसी

9. भट्टाचार्य–विश्वनाथपञ्चाननः, कारिकावली, (न्यायसिद्धान्त–मुक्तावलीसहिता), दाहाल–आचार्यलोकमणिः (व्या.), चौखम्बा–सुरभारतीप्रकाशन, वाराणसी

10. माधव–आचार्यः, सर्वदर्शनसंग्रहः (भाषाटीकासहितः), शास्त्री–उदयनारायणसिंहः (अनु.), लक्ष्मीवेंकटेश्वरमुद्रालयः, मुंबई, 1982

11. मिश्र–श्रीकेशवः, तर्कभाषा, मुसलगाँवकर–डॉ. गजाननशास्त्री (व्या.), चौखम्बाविद्याभवन, वाराणसी, 2007

12. मिश्र–वाचस्पतिः, न्यायवार्त्तिकतात्पर्यटीका, द्राविड–राजेश्वरशास्त्री (सं), काशीसंस्कृत सीरीज, वाराणसी, 1925

13. वात्स्यायन–आचार्यः, न्यायभाष्यम्, सुदर्शनाचार्यः (व्या.), गुजराती–मुद्रालयम्, मुंबई–1922/1

14. सर्वज्ञ–श्रीभाः, न्यायसारः, वासुदेवसूरीः (व्या.), संजयप्रकाशनम्, दिल्ली–2005

15 वाल्मीकिमहर्षिः, श्रीमद्वाल्मीकीयरामायणम्, हिन्दी–अनुवाद–श्लोकाङ्कसहित, गीताप्रेस, गोरक्षपुर

❒❒❒

# स्त्रीवादः

-हेमचन्द्र उप्रेती*

वादशब्दोऽत्र निश्चितार्थः भवति। अत्र प्रकरणे स्त्रीशब्दः स् अक्षरेणसत्त्वगुणस्य, त् अक्षरेण तमोगुणस्य, र् अक्षरेण रजोगुणस्य, इकारेण सत्त्वरजस्तमसाम् इशित्री भवति। सृष्टौ स्त्री विजयते इति निश्चप्रचम्। माता पूर्वोक्ता स्त्री भवति। तत्कथमिति? सन्धानपरमनुभव एव। स्वजननी एव आदिगुरुः भवति। जननी एव शिशुभावं प्राप्तान्नस्यान् प्रतिपदम् इदमस्मै देयमिदमदेयमिति सुचारुविज्ञाय प्रददाति। गर्भकाले अनुभूतं ज्ञानं विस्मृत्य वयं बाह्यजगति सुखेऽपि दुःखांशबाहुल्ये, दुःखेऽपि सुखांशबाहुल्ये परस्परस्थलेषु सुखांशस्य आदाने प्रवृत्ताः स्मः। जननिदेवो भवेम। जननीभावः अनारोपितः वास्तविकः स्वजनन्यामेव भवति, अन्यत्र आरोपितमातृभावेषु नूनं सः भावः शुद्ध्यः। जनन्याः सर्वाः अपि अस्मासु बाल्यभावं प्रददाति। इदं सर्वं प्राणिणां सर्वेषां समानं भवति। सत्त्वरजस्तमसामीशितृत्वे सुचारु एव ईश्वरस्य अपि ईश्वरत्वं प्रसिद्ध्येदिति मन्ये।

प्रकृतिः स्त्री, स्वभावः पुमान्। प्राणिषु बाहुल्यांशेन पुंस्त्वमापन्नेषु स्त्रीशरीरमपि अनुस्यूतमनुभूयते। अन्यत्रापि पुंशरीरम् अनुस्यूतमनुभूयते।

परोपकाराय प्रवृत्ताः गावः स्त्रियः, नद्यः स्त्रियः, पुस्तिकाः स्त्रियः एवं प्रकारेण संप्राप्तेषु वस्तुषु पूर्वोक्तप्रकारेण स्त्रीत्वभावमनुभूय प्रवृत्तिमतां साधुभावमापन्नानां सर्वमपि श्रेयस्करं भवति।

**गुरुः साक्षात् परा देवी जन्मजन्मनिसन्युता।**
**मातृभावं समापन्ना श्रेयस्करि मती सती।।**

---

* शोधच्छात्रः, विशिष्टाद्वैतवेदान्तविभागः, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्व-विद्यालयः, नवदेहली।

वर्तमानसमाजे सर्वैः दार्शनिकैः स्व–स्वदर्शनग्रन्थेषु अनेकवादा–नामुल्लेखाः कृताः। यथा सांख्यानां सत्कार्यवादः, बौद्धानां शून्यवादः, अद्वैतवेदान्तीनामद्वैतवादः, श्रीरामानुजाचार्यस्य विशिष्टाद्वैतवादादयः अनेकवादाः दृग्गोचरीभवन्ति। सर्वे स्वस्वमतैः एतान् वादान् स्थापितवन्तः। परं कश्चिदपि दर्शनग्रन्थः स्त्रीवादपरो न दृश्यते, सर्वेषु स्त्रीशब्दः समाहितोऽस्ति हि। यथा आत्मनः अभावे शरीरस्य कल्पनाकरणम् असम्भवमस्ति। तथैव संसारस्य कल्पनाकरणं स्त्रीणामभावे असम्भवमस्ति। सर्वे प्राचीनकालादेव स्त्रियं प्रथमगुरोः स्थाने व्यवहरन्ति। एकबालकस्य जीवनस्य आरम्भ एव मातृवचनैः जायते। शिशुः स्वजीवनारम्भे मात्रा यत्किञ्चिदपि शिक्षयति, तत्तस्य आगामीकालस्य सोपानसदृशं कार्यं करोति। स्त्री वैदिककालादेव पूजनीयासीत्। वेदान् सर्वेभ्यः परमप्रमाणं मन्यन्ते। वेदेषु स्त्रियं देव्याः स्थानप्राप्तमस्ति। शक्तिरूपा कथितमस्ति। दुर्गासरस्वतीलक्ष्म्यादयः अनेकाः शक्तिरूपाः सन्ति। प्रजापतीनां कृतेऽपि स्त्र्याभावे सृष्टिरचनाकरणम् एककल्पनामात्रमेव आसीत्। प्राचीनकाले पुरुषबहुत्वं समाजं न भूत्वा एकसमानमासीत्। स्त्रियोऽपि सर्वकार्यकरणस्य अनुमतिः आसीत्। किञ्चनैव एतादृशं कार्यं भविष्यति यस्मिन् स्त्र्यावश्यकता न्यूनं स्यादुत न स्यात्। अनेकाः एतादृश्यः विदुष्यः स्त्रियः आसन्। यासां वर्णनमस्माभिः स्मृतिषु दरीदृश्यते। याः स्वशास्त्रार्थेन उत्तमान् विदुषोऽपि परास्तं कृतवत्यः। याज्ञवल्क्यस्मृतौ गार्गीमैत्रेयीसदृशीनां विदुषीणां शास्त्रार्थाः एतेषामुदाहरणमस्ति। मनुनाऽपि स्वस्मृतिग्रन्थे स्त्रियं पूजनीयं मन्यते–

**"यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः।**
**यत्रैतासु न पूज्यन्ते सर्वास्तत्राऽफलाः क्रियाः॥"**[1]

यत्र स्त्रियं पूजयन्ति तेषां सम्मानञ्च क्रियते। तस्मिन् स्थाने तस्मिन् गृहे च सर्वदा देवता वासं कुर्वन्ति। यत्र यस्मिन् गृहे स्त्रीणां पूजा तासां सम्मानमदारञ्च न भवति ततः देवताऽपि रुष्टः जायते। देवतानां वासः कदापि न भवति।

1. मनुस्मृति– 3/56

**"स्त्रियां तु रोचमानायां सर्वं तद्रोचते कुलम्।**
**तस्यां त्वरोचमानायां सर्वमेव न रोचते।।"[2]**

स्त्रियाः महत्त्वं किं भवति? एकगृहसमाजादीनां कृते तदनेन पद्येन प्रकटीजायते। वस्त्राभूषणैः स्त्रियाः शोभितानन्तरं सम्पूर्णगृहं शोभितं जायते। सा शोभिता नास्ति चेत्सम्पूर्ण गृहं शोभारहितं जायते। अनेन एतदपि प्रतीयते यत् स्त्री सकारात्मकतायाः प्रतीकोऽस्ति।

अन्यान्यपि कानिचन उदाहरणानि प्राप्यन्ते। यानि स्त्रियाः महत्तां प्रकटीकुर्वन्ति। महाभारतेऽपि स्त्रीसम्मानस्य वार्ता स्वयं भगवता वासुदेवेन कृता। द्रौपद्याः सम्मानस्य अपमानमेव आसीत् येन सम्पूर्णकौरवसेनाकौरवाणाञ्च विनाशः कृतः। स्त्रियाः त्यागमपि द्रष्टुं प्राप्यते। यथा गान्धारीणा स्वनेत्रयोः पट्टी कृता स्वामिनः कृते। लोकलज्जायाः कृते कुन्ती कर्णस्य त्यागं कृतवती। आदर्शवचनस्य पालनकरणाय द्रौपदी पञ्चभ्रातृभिः सह विवाहं कृतवती। मातृकुन्त्याः आज्ञायाः पालनं स्त्रीसम्मानं तस्य मानस्थापनं महत्त्वपूर्णावगमनं तस्य कृते जीवनस्य त्यागोऽपि कचिद्बृहद्वार्ता नासीत्।

महाभारते गान्धारी एका तपस्विनी स्त्री एका पतिव्रतायाः रूपे दर्शनं प्राप्यते।

**"पतिव्रता महाभागा समानवृतचारिणी।**
**उग्रेण तपसा युक्ता सततं सत्यवादिनी।।"[3]**

महर्षिवेदव्यासः महाभारते एका स्त्री या मातृरूपेऽपि भवति। तस्य विषये लिलेख यत्–

**"नास्ति मातृसमा छाया नास्ति मातृसमा गतिः।**
**नास्ति मातृसमं त्राणं नास्ति मातृसमा प्रिया।।"[4]**

मातृसमा कापि छाया नास्ति। मातुः समानं कश्चित्सहायकः नास्ति। मातुं समानं कश्चिद्रक्षकः नास्ति। मातृसमः कश्चित् प्रियः नास्ति।

---

2. मनुस्मृति– 3/62
3. महाभारतस्त्रीपर्व श्लोक–2
4. महाभारतस्त्रीपर्व श्लोक–3

उपनिषत्स्वपि स्त्रियाः विषये पर्याप्तमात्रायां द्रष्टुं प्राप्यते। तैत्तिरीयोपनिषदि-

**"मातृदेवो भवः"**[5]

माता देवतानामपेक्षाऽपि बृहत्स्थानं स्वीकरोति।

वेदेषु अथर्ववेदः यस्मिन् पृथ्वी मातृरूपे द्रष्टुं प्राप्यते। अथर्ववेदस्य भूमिसूक्ते "माताभूमिः पुत्रोऽहं पृथिव्याः" अनेन पद्येन स्पष्टीजायते। यस्यां भूम्यां मानवाः निवसन्ति। सा मातृसमा अस्ति। स्पष्टमस्ति यत् मातुः यावदुदारहृदयं कश्चित्स्यात्, स्वपुत्रस्य सदृशमेव इयं भूमिः अस्मभ्यम् अन्नं प्रदीयते। येन जीवनस्य प्रक्रिया निरन्तरं प्रचल्यमानास्ति।

ऋग्वेदे पुत्राणां समानं पुत्रीमपि पितुः सम्पत्तौ समानाधिकारस्य वार्ता वर्णितास्ति।[7] ऋग्वेदस्य दशममण्डलस्य 39.40तमे सूक्तपस्विनीब्रह्म-वादिनीघोषायाः अस्ति, इतोऽपि ऋषिकाणां वर्णनं प्राप्यते। रोमशा-विश्वरा-अपालादयः।

अथर्वेदस्यचतुर्दशतमः काण्डं यस्मिन् स्त्रियं धर्मपत्न्याः रूपे वर्णितं कृतमस्तिवर्णनञ्च प्राप्यते। एकपत्नीम् अनुरागयुक्तं हृदययुक्तञ्च भवितव्यम्। जीवनयुक्तः सन् बन्धु-बान्धवानां प्रसन्नतायाः पत्याकर्षणस्य कारणं भवति।

**"नीललोहितं भवति कृत्यासक्तिर्व्यज्यते।**
**एधन्ते अस्या ज्ञातयः पतिर्बन्धेषु बध्यते।।"**[8]

एकगृहिण्याः रूपे स्त्रिया गृहं प्रति सर्वकर्त्तव्यान् कथं कर्त्तव्यम् अस्य वर्णनमपि प्राप्यते। भोजनं मनुष्याणां जीवनक्रियां प्रचाल्यमानस्थापनाय आवश्यकमस्ति। उत्तमभोजनमेव कर्त्तव्यं कथितमपि अस्ति। शास्त्रेषु मनुष्यः यथा भोजनं क्रियते तस्य मनः तादृशैव भवति।

---

5. तैत्तिरीयोपनिषदि
6. अथर्ववेद पृथ्वीसूक्त
7. ऋग्वेद-3/31/1
8. अथर्ववेदविवाहकाण्ड

**"तृष्टमेतत्कटुकममाष्ठवद्विषवन्नैतदत्तवे।**
**सूर्यां यो ब्रह्मा वेद स इद्वाधूयमर्हति।।"[9]**

वधूः पाकस्थानस्य अध्यक्षतां कुर्वन् ज्ञातुं योग्यम् अन्नं पृथक् कुर्यात् अन्यद्यत् खादितुं योग्यं नास्ति। तद् गृहाद्दूरं कुर्यात्।

आदिकाव्यं वाल्मीकिना रचितरामायणं यस्मिन् नारीणां शक्तेः यद्वर्णनं प्राप्यते तदन्यस्थानेषु द्रष्टुं न्यूनं प्राप्यते। त्यागसमर्पणप्रेम्णः परिचयः यद्देवीसीतया प्रदत्तः। तदद्भुतमस्ति। रामः सीतायाः अभावे रामः न भवितुं शक्नोति सीतां विना रामस्य जीवनं तादृशैव प्रतीयते यथा आत्मानं विना शरीरम् पतिव्रतास्त्रियाः जीवनं पत्युः सुखदुःखयोः एकसमानं भवितव्यम्। अस्य प्रत्यक्षोदाहरणं देवी सीता अस्ति। सीता यत्त्यागं कृतवती तदेका स्त्र्येव कर्तुं शक्नोति। सर्वे राजभोगान् परित्यज्य वनवासं कः इच्छति? किन्तु सीता तु त्यागसमर्पणस्य मूर्तिः अस्ति। रामं प्रति प्रेमसमर्पणे सर्वोत्तमेव अवगता वनगमनाय रामस्य अस्वीकारकरणे देवी सीता यत्तर्कं रामाय प्रददाति, सा देवी रामं प्रति प्रेम प्रकटीकरोति।

**"ये त्वया कीर्तिता दोषा वने वस्तव्यतां प्रति।**
**गुणानित्येव तान् विद्धि तव स्नेहपुरस्कृता।।**

**त्वया च सह गन्तव्यं मया गुरुजनाज्ञया।**
**त्वद्वियोगेन मे राम त्यक्तव्यमिह जीवितम्।।"[10]**

देवीसीता रामं सुन्दरशब्देषु स्ववार्तां स्पष्टीकरोति। प्राणनाथः भवतः वियोगे अहं स्वजीवनस्य परित्यागं करिष्यामि।

प्रेम्णः परिभाषा या देवीसीता ददाति। सा एकस्त्र्येव दातुं शक्नोति। वनवासस्य सर्वदुःखान् ज्ञात्वापि तस्मिन् पथि गमनस्य प्रबलेच्छाकरणं त्यागसमर्पणप्रेमैव प्रकटीकरोति–

---

9. अथर्ववेदविवाहकाण्ड
10. रामायणस्य अयोध्याकाण्ड

**"वनवासे हि जानामि दुःखानि बहुधा किल।**
**प्राप्यन्ते नियतं वीर पुरुषैरकृतात्मभिः॥"**[11]

वनवासस्य दुःखेन सैव दुःखी भवति, येषां इन्द्रियाणि मनश्च स्ववशे नास्ति। देवीसीतया अस्माकं मातृशक्तिः स्त्रीजातिं बहुकिञ्चिदधि-गमकरणस्य प्राप्यते-

भगवता रामेणापि स्त्रियाः श्रेष्ठतायाः विषये यद्वचनमुक्तं तेन स्पष्टीजायते। स्त्रियाः स्थानं किमस्ति?

**"जननी जन्मभूमिश्च स्वर्गादपि गरीयसी।"**[12]

जननीजन्मभूमिश्च द्वे स्वर्गादपि गरीयसी स्थानं प्रदत्तम्।

दर्शनग्रन्थेषु स्त्रीवादस्य चर्चा द्रष्टुं बहुधा प्राप्यते। प्रकृतिं विना पुरुषस्य अस्तित्वं सम्भवं नास्ति। दर्शनशास्त्रे स्त्रीशब्दस्य अपेक्षा प्रकृतिशब्दः दृष्टिगतः भवति। उदाहरणार्थ सांख्यदर्शनस्य पुरुषः प्रकृतिवादः अत्रापि दृश्यमानमस्ति यत्सम्पूर्णजगत् प्रकृत्यैव उत्पद्यते। प्रकृतिं प्रसवधर्मिण्यपि कथितमस्ति।

**"मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त।**
**षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः॥"**[13]

## सन्दर्भग्रन्थसूची

1. श्रीमद्वाल्मीकीयरामायणम्, सचित्र, हिन्दी अनुवादसहित (प्रथम खण्ड), गीताप्रेस, गोरखपुर-273005, पैंतालीसवाँ पुनर्मुद्रण।
2. श्रीमन्महर्षि वेदव्यासप्रणीत महाभारत, (चतुर्थ खण्ड), गीताप्रेस, गोरखपुर-273005, चौदहवाँ पुनर्मुद्रण, सं 2070।

---

11. रामायणस्य अयोध्याकाण्ड
12. रामायणस्य अयोध्याकाण्ड
13. सांख्यकारिका श्लोक-3

3. मनुस्मृतिः, शिवरामआचार्यः कौण्डिन्न्यायनः, चौखम्बा संस्कृत प्रतिष्ठान, 38 यू.ए. बङ्गलो रोड, जवाहर नगर पो.बा.न. 2113 दिल्ली–11007, प्रथम संस्करण 2010 ई.।

4. अथर्ववेदभाष्यम्– (तृतीयो भाग)पं. हरिशरण सिद्धान्तालङ्कार, श्री घूडमल प्रहलादकुमार आर्य धर्मार्थ न्यास, हिण्डौन सिटी, (राजस्थान)–322230।

5. ऋग्वेदसंहिता– डा. जियालाल कम्बोज, विद्यानिधि प्रकाशन डी–10/1061 (समीप श्रीमहागौरी मन्दिर) खजूरी खास, दिल्ली–110094, प्रथम संस्करण : 2012।

❑❑❑

# परमाणुकारणवादः

ज्योतिकुमारी *

सृष्टिप्रक्रियाबीजानि वयम् ऋग्वेदस्य पुरुषसूक्तमारभ्य उपनिषत्सु, दार्शनिकसम्प्रदायेषु चापि पश्यामः। सृष्टिप्रक्रिया तेषु दर्शनेषु वर्णिता येष्वपि सृष्टिप्रारम्भः मन्यते। नास्तिकदर्शनानि (बौद्ध-जैन-चार्वाकाः) सृष्टिम् अनादिकालीनाम् उत अव्याख्येयां मन्यन्ते। आस्तिकदर्शनेषु मीमांसादर्शनं सृष्टिम् अनादिकालीनां कथयति। अतः सृष्टिप्रक्रियावर्णनं वेदान्तसांख्ययोग-न्यायवैशेषिकेषु प्राप्यते। न्यायवैशेषिकयोः वैशेषिकद्वारा सृष्टि-प्रक्रियावर्णनं कृतम्, या हि न्यायद्वारा अप्यभिमता।

वैशेषिकदर्शनस्य सृष्टि-प्रक्रियासिद्धान्तः परमाणुवादः प्रसिद्धः दार्शनिकेषु। वैशेषिकदर्शने सृष्टितत्त्वानि नवद्रव्याणि एव पृथिव्यप्तेजवाय्वाकाश-दिक्कालात्ममनांसि। पृथिव्यप्तेजोवायुभूतद्रव्याणां मूलम् अविभाज्यम्, अतीन्द्रियम्, अविनाश्यम्, अवयवरहितं च तत्त्वमेव वैशेषिके परमाणुः इति। परमाणवे भारतीयदर्शने अणुपरमाणुपदप्रयोगः प्राप्यते। अन्यत्र च कणपीलुपदप्रयोगः अपि वीक्ष्यते, येन कारणेन वैशेषिकप्रवर्तकः महर्षिः कणादः तत्सिद्धान्तः पीलुपाकवादः प्रसिद्धः शास्त्रे। परमाणुवादसिद्धान्तस्य वैशेषिकदर्शन एव आदिसुव्यवस्थितव्याख्या समुपलभ्यते, अतः एतद्दर्शनं परमाणुकारणवादिदर्शनरूपेणापि दर्शनविदां मतम्।

वैशेषिकस्य परमाणुवादः जगतोऽनित्यभागस्य व्याख्यां करोति। दिक्कालात्ममनसां भौतिकपरमाणूनां चोत्पत्तिविनाशव्यवस्था नाभविष्यत्। अतो वैशेषिकाभिमतः सृष्टिप्रलयख्यापकसिद्धान्तोऽनित्यद्रव्याणामपि सृष्टिप्रलयसम्बद्धः सिद्धान्तो वर्तते।

---

* शोधच्छात्रा, प्राचीनन्यायवैशेषिकविभागः, श्रीलालबहादुरराष्ट्रियसंस्कृतविश्व-विद्यालयः, नवदेहली।

परमाणुसंयुक्ततया वस्तुनिर्माणं, तद्विच्छेदेन च वस्तुनाशः। परन्तु परमाणुसंयोजनाय तत्पृथक्करणाय च गतिः परमावश्यकी। वैशेषिकमते परमाणुः निष्क्रियो गतिहीनश्च। तद्गतिप्रापको न किञ्चिद् बाह्यं कारणम्। प्राचीनवैशेषिकदर्शनानुसारं जीवात्मनाम् अदृष्टमेव परमाणवे गतिं ददाति। परवर्तिवैशेषिकदर्शनानुसारं परमाणुगत्युत्पत्तिमीश्वरः स्वयं करोति। ईश्वरेच्छयैव सृष्टिप्रलयौ भवतः। किमपि वस्तुनिर्माणे द्विप्रकारककारणम् अपेक्षते- उपादानं निमित्तञ्चेति। विश्वस्योपादानकारणं चतुःप्रकारकपरमाणवः, विश्वस्य च निमित्तकारणमीश्वरः अभिमत इति। ईश्वरो विश्वस्य निमित्तकारणं यतः सः जीवेभ्यः तेषामदृष्टानुसारेण कर्मफलभोगाय परमाणुषु क्रियां प्रवर्तयति। परमाणुसंयोगो निम्नलिखितप्रकारेण सम्पद्यते। द्वयोः परमाण्वोः संयोगेन एको द्व्यणुको निर्मीयते। त्रयाणां द्व्यणूनां संयोगेन एकः त्र्यणुकः सिद्ध्यति। चतुस्त्र्यणुसंयोगेन एकः चतुरणुकः प्रादुर्भवति। यदा चतुरणुकः लघु-दीर्घ-संख्याभिः संयुक्तो भवति, तदा लघु-दीर्घ-द्रव्याणां च विकासो भवति। स्थूलपृथिव्यप्तेजोवायवः चतुरणुकसंयोगफलानि कथयितुं शक्यन्ते।

यद्यपि सृष्टिः परमाणुद्वारा भवति, पुनरपि विश्वे क्रमव्यवस्था दृश्यते। एतत्कारणं जीवात्मनां पूर्वस्य कर्म (अदृष्टम्) एव अस्ति। अदृष्टनियमप्रभावितः ईश्वरः सृष्टिकार्यं सम्पादयति। जीवात्मा स्वबुद्धिकर्म-ज्ञानानुसारमेव सुखदुःखभाग् भवति। जीवात्मसुख-दुःखव्यवस्था भौतिक-नियमाधीना न वर्तते, अपितु कर्म-नियमाधीना वर्तते। ईश्वरः जीवगतसुख-दुःखेभ्यः, तद्धर्माधर्मानुसारं परमाणुसहयोगेन सृष्टिं करोति। वैशेषिकदर्शने परमाणून् अतिरिच्य सृष्टौ ईश्वरः, जीवात्मा, कर्मनियमः चाभिमताः। ईश्वरजीवात्मानौ भौतिकौ न स्तः, अपितु आध्यात्मिकौ स्तः। अतो वैशेषिकस्य परमाणुवादाय भौतिकवादीतिपदप्रयोगः सर्वथा भ्रामकमेव।

**परमाणुलक्षणम्-** परमाणुपदसिद्धिः पदद्वयेन सिद्ध्यति- परमः अणुः चेति। अनयोः शब्दयोरर्थः सर्वथा लघुः अर्थात् यस्य अवयवः न स्यात्, एवम्भूतः सूक्ष्मातिसूक्ष्मः, निरवयवः, नित्यतत्त्वम्।[1] शिवादित्यः

1. द्रव्य दो प्रकार के होते हैं- तत्त्व और यौगिक। तत्त्व के सूक्ष्मतम भाग को परमाणु कहते हैं। हिन्दी विश्वकोष, खण्ड 7, पृ.91

निरवयवं, क्रियावन्तं तत्त्वं परमाणुरूपेण ब्रूते।[2] मानमनोहरकारशब्देषु कार्यद्रव्यात् अजन्यमूर्त्ततत्त्वम्ः अणुरुच्यते अथवा मूर्तजन्यतत्त्वम्ः एव परमाणुः इति।[3] प्रभाकरमते परमाणुः परमसूक्ष्मः आद्यवयवः, यः स्वयं निरवयवः, अतीन्द्रियः, नित्यश्चास्ति।[4] अन्यत्र प्रोक्तं यत् गवाक्षजालात् आगच्छति सूर्यातपे यानि सूक्ष्मरजः–कणानि दृश्यन्ते, तान्येव जागतिकतत्त्वानां सूक्ष्मतमदृश्यतत्त्वरूपेण वर्तन्ते, तस्य षष्ठो भागः एव परमाणुः कथ्यते।[5]

त्र्यणुकः, द्व्यणुकः, परमाणुः– सूर्यातपे दृश्यमानरजोकणानि वैशेषिक–दर्शने त्रसरेणुः, दृश्यत्र्यणुकः उत त्रुटिः[6] इत्येवं बुध्यते। यतः अयं त्रसरेणुः दृश्यः अस्ति, अतः तेषां सावयवत्वं सुनिश्चितमेव। अवयवास्ते सिद्धान्तमते द्व्यणुकः[7] इति नाम लब्धवान्, यतोहि ते द्वयोः परमाण्वोः योगेन सम्पद्यन्ते। वैशेषिकदर्शनानुसारमिमे द्व्यणुका अपि सावयवाः मताः, यतस्ते त्रसरेणोः महत्परिमाणजनकाः सन्ति। एवम्प्रकारेण, द्व्यणुकस्य उभावप्यवयवावेव परमाणू स्तः, स्वरूपतः अविभाज्यौ, तद्भाविविखण्डनं च न सम्भवम्।[8]

---

2. निरवयवः क्रियावान् परमाणुः। सप्तपदार्थी, पृ.88
3. कार्यद्रव्याजन्यं मूर्त्तमणु। नित्यो मूर्त्तः परमाणुः। मानमनोहर, पृ.14
4. परमाणुः परमसूक्ष्म आदिवयवः स्वयं निरवयवः अतीन्द्रियो नित्य इति। –प्रभा (न्या.सि.मु. की टीका) पृ.81
5. जालसूर्यरीचिस्थं यत्सूक्ष्मं दृश्यते रजः।
   तस्य षष्ठतमो भागः परमाणुः स उच्यते।।
6. **Tertiary Atom-**Athalye-Bodas, Notes on TS, p.122
   Triad-Bhaduri, SNVM, p-71
7. Binary Atom-Athalye-Bodas, Notes on TS, p.122
   Dyad- Bhaduri, SNVM, p.71
8. न्यायकोश (पृ. 470) में परमाणु के कुछ अन्य लक्षण इस प्रकार उद्धत किए गए हैं–
   (अ) मूर्त्तत्वे सति निरवयवः। –त.कौ.
   (आ) स चायमल्पतरप्रसंगो यस्मान्नल्पतरमस्ति यः परमोऽल्पस्तत्र निवर्तते यतश्च नाल्पीयोस्ति तं परमाणुं प्रचक्ष्महे। वात्स्या, 4.2.14

**परमाणुविशेषता-**

(1) परमाणुः नित्योऽविभाज्यश्च।[9]

(2) एकः परमाणुः स्वयं कस्याप्यन्यकार्यस्योत्पत्तिः न कर्तुमर्हति, यतोऽत्र तन्नित्यत्वं प्रतिहतं भविष्यति।[10]

(3) परमाणुः अतीन्द्रियः, तस्य केनापि बाह्येन्द्रियेण प्रत्यक्षदर्शनमसम्भवात्। यथा महत्त्वाभावाद् उद्भूतरूपवत्त्वाभावाच्च परमाणूनां चाक्षुषप्रत्यक्ष असम्भवम्।[11] तथा महत्त्वाभावाद् उद्भूतस्पर्शवत्त्वाभावाच्च तस्य स्पार्शनप्रत्यक्षमप्यसम्भवम्।[12]

(4) योगीनां परमाणु-प्रत्यक्षम्। यद्यपि वैशेषिकदर्शने सामान्यजनानां परमाणुदर्शनाप्रत्यक्षमेव, किन्तु योगीनां योगाभ्यासेनोत्पन्नधर्मसहायतया मानसप्रत्यक्षम् अथवा उक्तधर्मसहायतया चक्षुरादीन्द्रियैः परमाणोः, दिगादिद्रव्याणां च प्रत्यक्षं सम्भवति, यतोहि योगाभ्यासजन्यधर्मसामर्थ्य-मचिन्त्यम्। अतः सो द्वितीयकारणस्य अपेक्षां न स्थापयति।[13] एवम्प्रकारेण, साधारणतः अप्रत्यक्षेऽपि परमाणुः योगीनां प्रत्यक्षगम्यो भवतीति वैशेषिकसिद्धान्तः।

(5) परमाणुवत् परमाणुनिहितगुणोऽपि नित्यः, केवलं पृथिवीद्रव्य-परमाणुस्थरूपादयोऽनित्याः (पाकजाः)।[14]

(6) परमाणुः एतद्भौतिकजगतोऽन्तिमम् उपादानकारणम् अस्ति।[15]

---

9. सदकारणवन्नित्यम् .. 4.1.1 व.सू. विवृत्ति (2.1.13 सूत्र पर) तथा व्योम, पृ. 225
10. न्या.क.पू. 79-80
11. न्या.सू. 2.1.37 तथा वै.सू. 41.6
12. तर्कप्रदीप Ms. Fol. 2b, CMNV. p. 66 पर उद्धृत
13. उप. पृ. 451 (वं.सू. 81.2)
14. एतेन नित्येषु नित्यत्वमुक्तम् - वै.सू. 7.1.3 तथा उस पर उप.पू. 365
15. ईश्वरश्चेत् जगतो निमित्तं जगतः साक्षादुपादानकारणं किमुक्तं पृथिव्यादि परमसूक्ष्मं परमाणुसजितं द्रव्यमिति। -न्या.वा. (4.1.21), पृ. 460-61

(7) परमाणुः समष्टिव्यष्टितया अपि अप्रत्यक्षः एव।[16]

(8) परमाणुषु विशेषपदार्थः समवायसम्बन्धेन तिष्ठति, येन कारणेनैकः परमाणुः अन्यस्माद् व्यावृत्तो भवति।[17]

(9) परमाणुः अविच्छेद्यः अर्थात् अविनाश्यः, घट-पटादिकार्यद्रव्यविनाशः सम्भवः, किन्तु तन्मूलभूतकारणतत्त्वपरमाणुविनाशोऽसम्भवः, तस्य निरवयवत्वात्। अतः पृथिव्यप्प्रभृतिभूतद्रव्यप्रकरणे उक्तं यत् तानि द्रव्याणि कार्यरूपेण अनित्यानि सन्ति, किन्तु परमाणुरूपेऽनित्यानि सन्ति।

**परमाणुप्रभेदः**- वैशेषिकदर्शने परमाणूनां चत्वारो भेदाः स्वीकृताः सन्ति-पार्थिवजलीयतैजसवायवीयाः इति। परमाणुसामान्यस्य विशेषताः एतत्सर्वप्रकारकपरमाणुषु सन्ति, किन्तु एतच्चतुःप्रकारकपरमाणुषु प्राप्तविभिन्न-विशेषगुणविवरणम् एवम्प्रकारेण अस्ति -

**( क ) पार्थिवपरमाणुः**- पार्थिवपरमाणुषु रूपरसगन्धस्पर्शगुणाः प्राप्यन्ते, किन्तु न ते नित्याः[18], यतस्ते पाक-संयोगेनैव उत्पन्नाः, पाक-प्रक्रियया च परिवर्तिताः अपि भवन्ति। इमे गुणाः पार्थिवपरमाणुभ्योऽनुद्भूताः तिष्ठन्ति।

**( ख ) जलीयपरमाणुः**- जलीयपरमाणुषु रूपरसस्पर्शगुणाः नित्यरूपेण प्राप्यन्ते[19] यतस्ते पाकजाः न सन्ति[20]।

**( ग ) तैजसपरमाणुः**- तैजसपरमाणुषु रूपस्पर्शगुणौ नित्यरूपेणैव प्राप्येते[21], तत्र पाकजविशेषाभावः[22]।

---

16. न्या.ली.पू. 121 तथा न्या.ली. प्रकाश, पृ. 122
17. प्र.पा.भा.पू. 284
18. प्र.पा.भा.पृ. 284
19. प्र.पा.मा.पू. 69 न्या.क.पू. 237-38 तथा किरणा. पू. 189
20. न्या.कु.पू. 138 एवं उस पर बोधनी
21. न्या.कु.पृ. 237 किरणा. पू. 181
22. न्या.कु., स्तवक 1, कारिका 12, पृ. 138

(घ) **वायवीयपरमाणुः**- वायव्यपरमाणुषु केवलं स्पर्शः नित्यः गुणः वर्तते[23]।

**वैशेषिकपरमाणुवादः, अन्यभारतीयदर्शनानि च-**

**बौद्धदर्शनम्**- बौद्धदार्शनिकमतेऽपि परमाणुसत्ता स्वीक्रियते। **'मूर्त्तत्वे सति निरवयवत्वं परमाणुत्वम्'** इत्येतत्परमाणुलक्षणं लक्ष्यते, यद्धि सिद्धान्तमतस्य प्रतिकूलं न वर्तते, किन्तु बौद्धानुसारं परमाणुः न नित्यः, अपितु उत्पत्तिविनाशशीलत्वात् क्षणभङ्गुरः।[24] एतन्मतं सिद्धान्तपक्ष- विरोधि वर्तते, यतः जगतः उपादानं नित्यं स्वीकर्तव्यं भविष्यति, अन्यथा हि न्यायवैशिषमतस्य बाह्यार्थवादस्य ध्वंसो भविष्यति। वैशेषिकदर्शने परमाणुषु संयोगः स्वीक्रियते, सौत्रान्तिकबौद्धाः परमाणुषु परस्परं संयोगं न मन्वते। अतोऽतिरिच्य, बौद्धदर्शने द्व्यणुक-त्र्यणुक-चतुरणुकानां यथार्थता न स्वीकृता, न चैव अवयवेभ्यः पृथक् अवयवी स्वीकृतः, परमाणुसंघातमात्रमेव अवयवी कथ्यते, वैशेषिकदर्शने चावयविनः पृथक् सत्ता साधिता। अन्ततः बौद्ध-परमाणुवादः निरीश्वरवादी, परवर्तिवैशेषिकपरमाणुसिद्धान्तः ईश्वरवादी[25]।

**जैनदर्शनम्**- जैनदर्शनेऽपि परमाणुं विश्वस्यान्तिमोपादानत्वेन स्वीक्रियन्ते। अतः जैनाचार्यप्रभाचन्द्रस्य उक्तिरियं सर्वथा संगतैव यत् (परमाणु-स्वरूपविषये विप्रतिपत्तौ सत्यपि) परमाणुसत्यताविषये जैनवैशेषिक-योर्न कश्चित् मतभेदः[26]।

जैनपरमाणुवादसिद्धान्तः पञ्चास्तिकायादिषु केषुचित्प्राचीनग्रन्थेष्वप्युप-लभ्यते। तदनुसारं, परमाणुः एकजातीयः एव, किन्तु पृथिव्यप्तेजोवायुद्रव्यरूपे

---

23. किरणा., पृ. 181
24. मूर्त्तत्वे सति निरवयवत्वम्परमाणुत्वम् इत्यत्र तु न परमाणुवादिनां विवादः ऋते- बौद्धसिद्धान्तात् तेषां मते उत्पत्तिविनाशवन्तः क्षणमुराश्च परमाणवः। -प्रभा.न्या.सि.मु.पृ. 89
25. Sinha, HIP, vol.I, p. 363
26. न चेदमसिद्धमावयोः परमाणुसत्त्वे विवादात्। -प्र.क.मा.पू. 539

पृथक् भवति। तत्र ते एव गुणाः, ये परिवर्तनीयाः भवन्ति[27]। सर्वप्रधानभेदोऽयं यत् जैनपरमाणुवादः निरीश्वरवादी। तत्र परमाणुनियन्ता कश्चित् चेतनकर्त्ता न, अपितु परवर्तिवैशेषिकदर्शने परमाणुषु प्रथमक्रियासमुत्पादकः ईश्वरः एव स्वीकृतः[28]।

**योगदर्शनम्**– योगदर्शनेऽपि परमाणुं स्थूलभूतविभाजने प्राप्तसूक्ष्मतम–कणानि स्वीक्रियन्ते किन्तु सः अन्तिमः, अविभाज्यः च न, परन्तु अपरमाण्वीयः सूक्ष्मतरः, भौतिकतत्त्वतन्मात्रासंयोगनिर्मितः भौतिकतत्त्वं कथितम्। योगभाष्यकारमते वस्तुसङ्घातः युतसिद्धः, यदा परमाणवः परस्परं संयुज्यन्ते किन्तु पृथक् कर्तुं शक्यन्ते, यद्यपि अयुतसिद्धि–सम्बन्धेन युक्ते सति सरलतापूर्वकं पृथक् न कर्तुं शक्यन्ते। व्याख्याकारव्यासमतं यत् परमाणुसंघातः द्वितीयप्रकारकसम्बन्धस्य उदाहरणम् अस्ति[29]।

**मीमांसादर्शनम्** – यद्यपि मीमांसादर्शनेऽपि परमाणुवादः सिद्धान्ततः स्वीकृतः, किन्तु प्राचीनमीमांसा–ग्रन्थेषु एतद्विषये विस्तृतचर्चा अनुपलब्धा अस्ति। शालिकनाथस्य प्रकरणपञ्जिका–[30] ग्रन्थे केवलमयं निर्देशोऽस्ति यत् अद्रव्यद्रव्यं द्विप्रकारकम् – परममहत्, परमाणुश्चेति। तदन्तरं नन्दीश्वरस्य प्रभाकर–विजयनामकग्रन्थे परमाणुवादसम्बन्धिनी किञ्चिद् व्यापकचर्चा वर्तते[31], किन्तु परवर्तिग्रन्थेषु सत्येव इयं सम्भावना अस्ति यत् ग्रन्थकारः अन्यसम्प्रदायप्रभावितो भवेदिति।

भाट्टमीमांसकसम्प्रदाये कुमारिलकृतश्लोकवार्तिक एव एकत्र परमाणु–चर्चा वर्तते, किन्तु एतत् स्पष्टं न यत् कुमारिलः परमाणुमन्तिमतत्त्वरूपेण

---

27. धातुचतुष्कस्य कारण यस्तु स ज्ञेयः परमाणुः परिणामगुणः। पञ्चस्तिकाय पृ. 132
28. Sinha, HIP, vol. I. p. 362
29. स पुनर्हिविषो युतसिद्धावयवोऽयुत्तसिद्धावयवश्च युतसिद्धावयवः समूहो वनं सङ्घ इति। अयुतसिद्धावयवः संघातः शरीरं वृक्षः परमाणुरितियो. भा. 3.4.4, पृ. 365
30. प्र.प.पू. 148
31. अनन्तकृष्ण शास्त्री, भूमिका, पृ. 5

मन्यते उत त्र्यणुकमिति[32]। पार्थसारथिमिश्रः स्पष्टमुक्तवान् यत् परमाणुरेव अन्तिमतत्त्वमिति[33]। किन्तु मानमेयोदयकारः वैशेषिकपरमाणुं खण्डयन् त्र्यणुकमन्तिमतत्त्वं स्वीकरोति[34]।

एवम्प्रकारेण उपर्युक्तविवरणेन परिज्ञातं यत् योगमीमांसादर्शनयो-र्व्याख्यातपरमाणुवादस्य विस्तृतचर्चाभावात् वैशेषिकपरमाणुवादेन तुलनम-सम्भवम्।

**वैशेषिकपरमाणुवादः ग्रीकपरमाणुवादश्च**- वैशेषिकपरमाणुवादो विश्वस्य प्राचीनतमः परमाणुवादः। केषाञ्चिद्विवद्विचारः यत् वैशेषिक-परमाणुवादः ग्रीकपरमाणुवादेन प्रभावितः तस्य चाधारेण विकसितः किन्तु उभयसिद्धान्तयोः तुलनात्मकविश्लेषणेन एतद् कथयितुं शक्यते यत् वैशेषिकपरमाणुवादविकासः सर्वथा स्वतन्त्ररूपेण एव जातः। वैशेषिक-परमाणुवादस्य ल्यूसिपस्, डिमाक्रिटिस् इत्यनयोः ग्रीकपरमाणुवादेन एकत्र साम्यम् अस्ति, यत् उभयोः अनुसारं परमाणुः निरवयवमविभाज्यमतीन्द्रियं नित्यं भौतिकं द्रव्यमस्ति, अस्य जडजगतः उपादानकारणमस्ति। किन्तु अतोऽधिकमग्रे न किञ्चित् साम्यम् अस्ति। ग्रीकपरमाणुवादिपरमाणुषु केवलं संख्याभेदः, न च गुणभेदः, यद्यपि वैशेषिकपरमाणुषु संख्याभेदः गुणभेदश्च अस्ति। ग्रीकमते परमाणुः स्वरूपतः सक्रियः चलः च अस्ति, वैशेषिकमते परमाणुः स्वतः निःस्पन्दः, निष्क्रियः अस्ति। तत्र स्पन्दः अदृष्टेन सम्पद्यते। ग्रीकमते आत्मा अपि अणुनिर्मितः; वैशेषिकमते आत्म-द्रव्यस्य स्वतन्त्रास्तित्वम् अस्ति, सः च अणुरूपो न भूत्वा विभुः

---

32. न्या. रत्ना, श्लो. बा. सम्बन्धाक्षेपपरिहार, श्लो. 44, 66 पृ. 461, 465-66
33. न त्वेतदपि युक्तम्- नहीच्छामात्रेण प्रयत्नमन्तरेण परमाणुपु स्पन्दोत्पत्तिः सम्भवति, इच्छाकारित प्रयत्नवशेन शरीरस्पन्दोत्पत्तिरद्यत्वेपि दृश्यते। -शा. दी. पृ. 239-40
34. जालन्यविसरद्रवितेजोजाल भासुरपदार्थविशेषान् अल्पकानिह पुनः परमाणून कल्पयन्ति हि कुमारिलशिष्याः।। तदतिरिक्त प्रमाणाभावादनुप्रयोगाच्च तदतिरिक्तकल्पनस्थ। -मा. मेयो 166-67

नित्यश्च। ग्रीकमतं जडवादं भौतिकवादं दर्शयति, तर्हि वैशेषिकमतम् आध्यात्मिकं वस्तुवादं च द्योतयति।

**निष्कर्षः**– उपर्युक्तविवेचनानुसारं निष्कर्षं प्राप्नुपं यत् वैशेषिकदर्शन एव सर्वप्रथमं परमाणुवादस्य सुव्यवस्थिता, गभीरा, सुदृढा पद्धतिः वर्त्तते, इमाः बाह्यार्थवादमान्यताः आधृत्य एतद्विज्ञानमूलकः सिद्धान्तः विकसितः। अध्यात्मवादीनाम् अनथकाघातप्रयत्नैः सार्धैकवर्षपर्यन्तम् अनेन सम्प्रदायेन स्वसिद्धान्तस्य रक्षा कृता[35]। आधुनिकेतिहासकारा अपि स्वीकुर्वन्ति यत् न्याय-वैशेषिकाभिमतः परमाणुवादोऽत्युत्कृष्टकोटिको वर्तते[36]। पाश्चात्य-विद्वांसोऽप्यमुं वादं वैज्ञानिकनिष्कर्षाणां समकक्षं स्थापयितुं प्रवृत्ताः सन्ति[37]।

## सन्दर्भग्रन्थसूची


- Bhatta, Jayanta, Nyaya-maxjari, Sampurnananda Sanskrit University, Varanasi, 1982.
- Chandra, M.m, Mahesha, Nyayaratna, A Primer of Navya Nyaya Language and Methodology, TheAsiatic Society 1 Park Street, Kolkata, 2004.
- Jha, Ram Nath, Shankhya-Darshana, Vidyanidhi Prakashan, Delhi, 2009.
- Thakur, Anantalal, History of Science, Philosophy and culture in Indian Civilization (Origin and Development of


---

35. With their serious methodology, invincible logic and strong common sense, they were best fitted to follow a scientific line of thought without any bias or hindrance. Thus they fought, all along, for the atomic theory and sought to develop it against the relentless tirade of the idealists through the ages for a period extending over about 1500 years.
36. Basham, WTWI, p. 499
37. Monier, Williams, IW, p. 72

the Vaisesika System, Volume II part 4), Centre for studies in Civilizations, 2003.

- उपाध्यायः, बलदेवः, संस्कृत वाङ्मय का बृहद् इतिहास, नवम खण्ड, न्याय, उत्तरप्रदेशसंस्कृतसंस्थानम्, लखनऊ, 1999।
- उपाध्यायः, बलदेवः, भारतीय दर्शन, शारदामन्दिरम्, वाराणसी, 2001।
- कुमारः, शशिप्रभा, वैशेषिक दर्शन में पदार्थ निरूपण, दिल्ली-विश्वविद्यालयः, दिल्ली, 1999।
- बिजल्वाणः, चक्रधरः, भारतीय न्यायशास्त्र, उत्तरप्रदेशहिन्दीसंस्थानम्, लखनऊ, 1987।
- भट्टः, विश्वनाथपञ्चाननः, न्यायसिद्धान्तमुक्तावली किरणावलीटीकोपेता, चौखम्बासंस्कृतसंस्थानम्, वाराणसी, वि.सं. 2063।
- मिश्रः, केशवः, तर्कभाषा, चौखम्बासुरभारतीभवनम्, वाराणसी, द्वादशसंस्करणम्, वि.सं. 1953।
- शर्मा, राममूर्तिः, भारतीय दर्शन की चिन्तनधारा, चौखम्बा ओरियन्टालिया, दिल्ली, 2008।
- शास्त्री, ढुण्डिराजः, वैशेषिकसूत्रोपस्कर, चौखम्बासंस्कृतसंस्थानम्, वाराणसी, सं. 2, वि.स. 2059।

❑❑❑

# विवर्तवाद

- डॉ. आशीष यादव*

विवर्ततवाद कारणता सम्बन्धी सिद्धान्त सत्कार्यवाद का ही विशिष्ट रूप है। वस्तुत: ऐसे सभी दार्शनिक या सम्प्रदाय जो कार्य को विवर्त या आभास मात्र मानते हैं और ऐसा मानकर जगत् के नानात्व का निराकरण करते हुये एकत्ववाद की प्रतिष्ठा करते हैं- विर्वतवादी कहलाते हैं। कहने का तात्पर्य यह है कि यहाँ कार्य (नानात्व) के तात्त्विक सत्ता का खण्डन कर कारण (एकत्व) अदृश्य की ही सत्ता का वास्तविक प्रतिपादन किया जाता है। ऐसी विचारधारा का स्पष्ट उद्घाटन पाश्चात्य दर्शन ब्रैडले के दर्शन में देखा जा सकता है क्योंकि ब्रैडले भी अपनी पुस्तक "आभास एव सत्" में जगत् के प्रातीतिक स्वरूप को आभास कहता है एवं नानात्व का निराकरण करते हुये एकमात्र निरपेक्ष सत् का प्रतिपादन करता है। इस प्रकार हम देखते हैं कि जो दार्शनिक एक तरफ बहुत्ववाद व द्वैतवाद की समस्या से बचना चाहते हैं और साथ ही परम सत् को जगत् के विरोधों से बचाते हैं (अर्थात् तात्त्विक परिवर्तन को नकारते हैं) तो उनकी तार्किक आवश्यकता विवर्तवाद है। स्पष्ट है, विवर्तवाद में एकमात्र कारण को ही सत्य माना जाता है तथा कार्य को प्रतीति या आभास मानते हैं। उल्लेखनीय है कि भारतीय दर्शन में इस विचारधारा का मुख्य-प्रतिपादक प्रत्ययवादी यानी अद्वैतवेदान्ती आचार्य शंकर हैं, किन्तु कुछ आचार्य जो शंकर से पहले थे, उनके दर्शन में भी विवर्ततवाद का बीजरूप स्पष्टत: दिखता है। साथ ही शंकर के परवर्ती भी कुछ आचार्य हैं, जो न्यायवैशेषिक के असत्कार्यवाद के खण्डन के निमित्त सत्कार्यवाद या विवर्तवाद की तार्किक प्रतिष्ठा करते हैं।

---

* पूर्व शोध अध्येता, सर्वदर्शन विभाग, श्री लाल बहादुर शास्त्री राष्ट्रिय संस्कृत विश्वविद्यालय, नई दिल्ली।

ज्ञातव्य है कि शंकर के पूर्ववर्ती आचार्य, जिनके दर्शन में विवर्तवाद के कारणता सम्बन्धी दृष्टिकोण देखने को मिलते हैं, उनमें योगवाशिष्ठ है और इस कृति में इन्होंने असत्य जगत् की बड़ी विशद विवेचना की है। योगवाशिष्ठ के अनुसार जगत् ईश्वर द्वारा उत्पन्न है और उसी के द्वारा शास्त्रार्थ व व्यवहार सम्भव है, किन्तु परमार्थ के बारे में यह सत्य नहीं है। 'यह ईश्वर एक तथा नित्य होते हुये किसी प्रकार के विकार को प्राप्त नहीं होता है। वह जो एक और अनन्त है, किसी चीज को कैसे उत्पन्न कर सकता है?[1]

जबकि गौडपाद भारतीय दर्शन के वह प्रथम व्यवस्थित विचारक हैं, जिन्होंने कार्यकारण की शृंखला से परम सत् को परे रखा। उनके अनुसार कार्य-कारण सम्बन्ध नहीं है। कार्य-कारण सम्बन्ध से परमसत् अशुभ की समस्या से जड़ित हो जाता है। अतः परम सत् एवं जगत् में पारमार्थिक दृष्टि से कार्यकारण सम्बन्ध नहीं है। कार्य-कारण सम्बन्ध द्वैत पर आधारित है। अतः गौड़पादाचार्य ब्रह्म एव जगत् में तादात्म्य स्थापित करते हुए ब्रह्म को ही सत् तथा जगत् को अयर्थाथ अर्थात् मिथ्या सिद्ध करते हैं।

माण्डूक्यकारिका के द्वितीय अध्याय में जगत् के यथार्थ स्वरूप का निराकरण किया गया है। इस सम्बन्ध में उनका तर्क है कि यदि प्रपंच को किसी प्रकार का सत्तामूलक पद प्रदान किया जाय, तब परम सत् से उसके सम्बन्ध का प्रश्न उठ खड़ा होगा। अतः गौड़पाद जगत् के अस्तित्व को स्वप्नवत् मानते हैं। इसके अतिरिक्त उन्होंने सत् का एक प्रतिमान प्रस्तुत किया है, जिसे प्रयोग कर तार्किक आधार पर जगत् को वितथ (अयथार्थ) सिद्ध किया जा सके। यह प्रतिमान निम्न है-

**आदावन्ते च यन्नास्ति वर्तमानेऽपि तत्तथा।**
**वितथैः सदृशाः सन्तो ऽ वितथा इव लक्षिताः॥**

माण्डू० 2/6

---

1. योग वाशिष्ठ- 4/40/70

अर्थात् जो आदि में नहीं है, अन्त में नहीं है तो वह वर्तमान में भी वैसा ही है अर्थात् असत् है। इसी प्रकार यह जगत् उत्पत्ति से पूर्व नहीं था, तथा प्रलय के बाद भी नहीं रहेगा, अतः वस्तुतः इसकी सत्ता नहीं है। यह स्वप्नवत् मिथ्या ही है। जैसा कि भागवत् में भी कहा गया है कि- जो वस्तु पहले नहीं थी और पीछे नहीं रहेगी, वह मध्य में भी नहीं है, वह केवल व्यपदेश मात्र है।'[2] अतः जगत् तथा जागृत वस्तुएं स्वप्नवत् मिथ्या ही हैं तथा मिथ्या होने से अनुत्पन्न। परमार्थतः उनकी कोई उत्पत्ति नहीं होती। इस प्रकार गौड़पाद अजातिवाद का प्रतिपादन करते हैं।

तार्किक दृष्टि से अजातिवाद का प्रतिपादन करते हुए आचार्य गौड़पाद कहते हैं- सत् की उत्पत्ति नहीं हो सकती क्योंकि जो सत् है वह पहले से विद्यमान है और उसकी पुनरुत्पत्ति मानना व्यर्थ है। पुनः असत् की भी उत्पति नहीं हो सकती क्योंकि जो असत् है वह बन्ध्यापुत्र के समान है और वह न माया से उत्पन्न हो सकता है न यथार्थ में। अतः अजातिवाद ही सत्य है।[3] गौड़पाद कहते हैं कि हम द्वैतवादियों से विवाद नहीं करते क्योंकि सत् और असत् उभय पक्ष के ये द्वैतवादी एक साथ एक दूसरे के खण्डन द्वारा अजातिवाद की ही पुष्टि करते हैं।'[4] गौड़पाद वैदिक परम्परा के आचार्य होते हुए भी उन्होंने बौद्धों के अजातिवाद को मान लिया था। जैसा कि उन्होंने स्वयं कहा है- 'उनका (बौद्धों का) जो अजातिवाद विषयक कथन है उसका हम अनुमोदन करते हैं'।[5] पुनः गौड़पादाचार्य अजातिवाद के समर्थन में बौद्धों द्वारा किये गये तीनों तर्कों को स्वीकार करते हुए उन्हीं तर्कों के आधार पर जाति की असम्भाव्यता प्रदर्शित करते हुए 'अजातिवाद' की स्थापना करते हैं। ये तर्क निम्न हैं-

---

2. नयत्पुरस्तादुत्पन्न पश्चाद् मध्ये च तन्न व्यपदेशमात्रम्।
3. भूतप्रसिद्ध च परेण यद्यत् तदेव तत् स्यादितिमेमनीषा।।
   भागवत 4/28/24 एव 40/87/37
4. माण्डू. 3/27-28
5. भूत न जायेत किंचित अभूत नैवजायते।

1. कारण में कार्योत्पाद की शक्ति नही हैं। अर्थात् उत्पत्ति सामर्थ्य न तो सत् में हो सकता है, न असत् में, न सदसत् में और न सदसद्भिन्न में।[6]

2. 'कार्य' आदि और अन्त दोनों में अज्ञात रहता है। अर्थात् 'कार्य' का ज्ञान न आदि में हो सकता है और न अन्त में तथा आदि और अन्त में कार्य का ज्ञान न होने से मध्य में भी उसका ज्ञान नहीं हो सकता अतः कार्य वस्तुतः है ही नहीं।

3. 'कारण और कार्य में कोई क्रम सिद्ध नहीं है। गौड़पादाचार्य कहते हैं कि कार्य-कारण की दो कोटियाँ प्रसिद्ध हैं, परन्तु यह नहीं कहा जा सकता कि कौन पहले है? पुनः पूर्वकालभावित्व कौन कार्य नहीं कहा जा सकता है?'[7]

अतः उपर्युक्त अशक्ति, अपरिज्ञान और क्रमकोप के कारण जाति सिद्ध नहीं की जा सकती, जैसा कि बौद्धों ने प्रतिपादित किया है। वास्तव में सब धर्म अर्थात् बुद्धिग्राह्य पदार्थ जरामरण निर्मुक्त है। जीवात्मा आत्मस्वरूप होने से अज है और जगत्-प्रपंच मिथ्या होने से अनुत्पन्न है।[8]

इस गौड़पादाचार्य शून्यवादी नागार्जुन की भाँति सत्, असत्, सदसत् तथा सदसत् भिन्न में कार्य कारण का निषेध करते हुए अजातिवाद का प्रतिपादन करते हैं, उनके अनुसार जगत् मूलतत्त्व का प्रतिभास मात्र है। अविद्या के कारण तत्त्व ही जगत् रूप से भासित हो रहा है। वस्तुतः जगत् की उत्पत्ति नहीं हो सकती। जिस प्रकार स्वप्न की वस्तुएं मिथ्या प्रतीति मात्र हैं, उसी प्रकार जगत् भी मिथ्या है। वस्तुतः जगत् स्वप्नवत् है। इस प्रकार जगत् की वस्तुपरक सत्ता को नकार कर

---

6. ख्याप्यमानामजातिं तैरनुमोदानहे वयम्।
विवदामो न तैः सर्धमअविवादं निबोधत। माण्डू. 4/5

7. आक्तिरपरिज्ञानं क्रमकोपोथवा पुन, व हि सर्वथा बुद्धिरजाति परिदीपता। म.डू. 4/49 शा.भा.

8. जरामरा निर्मुक्ता सर्वे धर्मा स्वभावत। मा.डू. 4/40

आचार्य गौड़पाद कार्य-कारण या उत्पत्ति की सम्भावना का निराकरण करते हैं। अतः कहा जा सकता है कि अद्वैतवाद के सिद्धान्त के प्रतिपादक आचार्य गौड़पाद कार्य-कारण की समस्या के सन्दर्भ में अजातिवाद का प्रतिपादन करते हैं। आचार्य शंकर भी परमार्थतः अजातिवाद को स्वीकार करते हैं। परन्तु अजातिवाद को स्वीकार करते हुए भी वे व्यवहार में कार्य-कारण का निषेध नहीं करते और इस सम्बन्ध में 'विवर्तवाद' का प्रतिपादन करते हैं। उल्लेखनीय है कि शंकर के परवर्ती विचारकों में विद्यारण्य मुनि, अप्पयदीक्षित, प्रकाशानन्द, सर्वज्ञात्ममुनि, श्रीहर्ष तथा चित्सुख उल्लेखनीय हैं। विद्यारण्य मुनि ने पंचदशी में, प्रकाशानन्द वेदान्तसिद्धान्तमुक्तावली में, सर्वज्ञात्ममुनि संक्षेपशारीरक में, श्रीहर्ष ने खण्डनखण्डखाद्य में और चित्सुख ने तत्त्वप्रदीपिका में कारणता का विशद विवेचन किया है। वास्तव में इन आचार्यों की कृतियो में कारणता का विवेचन मूलतः शंकर से भिन्न नहीं है, किन्तु निरूपण के स्तर पर इनमें वैशिष्ट्य स्पष्ट रूप से दिखता है। जैसे विद्यारण्य मुनि ने पंचदशी में विवर्तवाद, परिणामवाद एवं आरम्भवाद के अन्तर को बहुत ही सूक्ष्मता से व्याख्यायित किया है। जबकि संक्षेपशारीरक में सर्वज्ञात्ममुनि ने परिणामवाद को विवर्तवाद की पूर्वभूमि कहा है। इनका कहना है कि जब परिणामवाद समझ लिया जाता है, तो विवर्तवाद स्वयं ही प्राप्त हो जाता है। इस प्रकार हम देखते हैं कि शंकर के पूर्ववर्ती आचार्यों (वशिष्ठ व गौड़पाद) में जहाँ विवर्तवाद का प्रारम्भिक स्वरूप (अजातिवाद) ही दिखता है वहीं परवर्ती आचार्यों (विद्यारण्य, अप्पयदीक्षित, प्रकाशानन्द, सर्वज्ञात्ममुनि, श्रीहर्ष, चित्सुख) में मात्र निरूपण के स्तर पर ही विशिष्टता दिखती है। कहने का तात्पर्य यह है कि अद्वैतवेदान्त में विवर्तवाद को पूर्णरूप से प्रतिष्ठित व विवेचित करने का श्रेय आचार्य शंकर को ही जाता है। शंकर का विवर्तवाद : शंकराचार्य एकत्ववादी विचारधारा के प्रतिनिधि होने के कारण सत्ता के तीन स्तरों (पारमार्थिक, व्यावहारिक एवं प्रातिभासिक) में मौलिक भेद की स्थापना करते हैं। वे अनेकता सम्पन्न एव देशकालात्मक 'कार्य' को परिपूर्ण सत्तामूलक पद

देने के लिए अनिच्छुक हैं। अतः उनके दर्शन में अधिष्ठान एवं आरोपित, सत्ता के तीन स्तरों एवं ज्ञान व अज्ञान के बीच मौलिक भेद की स्थापना करते हुए कार्य–कारण की समस्या को स्पष्ट करने का प्रयास किया गया है। यहाँ कार्य–कारण सम्बन्ध को कुछ सीमा तक गौड़पादाचार्य की तरह अज्ञान का ज्ञेय क्षेत्र दर्शाया गया है। वस्तुतः शंकराचार्य सत्ता के जिस प्रतिमान को स्थापित करना चाहते हैं, उसकी कसौटी पर कार्य कभी भी खरा नहीं उतर सकता। देशकाल, अनेकता, अपूर्णता, दुःख एवं बन्धन से समन्वित जगत् कार्य ब्रह्मरूपी अधिष्ठान की गरिमा के अनुरूप नहीं है। अतः कार्य–कारण सम्बन्ध को सत्ता के तीन स्तरों में व्यावहारिक एवं प्रातिभासिक स्तर तक सीमित रखना शंकराचार्य के लिए एक तार्किक अपरिहार्यता थी। यही कारण है कि शंकराचार्य कार्य–कारण की समस्या के सन्दर्भ में 'विवर्तवाद' का प्रतिपादन करते हैं। शंकराचार्य विवर्तताद का विवेचन मुख्यतः ब्रह्म एवं जगत् के सम्बन्ध को व्याख्यायित करने के लिए प्रस्तुत करते हैं। सांख्य आदि दर्शन के परिणामवाद के प्रतिफल उन्होंने विवर्तवाद को सृष्टि–कारणता सिद्धान्त के रूप में प्रस्तुत किया है। उनके अनुसार कारण ही सत् है कार्य 'वाणी' का विकार अथवा श्रम मात्र है।[9] जगद्रूप कार्य ब्रह्म का विवर्त मात्र है, परिणाम नहीं। परमार्थतः जगत् की कोई उत्पत्ति, स्थिति या विनाश नहीं है तथा सृष्टि का प्रतिपादन करने वाली श्रुतियाँ परमार्थ विषयक नहीं हैं, केवल व्यवहार का बोध कराने वाली हैं।' अतः अद्वैत वेदान्त में सृष्टि की उत्पत्ति, स्थिति आदि का आशय सृष्टि का विवर्त मानने में है। इसीलिए अद्वैत दर्शन में नामरूपात्मक जगत्प्रपंच के प्रतिषेधक रूप में विवर्तताद की विवेचना तथा परिणामवाद आदि मतों का निराकरण किया गया है।

'विवर्तवाद' एक दार्शनिक परिभाषिक शब्द है, जिसकी स्पष्ट व्याख्या परिणामवाद की तुलना में की गयी है। सर्वज्ञात्ममुनि ने परिणामवाद को विवर्तवाद की अग्रभूमि के रूप में स्वीकार किया है

---

9. छान्दो. 'मा.भा. 6/2/3

क्योंकि उनके अनुसार परिणाम दृष्टि के बिना विवर्त दृष्टि सम्भव नहीं है।[10] वेदान्तसार में विवर्तवाद को परिभाषित करते हुए कहा गया है–

**सतत्त्वतोऽन्यथाप्रथा विकार इत्युदीरित।**
**अतत्त्वतोऽन्यथाप्रथा विवर्त इत्युदीरित॥**

(वेदान्तसार पृ० 44)

अर्थात् तात्त्विक अन्यथा प्रतीति को परिणाम तथा अतात्त्विक अन्यथा प्रतीति को विवर्त कहते हैं। अप्पय दीक्षित ने सिद्धान्तलेशसंग्रह में इसी विषय को क्रम से स्पष्ट किया है कि उपादान रूप से अभिमत वस्तु का समान सत्तावाला अन्यथाभाव परिणाम कहलाता है तथा उपादान से विलक्षण अन्यथाभाव विवर्त है। 'गम्भीरतापूर्वक विचार किया जायु तो किसी भी वस्तु का अन्यथाभाव दो प्रकार का बतलाया गया है– परिणाम रूप से तथा विवर्त रूप से। परिणाम उसे कहते हैं, जब कोई वस्तु अपने स्वरूप को छोड़कर दूसरे स्वरूप को प्राप्त हो जाती है। जैसे– दूध के अपने स्वरूप को छोड़कर दही के आकार में परिवर्तन को वास्तविक परिवर्तन कहते हैं। इसके विपरीत अतात्त्विक अन्यथा प्रथा या विवर्त उसे कहते हैं, जब कोई वस्तु अपने स्वरूप का परित्याग किये बिना ही दूसरे रूप से भासित होने लगती है। जैसे रस्सी अपने स्वरूप का परित्याग किये बिना ही सर्प रूप में भासित होने लगती है।

'विवर्त' का लक्षण करते हुए एक अन्य स्थल पर कहा गया है कि– जो वस्तु उपादान रूप से अभिमत वस्तु से अभिन्न होकर निम्न सत्ता वाली हो उसे विवर्त कहते हैं।[11] इसी प्रकार वेदान्त परिभाषा में भी विवर्त का लक्षण करते हुए कहा गया है कि उपादान कारण का सदृश कार्य परिणाम कहलाता है तथा विषम कार्य विवर्त'।[12] यह सदृशता तथा

10. विवर्तवादस्य हि पूर्वभूमिः वेदान्तवादे परिणामवादः।
व्यवस्थिते इस्मिन्परिणामवादे स्वय समायाति विवर्तवादः।। सा. 2/61
11. स्वभिन्नन्यूनसत्तार्थो, विवर्त इति कथ्यते। वे.सि.सू.म. 4, 6
12. परिणामो नामोपादानसमसत्ताककार्यापत्तिः।
विवर्तोनामोपादानवित्तमसत्ताककार्यापत्तिः।। वेदान्तपरिभाषा पृ. 49

विषमता सत्ता की श्रेणी तथा प्रकार में होती है। जैसे दही दूध का परिणाम है क्योंकि इन दोनों की समान व्यावहारिक सत्ता है। इसके विपरीत विवर्तवाद में कार्य की सत्ता कारण से निम्न है। जैसे- रस्सी-सर्प में सर्प रस्सी का परिणाम नहीं कहा जा सकता। उस स्थल पर सर्प की प्रातिभासिक सत्ता है जबकि रस्सी की पारमार्थिक। अतः सर्प रस्सी का विवर्त है परिणाम नहीं। विवर्तताद की उपर्युक्त परिभाषा कारण कार्य में अपृथक् तादात्म्य का भी निरूपण करती है, जैसे कि वहाँ कहा गया है कि 'उपादान से अभिन्न होकर निम्न-सत्ता वाली वस्तु विवर्त है।'[13] विवर्तवाद की उपर्युक्त परिभाषाएं स्पष्टतः कारण को 'सत्' तथा कार्य को प्रतीति भ्रम, विवर्त अथवा अध्यास रूप में निरूपित करती हैं। इसके अतिरिक्त यहाँ कारण की अपेक्षा कार्य को निम्न सत्ता वाला स्वीकार किया गया है। इन दोनों मान्यताओं से कारण-कार्य अनन्यत्व का प्रतिपादन तथा वास्तविक परिवर्तन का निराकरण होता है।

परिणामवाद में जहाँ कारण कार्य में अनन्यत्व का प्रतिपादन करते हुए परिवर्तन को वास्तविक स्वीकार किया गया है वहीं विवर्तवाद अवास्तविक परिवर्तन को स्वीकार करता है। विवर्तवादी शंकराचार्य भी परिवर्तन को वास्तविक नहीं मानते हैं।[14] उनके अनुसार सत् नित्य, अपरिणामी तथा अपरिवर्तनशील है[15] तत्त्व में किसी भी प्रकार का कोई भी विकास असम्भव है। अतः कार्य- कारण की नामरूप आदि उपाधि मात्र है, जिससे तत्त्व अक्षुण्ण तथा अप्रभावित बना रहता है। हमें वस्तु में जो परिवर्तनगत भिन्नता दिखती है, वह मात्र अवस्थागत है। इससे 'कार्य' कारण से भिन्न कोई नवीन वस्तु नहीं हो जाती और न ही कारण में कोई विकार या परिवर्तन होता है।[16] जैसे- जब स्वर्ण कुण्डल अथवा कंगन रूप-कार्य को उत्पन्न करता है तब यह कहा जाता है कि स्वर्ण

13. वेदान्त परिभाषा। पृ. 449
14. शा.भा. 2/48
15. गीता श.भा. 2,30, बृहदा. भा. 4/4/25
16. शा.भा. 2/4/45

में किसी प्रकार का कोई परिणाम अथवा विकार उत्पन्न नहीं होता अपितु स्वर्ण में कुण्डल रूप तथा कंगन रूप की मात्र प्रतीति होती है। इसका तात्पर्य यह नहीं है कि वस्तुत: कुण्डल तथा कंगन का कोई अस्तित्व ही नहीं है। शकराचार्य व्यवहार में सत्कार्यवा को स्वीकार करते हैं। 'कार्य' की व्यावहारिक उपयोगिता उन्हें स्वीकार्य है। कंगन तथा कुंडल स्वर्ण रूप होते हुए भी व्यवहार की दृष्टि से भिन्न-भिन्न हैं। दोनों का प्रयोजन भिन्न-भिन्न है अत: कार्य की व्यावहारिक उपयोगिता है। शंकराचार्य के विवर्तवाद का तात्पर्य मात्र इतना है कि कार्य की व्यावहारिक उपयोगिता होते हुए भी तत्त्वत: वह कारण से अभिन्न है। कारण में कोई वास्तविक परिवर्तन नहीं होता। कार्य-कारण की उपाधि है तथा उसे सीमित करती है। 'कार्य' वास्तव में कोई उत्पत्ति नहीं है वह कारण की उस रूप में प्रतीति मात्र है। अत: व्यावहारिक दृष्टि से उत्पत्ति तथा परिवर्तन को स्वीकार करते हुए भी शंकराचार्य वास्तविक परिवर्तन का निराकरण करते हुए परिणामवाद का खण्डन करते हैं। शंकराचार्य के अनुसार यदि कार्य कारण का सत् परिणाम अथवा वास्तविक विकार है, तो हमें यह भी स्वीकार करना होगा कि कार्य में जिस रूप तथा गुण की उत्पत्ति होती है वह भी वास्तविक है। तब प्रश्न उपस्थित होता है कि यह रूप तथा गुण उत्पत्ति से पूर्व कारण में था या नहीं? यदि परिणामवादी यह कहे कि यह 'रूप' तथा 'गुण' भी उत्पत्ति के पूर्व कारण में विद्यमान था। तब कम से कम इतना तो स्वीकार करना ही होगा कि इस रूप तथा गुण की अभिव्यक्ति अथवा उसका स्थूल या व्यक्त रूप तो नया है।

इस प्रकार स्पष्ट है कि या तो परिणाम को सत्य स्वीकार कर नयी उत्पत्ति को स्थान देने में असत्कार्यवाद को स्वीकार करना होगा या इस परिणाम को मिथ्या या प्रतीति रूप में स्वीकार कर विवर्तताद को अपनाना होगा। इस प्रकार शंकराचार्य परिणामवाद के तार्किक विकास के रूप में विवर्तवाद का प्रतिपादन करते हैं। विवर्तताद कारण को ही

सत् तथा कार्य को मिथ्या प्रतीति स्वीकार करते हुए कारण-कार्य अनन्यत्व का प्रतिपादन करते हैं।

शंकराचार्य के विवर्तवाद में कार्य-कारण सम्बन्ध के व्यंजक पदों में 'तादात्म्य' 'अव्यतिरेक' 'अपृथक्' तथा 'अनन्यत्व' शब्दों का प्रयोग व्यवहृत हुआ है, जिसका आशय एक ही है और वह है- 'कारण के भाव में कार्य का भाव तथा कारण के अभाव में कार्य का भी अभाव'। अर्थात् जिसमें एक पदार्थ की सत्ता दूसरे के बिना सम्भव नही है, ऐसे दो पदार्थो का सम्बन्ध तादात्म्य, अनन्य आदि शब्दों द्वारा व्यवहृत होता है। "विवर्तवाद" में कारण के बिना कार्य की सत्ता सम्भव नहीं है अतः यहाँ कार्य-कारण में अपृथक्, तादात्म्य अथवा अनन्यत्व का प्रतिपादन किया गया है। इस विषय में शंकराचार्य का प्रथम तर्क है-'भावे चोपलब्धेः (ब्रह्मसूत्र 2/1/15) अर्थात् कारण के होने पर ही कार्य का होना तथा कारण के अभाव में कार्य का भी अभाव। जैसे मृत्तिका के विद्यमान होने पर घट का उत्पन्न होना तथा मृतिका के अभाव में घट का अभाव। अतः मृत्तिका (कारण) तथा घट (कार्य) अनन्य है। इस विषय में शंकराचार्य का दूसरा तर्क यह है कि- 'यच्च यदात्मना यत्र न वर्तते न तत्तत उत्पद्यते' (ब्रसू० 2/4, 46) अर्थात् जो जिस स्वरूप से जिसमें नहीं होता वह उससे उत्पन्न नहीं होता। जैसे- बालू से तेल। इससे उत्पत्ति से पूर्व कार्य-कारण में अनन्यत्व की सिद्धि होती है। उत्पत्ति पूर्व कारण कार्य में अनन्य होने से उत्पन्न हुआ कार्य भी कारण से अनन्य ही है।'

कारण-कार्य में भेद बुद्धि के अभाव से भी दोनों में अनन्यत्व का प्रतिपादन होता है। यदि कारण कार्य अश्व-महिष के समान भिन्न-भिन्न होते, तो इसी प्रकार का उनका ज्ञान भी होता है। परन्तु कार्य के ज्ञान में कारण ज्ञान निहित है। 'पट' के ज्ञान में तन्तु का ज्ञान भी निहित है। जैसे- घट एवं मृत्तिका में घट रूप कार्य के ज्ञान में मृत्तिका रूप कारण का भी ज्ञान निहित है। घट एवं पट का कारण से भिन्न पृथक् रूप में ज्ञान सम्भव नहीं है, अतः कारण-कार्य अनन्य हैं। यह सत्य है कि कार्य

की कारण से नाम रूप से भिन्नता होती है, किन्तु इस नाम रूप से तत्त्व रूप कारण में न कोई वास्तविक परिवर्तन होता है, न दोनों भिन्न-भिन्न होते हैं। जिस प्रकार लपेटे हुए वस्त्र एवं फैले हुए वस्त्र में कोई अन्तर नहीं होता। 'उसी प्रकार कारण तथा कार्य अवस्था भेद तथा काल भेद के कारण यद्यपि दो विभिन्न रूप को धारण करते हैं किन्तु उनके मूलभूत सत् तत्त्व तो सदा एक ही रहता है। 'पट' के उदाहरण द्वारा भी इसे समझा जा सकता है। पट ज्ञान में तन्तु से भिन्न पट नामक कार्य की कोई उपलब्धि नहीं होती, केवल आतान-वितान वाले तन्तु ही प्रत्यक्ष उपलब्ध होते हैं। अत: तन्तुओं की आतान-वितानात्मक विशेष अवस्था पट है। पट तन्तु से भिन्न कोई नवीन पदार्थ नहीं है इस तर्क के आधार पर शंकराचार्य मात्र माया-कारण अनन्यत्व का प्रतिपादन करते हैं अपितु कारण से भिन्न कार्य की किसी वास्तविक सत्ता का भी निराकरण करते हुए कारण को सत् और कार्य को मिथ्या अयथार्थ सिद्ध करते हैं।'

शंकराचार्य एक ओर तो कार्य को कारण का अतात्त्विक परिणाम बताकर उसे मिथ्या घोषित करते हैं तो दूसरी ओर कारण-कार्य में तात्त्विक अभेद का प्रतिपादन करते हैं। यदि कार्य, कारण की अतात्त्विक परिणति है तो दोनों की दो भिन्न सत्ता होनी चाहिए, दोनों में अनन्यत्व नहीं हो सकता। वस्तुत: तादात्म्य दो समान सत्ता में ही सम्भव है विषम सत्ता में नहीं। इस विषय में शंकराचार्य का मत है कि कारण-कार्य अनन्यत्व का तात्पर्य यह नहीं है कि कारण कार्यरूप हो जाता है। अथवा कार्य कारण रूप है अपितु इसका तात्पर्यमात्र इतना है कि कार्य की सत्ता कारणत्वेन ही है, कारण से व्यतिरिक्त कार्य की सत्ता नहीं है। 'जैसे-मृत्तिका रूप कारण से व्यतिरिक्त घट रूप कार्य की कोई सता नहीं है क्योंकि घट मृत्तिका रूप ही है। अत: कारण-कार्य मृत्तिका-घट अनन्य है। इस प्रकार शंकराचार्य के 'विवर्तवाद' में कार्य-कारण की अनन्यता का प्रतिपादन करते हुए 'कारण' को ही 'सत्' तथा 'कार्य' को 'नामरूप' प्रतीति अथवा भ्रममात्र-सिद्ध किया गया है। वस्तुत: विवर्तवाद का मुख्य प्रतिपाद्य सत्ता की दृष्टि से कार्य विशेष और कारण विशेष में ही नहीं,

अपितु सभी कारण और कार्य में अनन्यता का प्रतिपादन करते हुए 'मूल कारण' को सत् तथा कार्य जगत् को मिथ्या प्रपंच मात्र सिद्ध किया जाता है। जैसे– 'मृत्तिका' 'घट' का कारण है। घट मृत्तिका से भिन्न होकर स्थित नहीं रह सकता। अतः घट की अपेक्षा मृत्तिका अवश्य सत् है, परन्तु यह पारमार्थिक सत् नहीं है। मृत्तिका का कारण पृथ्वी मृत्तिका की अपेक्षा ज्यादा सत्तावान् है। इस प्रकार सत्ता की क्रमिकता में अन्तिम रूप से सत् एक मात्र मूलकारण ब्रह्म ही है, जो समस्त चराचर कार्य जगत् का एकमात्र अधिष्ठान है।

वेदान्त परम्परा के अनुकूल शंकराचार्य भी ब्रह्म को जगत् का मूल कारण स्वीकार करते हैं। ब्रह्मसूत्र 4, 4, 3 के भाष्य में उन्होंने श्रुति के आधार पर कारणहीन ब्रह्म को प्रथम कारण की संज्ञा दी है। कार्य-कारण सम्बन्ध को अनवस्था दोष से मुक्त रखने का प्रयास करते हुए वे शून्यवाद का निराकरण तथा ब्रह्मकारणवाद की स्थापना करते हैं। उनका तर्क यह है कि यदि ब्रह्मरूपी सन्मात्र को कारण न माना जाय तब आकाश से लेकर अणु तक प्रत्येक वस्तु सारहीन या निरात्मक हो जायेगी अतः ब्रह्म जगत् का मूलकारण है। ब्रह्मसूत्रकार जिन तर्कों के आधार पर ब्रह्म की मूलकारणता का प्रतिपादन करते हैं, शंकराचार्य भी उन्हीं तर्कों का आश्रय लेकर ब्रह्म की मूलकारणता का प्रतिपादन करते हैं। सूत्रकार बादरायण 'ब्रह्म' को जगत् का मात्र निमित्त कारण नहीं मानते अपितु उसे अभिन्ननिमित्तोपादान कारण स्वीकार करते हैं। आचार्य शंकर भी इसी परम्परा को स्वीकार करते हुये ब्रह्म को जगत् का अभिन्ननिमित्तोपादान कारण स्वीकार करते हैं और इस विषय में सूत्रकार द्वारा प्रस्तुत तर्कों का ही आश्रय ग्रहण करते हैं। ज्ञातव्य है कि प्रकृत्यधिकरण के सूत्रों का भाष्य करते हुए आचार्य शंकर स्पष्टतः ब्रह्म को अभिन्ननिमित्तोपादान कारण कहते हैं। उनके अनुसार 'प्रकृतिश्च' के द्वारा सूत्रकार ने ब्रह्म के निमित्त कारणत्व के साथ-साथ उसे उपादान कारणत्व का भी उपपादन किया है क्योंकि उपनिषदों में वर्णित प्रतिज्ञा और दृष्टान्त की उपपत्ति तभी हो सकती है, जब ब्रह्म की नामरूपात्मक

दृश्यादृश्य जगत् की प्रकृति और जगत् को ब्रह्म विकृति स्वीकार किया जाय। इसी सूत्र की व्याख्या में आचार्य शंकर स्पष्ट करते हैं कि ब्रह्म पहले उपादान कारण ही हो सकता है, उसका निमित्त कारणत्व तो अन्य अधिष्ठाता के न होने से ही समझना चाहिए। जिस प्रकार लोक में मृत्तिका, सुवर्ण आदि उपादान कारण तत् कुम्भकार सुवर्णकार आदि अधिष्ठाताओं की अपेक्षा रख कर ही प्रवृत्त होते हैं, उसी प्रकार सृष्टि का उपादान कारण ब्रह्म भी स्वपेक्षया सृष्टि में प्रवृत्त होता है और उसको अन्य अधिष्ठाता की अपेक्षा इसलिए नहीं हो सकती, क्योंकि सृष्टि के पूर्व 'एकमेवाद्वितीयम्' श्रुति के अनुसार स्वगत भेदशून्य अधिष्ठाता के न होने से ब्रह्म ही सृष्टि का उपादान और निमित्त दोनों कारण सिद्ध होता है। इसके अतिरिक्त 'एकोऽहं बहुस्याम्' इत्यादि श्रुति में सृष्टि संकल्प का उपदेश ब्रह्म में कर्तव्य (निमित्त) और प्रकतित्व (उपादानत्व) दोनों को बोधित करता है जगत् सर्ग के प्रति ब्रह्म की संकल्प-पूर्वक स्वतन्त्र प्रवृत्ति से उसका निमित्तकारणत्व तथा 'बहुस्याम्' अर्थात् बहुत होने के संकल्प से उपादान कारणत्व स्पष्ट प्रतीत होता है।'

इसी प्रकार अन्य श्रुतियाँ भी ब्रह्म के निमित्तोपादानत्व को सिद्ध करती हैं। 'सर्वाणि ह वा इमानि भूतान्याकाशादेव, (छान्दो० 4/9/4) इस श्रुति में साक्षात् ब्रह्म का ही कारण रूप से ग्रहण कर उत्पत्ति तथा प्रलय दोनों ही कहे गये हैं। शंकराचार्य के अनुसार जो जिससे उत्पन्न होता है, तथा जिसमें लीन होता है, वह उसका उपादान कारण होता है। जैसे- धान 'यव' आदि का उपादान कारण पृथ्वी है। श्रुति- 'आकाशादेव' में 'एव' को भाष्यकार शंकर ने सूत्रकार के 'साक्षात् सत्' के साथ जोड़कर यह बतलाया है कि इस 'एव' पद से यही प्रतीत होता है कि ब्रह्म से अन्य उपादान का अग्रहण ही श्रुतियों में प्रतिपादित है, जिसका निर्देश सूत्रकार ने साक्षात् पद से किया है। इसके अतिरिक्त सच्चत्यच्चाभवात् (तैत्ति. 2/6) इस श्रुति में समानाधिकरण से ब्रह्म का ही विकार रूप से यह परिणाम बतलाया गया है। इस प्रकार शंकराचार्य श्रुति के आधार पर तथा सूत्रकार द्वारा प्रयुक्त तर्कों के आधार पर भी ब्रह्म को समस्त जगत् का अभिन्ननिमित्तोपादान कारण स्वीकार करते हैं।

# जैन तथा बौद्ध दर्शन में अहिंसावाद चिन्तन

– **अंकिता जायसवाल***

## प्रस्तावना

विश्व के सभी धर्म एवं दर्शनों में अहिंसा को आध्यात्मिक विकास के लिए अनिवार्य तत्त्व के रूप में स्वीकार किया गया है। अहिंसा भारतीय संस्कृति के लिए प्राण तत्त्व है। अ + हिंसा अर्थात् हिंसा न करना। किसी प्राणी को मन, वाणी और कर्मो के द्वारा घात न पहुंचाना।

अहिंसा के दो प्रकार होते हैं– 1) निषेधात्मक – निषेध का अर्थ किसी चीज को रोकना या न होने देना।

2) विधेयात्मक – दया, सहायता, सेवा, क्षमा करना आदि। हेय को त्यागना निषेधात्मक अहिंसा है। उपादेय का वरण करना विधेयात्मक अहिंसा है।

## जैन दर्शन में अहिंसा

जैन दर्शन भारतीय दर्शनों में प्राचीनतम है। जैन दर्शन का प्रमुख उद्देश्य मनुष्य को संसार के कष्टों से मुक्ति दिलाकर आध्यात्मिक सुख की प्राप्ति हेतु मार्गदर्शन करना है। इसमें ईश्वर की सत्ता का खंडन किया गया है तथा अहिंसा, त्याग, तपस्या आदि पर प्रमुख बल दिया गया है। जैन धर्म की मान्यता के अनुसार 24 तीर्थंकर समय समय पर

---

* शोधच्छात्रा विशिष्टाद्वैतवैदान्तविभाग, श्री लाल बहादुर शास्त्री राष्ट्रीय संस्कृत विश्वविद्यालय, नई दिल्ली।

संसार चक्र में फंसे जीवों के कल्याण के लिए अवतरित हुए।

भगवान् महावीर ने आचार के 18 स्थानों में अहिंसा को प्रथम स्थान दिया है–

**तत्थिमं पढं ठाणं महावीरेण देसियं।**
**अहिंसा निउणं दिठ्टा सव्वभूएसु सेजमो।।**

पंचमहाव्रतों में अहिंसा को प्रथम महाव्रत के रूप में स्वीकृति मिलना उसकी व्यापकता एवं महत्ता का स्वयंभू प्रमाण है। अहिंसा में शेष चारों महाव्रतों का समावेश हो जाता है।

अहिंसा को जानने के लिए अहिंसा को समझना होगा। तत्त्वार्थसूत्र में हिंसा को परिभाषित करते हुए लिखा है–

**'प्रमत्तयोगात् प्राणव्यपरोपणं हिंसा'**

प्रमाद के वश प्राणों का घात होना हिंसा है। जैन दर्शन में प्राण 10 माने गए हैं

1) स्पर्शनेन्द्रिय बलप्राण
2) रसनेन्द्रिय बलप्राण
3) घ्राणेन्द्रिय बलप्राण
4) चक्षुरिन्द्रिय बलप्राण
5) श्रोत्रेन्द्रिय बलप्राण
6) काय बलप्राण
7) वचन बलप्राण
8) मनोबलप्राण
9) श्वासोच्छवास बलप्राण
10) आयुष्य बलप्राण

आचार्य तुलसी ने जैन सिद्धांत दीपिका में लिखा है–

**'प्राणानामनतिपातः अप्रमादो वा अहिंसा'**

नय सिद्धांत के अनुसार रागादि का उत्पन्न होना ही अहिंसा है क्योंकि जहाँ एक के प्रति राग है, वहाँ दूसरे के प्रति द्वेष अवश्यमेव होगा। यही अहिंसा के पालन में बड़ी बाधा है।

सबसे प्राचीन आचारांग सूत्र में भगवान् महावीर ने बताया है कि किसी भी प्राणी, भूत, जीव और सत्त्व का हनन नहीं करना चाहिए, उन पर शासन नहीं करना चाहिए, उन्हें दास नहीं बनाना चाहिए, उन्हें परिताप नहीं देना चाहिए। उनका प्राण वियोजन नहीं करना चाहिए। यही धर्म, शुद्ध, नित्य और शाश्वत है।

जैन दर्शन में समता पर बल दिया गया। यहां अहिंसा के संदर्भ में समता का अर्थ है- सभी प्राणियों को अपनी आत्मा के समान समझना।

**'समयं लोगस्य जाणाति एत्थ सत्थोवर'**

एकेन्द्रिय जीवों से पंचेन्द्रिय जीवों तक के प्रति अहिंसा की धारणा जितनी सूक्ष्मता से जैन धर्म में प्रतिपादित है, उतना अन्यत्र नहीं।

## बौद्ध दर्शन में अहिंसा

बौद्ध दर्शन में अहिंसा सम्बंधी विचार हमें सुत्तपिटक और विनयपिटक में मिलते हैं, जो बौद्ध दर्शन के आधार स्तम्भ हैं। बौद्ध धर्म में मन, वचन और कर्म से अन्य प्राणियों को कष्ट न देने को अहिंसा कहा गया है। धम्मपद में कहा गया है कि अहिंसा के पथ पर चलने वाला व्यक्ति न स्वयं किसी को दुःख देता है और न किसी अन्य व्यक्ति को प्रेरित करता है। विनयपिटक में अहिंसक व्यक्ति स्थूल जीवों के अतिरिक्त एकेन्द्रिय पेड़-पौधों को भी कष्ट नहीं पहुंचाता। वनस्पति का तोड़ना और भूमि का खोदना भिक्षु के लिए वर्जित माना गया है क्योंकि इसमें प्राणियों के हिंसा की संभावना है।

दीग्घ निकाय में भगवान् बुद्ध ने तीन प्रकार के शील की चर्चा की है- इन शीलों में अहिंसा, अस्तेय, ब्रह्मचर्य, सत्य, नशे का त्याग आदि को स्थान दिया गया है।

अहिंसा का संबंध केवल मानव मात्र के ही प्राणघात से या कष्ट से नहीं बल्कि जीव, बीज आदि को भी नष्ट होने से बचाने में है। साथ ही कठोर वचन न बोलकर प्रेमपूर्वक सर्वजनप्रिय भाषण देना भी अहिंसा की श्रेणी में आता है।

अहिंसा के मूल में अप्रमाद का भाव बौद्ध धर्म में जुड़ा है। बुद्ध भिक्षुओं को उपदेश देते हुए कहते हैं- मनुष्य को अपनी सत्ता को रजकण तथा संसार की अन्य सत्ताओं को महापृथ्वी के समान समझकर अपने में प्रमाद नहीं लाना चाहिए। भिक्षुओं को चाहिए कि वे अप्रमत्त होकर विहार करें। जितने भी कुशल धर्म हैं उनका आधार अप्रमाद है। अप्रमाद से ही सभी जीवों के प्रति समानता का भाव पैदा होता है।

बौद्ध धर्म की यह धारणा है कि जैसा मैं हूं वैसा ये है और जैसे ये हैं वैसा मैं हूं। इस प्रकार सभी प्राणियों को अपनी आत्मा के समान समझकर भिक्षु किसी को भी घात न पहुंचाएं।

## निष्कर्ष

भारतीय नास्तिक दर्शन जैन तथा बौद्ध दर्शनों ने अहिंसावाद पर घनिष्ठ बल दिया है। अहिंसावाद पर दोनों दर्शनों का मत काफी हद तक मिलता है। दोनों दर्शनों में प्रत्येक प्राणी के अस्तित्व को सम्मान की दृष्टि से देखने की बात कही गई है, जैन दर्शन आत्मतुला के सिद्धांत पर आधारित है। जैन तथा बौद्ध दर्शन में वचन, मन तथा कर्मों के द्वारा किसी भी प्राणी को घात पहुंचाना अहिंसा माना गया है।


बुद्ध के बौद्ध दर्शन में पृथ्वी, पानी इत्यादि की हिंसा का विचार उस रूप में नहीं है, जिस रूप में जैन दर्शन में प्राप्त होता है। भगवान् महावीर पृथ्वी, पानी, वनस्पति आदि को जीव से युक्त मानते हैं परन्तु बुद्ध नहीं।

बुद्ध ने अहिंसक व्यक्ति को आर्यपद की संज्ञा दी है, जो प्राणी की हिंसा करता है वह आर्यपद पाने का अधिकारी नहीं हो सकता है।

भारतीय संस्कृति में अहिंसा समाज के लिए उन्नति का मार्ग है। अहिंसा के मार्ग पर प्रत्येक व्यक्ति बिना किसी अन्य व्यक्ति को कष्ट पहुंचाए तथा उसका हित चाहते हुए भी सफलता की ओर बढ़ सकता है। प्रत्येक व्यक्ति को समान दृष्टि से देखना अहिंसा के मार्ग पर चलना है। हमारे द्वारा किसी भी मनुष्य को मन, वाक् एवं कार्य के द्वारा कष्ट न देना ही अहिंसावाद को बढ़ावा देता है।

❒❒❒

## सम्पादकः



'मीमांसाशिरोमणिः' 'मीमांसाविशारदः' 'मीमांसावल्लभः' इत्यादिबिरूदालङ्कृतः प्रो. ए.एस्. आरावमुदन् सम्प्रति श्रीलालबहादुर-शास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालये मीमांसाविभागाध्यक्षत्वेन दर्शन-शास्त्रपीठस्य प्रमुखत्वेन च पदमलङ्करोति। आचार्यस्य चतुस्त्रिंशद्वर्षस्य अध्यापनस्य शोधनिर्देशनस्य च अनुभवोऽस्ति। आचार्यस्य निर्देशने पञ्च शोधच्छात्राः विद्यावारिधेः द्वादशशोधच्छात्राश्च विशिष्टाचार्यस्य उपाधिं प्राप्तवन्तः। आचार्यस्य त्रिंशत् संस्कृतभाषया, दश तमिलभाषया, षट् आङ्ग्लभाषया च शोधलेखाः प्रकाशिताः सन्ति। आचार्यः षट्-पुरस्कारेण सम्मानितोऽस्ति। आचार्येण नैकानां सङ्गोष्ठी-कार्यशालानाम् आयोजनं कृतमस्ति। आचार्यः विभिन्नेषु कार्यक्रमेषु मुख्यातिथित्वेन, विशिष्टातिथित्वेन, मुख्यवक्तृत्वेन वक्तव्यं प्रदत्तवान्।

## सह-सम्पादकः



विजयगुप्ता काश्यपगोत्रपरिवारे श्रीमतिनिर्मलादेवी-श्रीविन्ध्याचलगुप्तादम्पत्योः गर्भशुक्तिमुक्तायमानत्वेन जन्म लेभे। बाल्यकालादेव विजयगुप्ता स्वकर्मणि कुशलो विभिन्नेषु विषयेषु जिज्ञासावान् च आसीत्। कृषकपरिवारे जनितत्वादपि शिक्षायाः कृते कस्यचिदपि अभावो नासीत्। परिवारे चतस्रः भगिन्यः, द्वौ भ्रातरौ, अतः सर्वेषां कृते उच्चशिक्षा न सम्भवासीत्, पुनरपि मऊजनपदस्थात् सर्वोदयमहाविद्यालयात् 2014 तमे वर्षे अनेन स्नातकोपाधिं (B.A.) प्रथमश्रेण्यां प्राप्तम्। नवदेहलीस्थस्य जवाहरलाल- नेहरूविश्वविद्यालयस्य संस्कृतप्राच्यविद्याध्ययनसंस्थानात् स्नातकोत्तरोपाधिः (M.A.) 2016 तमे वर्षे लब्धम्। नवदेहलीस्थैव श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयात् 2017 तमे वर्षे विशिष्टाचार्योपाधिः (M.Phil.), 2022 तमे वर्षे च विद्यावारिध्युपाधिः (Ph.D.) प्राप्तम्। इन्दिरागाँधीराष्ट्रियकलाकेन्द्रतः 'पाण्डुलिपि एवं पुरालेख' इति विषये पी.जी.डिप्लोमा-उपाधिः लब्धः। अनेन 'व्युत्पत्ति' [ISSN : 2455-717X], 'संस्कृतरत्नाकरः' [ISSN : 2395-3055], शोधपत्रिकयोः सह-सम्पादनं क्रियते। तथा च 'विचारसागर विमर्श' [ISBN : 978-93-92626-00-5], नामकग्रन्थस्य सहसम्पादनं कृतम्। 55-शोधलेखाः प्रकाशिताः, 7-विशिष्टव्याख्यानानि च प्रदत्तानि, 3-कार्यशाला, 5-सङ्गोष्ठी, 1-विशिष्ट- व्याख्यानम्, 15-शास्त्र-सङ्गोष्ठी संयोजिता। वैज्ञानिकी-तकनीकी-शब्दावली-आयोगे, मिरांडा-महाविद्यालये च विषयविशेषज्ञत्वेन कार्यं सम्पादितम्। चत्वारिंशदधिकेषु राष्ट्रियान्ताराष्ट्रियसङ्गोष्ठीषु च शोधपत्रं प्रस्तुतम्। 50-शोधसङ्गोष्ठीषु 15-व्याख्यानमालासु 50-कार्यशालासु च प्रतिभागं कृतम्। विषयविशेषज्ञत्वं प्राच्यविद्यायां, भारतीयदर्शने, पाण्डुलिपिविज्ञाने च अस्ति। सम्प्रति श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयस्य सर्वदर्शनविभागे सहायकाचार्यरूपेण सेवारतोऽस्ति।

**श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः**

**बी-4, कुतुबसांस्थानिकक्षेत्रम्, नवदेहली-110016**